प्रबन्ध - कुसुमाञ्जलिः

आचार्य डॉ० जयमन्तमिश्रः

इन्दिरा प्रकाशनम्, दरभंगा

प्रबन्ध - कुसुमाञ्जलिः

आचार्य डॉ० जयमन्तमिश्रः

[Published with the financial assistance from the
Rashtriya Sanskrit Sansthan, New Delhi.]

एकः सन्नपि भिन्नं
धत्ते श्यामं सुवर्णमयरूपम्।
आत्मारामो राधा-
रमणो भक्तान् निजान् हि रञ्जयितुम्।।
कुरुतान्मनोरथं मे
पूर्णं तूर्णं स सच्चिदानन्दः।
व्रतमेतद्धि तदीयं
शरणापन्नस्य रञ्जनं सततम्।।

प्रबन्ध - कुसुमाञ्जलिः

रचयिता

आचार्य डॉ० जयमन्तमिश्रः

व्याकरणसाहित्याचार्यः, एम० ए०, पी-एच० डी०, पूर्वकुलपतिः,
कामेश्वरसिंह दरभंगा-संस्कृत-विश्वविद्यालयः, पूर्व-विश्वविद्यालयाचार्यः,
संस्कृतविभागाध्यक्षश्च, बिहारविश्वविद्यालयः, मुजफ्फरपुरम्
राष्ट्रपति-पुरस्कार-सम्मानितः।

इन्दिरा प्रकाशनम्, दरभंगा

दिल्लीस्थ - राष्ट्रिय - संस्कृत - संस्थानस्य वित्तीयसाहाय्येन प्रकाशितः।

प्रबन्ध-कुसुमाञ्जलिः

PRABANDHA-KUSUMANJALIH
by

Prof. Dr. Jayamanta Mishra

© INDIRA-PRAKASHAN

Hanuman Ganj

Mishra Tola, Darbhanga (BIHAR)

First–Edition 1995

[1,000 Copies]

मूल्यम् –

मुद्रक :

अरविन्द प्रिन्टर्स
20, डी वेली रोड
इलाहाबाद – 211002

अवतरणिका

प्रबन्धो नाम परस्पर-सम्बद्धार्थको रचनाविशेषः, यस्मिन् प्रतिपाद्य-विषयानुकूलतया पोष्य-पोषकभावसम्बन्धेन विषयान्तराणां प्रतिपादनं समुल्लसति।

प्रकृष्टः शब्दार्थयोर्बन्धः ग्रथनम् इति प्रोपसर्गाद् बध्नातेर्भावे घञि निष्पन्नः प्रबन्धशब्दः व्युपत्तिलभ्यमर्थं सुस्पष्टयति। अयं हि रचनाविशेषरूपः प्रबन्धः दुर्बन्धतया दुरुदाहर इति प्रतिपादयति महाकविर्माघः शिशुपालवधाख्ये महाकाव्ये--

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते।

अनुज्झितार्थ-सम्बन्धः प्रबन्धो दुरुदाहरः।।[1] इति।।

प्रबन्धस्यास्य लक्ष्य-कुक्षौ काव्य[2]-कथाऽऽ[3]ख्यायिका[4] नाटकादयः[5] सर्वेऽपि समाविष्टा भवन्ति। सुबन्धोः कथा वासवदत्ता प्रत्यक्षरश्लेषमयः प्रबन्ध एव। बाणभट्टस्य कादम्बरी प्रबन्ध एव।

पञ्चदलान्तर्गतानाम् विविधरूपाणाम् अष्टाधिकशतसंख्यकानां प्रबन्ध-कुसुमानाम् अञ्जलिरूपोऽयं प्रबन्ध-कुसुमाञ्जलिः नीर-क्षीर-विवेचन-निपुणानां शब्दार्थ-बन्ध-कोविद-हंसानां सहृदयानां मनीषिणाम् प्रमोदाय कल्पिष्यत इति कथयन्ति दृष्ट-श्रुतैतत्- प्रबन्धाः विपश्चितः। एतल्लब्धसमुत्साहेन मयका आंग्ल-संस्कृत-हिन्दी-मैथिली-नेपाली- भाषासु पूर्वलिखितानामपि अपूर्वाणामेतेषां प्रबन्धानाम् संग्रहं विधाय नवदेहलीस्थ- राष्ट्रिय संस्कृत-संस्थानस्य वित्तीयसहयोगेन "प्रबन्धकुसुमाञ्जलि"रयं प्रकाश्यते।

संग्रहेऽस्मिन् संस्कृते चत्वारिंशत्, हिन्दीभाषायां षट्त्रिंशत्, मैथिलीभाषायाम् सप्तदश, नेपालीभाषायां सप्त तथा आङ्गलभाषायाम् अष्टौ प्रबन्धा विलसन्ति।

प्रबन्धानाम् -- विचारात्मकः, आख्यानात्मकः, वर्णनात्मकः, कल्पनात्मकः, विवेचनात्मकश्चेत्यादयो विभिन्नाः प्रभेदा विधीयन्ते। तत्र यथा दृढ़सेतुबन्धेन एकस्या

---

१. शिशुपालवधमहाकाव्ये २/७३।

२. क्रियाप्रबन्धादयमध्वराणाम्। रघुवंशे ६/२३/३, ५८।
प्रबन्धोऽयं बन्धोरखिलजगतां तस्य सरसाम्। हंसदूते।

३. विच्छेदमाप भुवि यस्तु कथाप्रबन्धः। कादम्बरी
प्रबन्धः कल्पनाकथा-अमरकोशे १/६/६।

४. प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः।
परस्पराश्रया या स्यात् सा मताख्यायिका क्वचित्।।हलायुधे।

५. भास-सौमिल्ल-कविपुत्रादीनां प्रबन्धानतिक्रम्य वर्तमानकवेः कालिदासस्य क्रियायां बहुमानः। मालविकाग्निमित्रम्, प्रस्तावना।

धाराया जलस्य अपरस्यां धारायाम् प्रवेशः अवरुध्यते तथा एकविषयक-प्रबन्धे विषयान्तरस्य प्रभेदान्तरस्य च समावेशः नैव शक्यते अवरोद्धुम्। अतस्तत्र विषयस्य प्रभेदस्य च सांकर्यम् भवत्येव।

प्रकृते संस्कृत-प्रबन्धेषु विशेषतः शास्त्रीय-विवेचनात्मकाः वेद-निरुक्त-व्याकरण-पुराण-धर्मशास्त्र-काव्यशास्त्र-दर्शनशास्त्र-विषयका एव प्रबन्धाः सन्ति। केचित् कालिदास-भर्तृहरि-बाण-माघकवि-विषयकाः केचिच्च महापुरुषजीवनसम्बद्धा विद्यन्ते। एवमेव आङ्गली-हिन्दी-मैथिली-नेपालीभाषासु विरचितेषु प्रबन्धेषु विचारात्मकानां विवेचनात्मकानाञ्च प्रबन्धानामाधिक्यं वर्तते! त्रिचतुरा एव प्रबन्धाः वर्णनात्मका वर्तन्ते। एतेष्वपि गवेषणात्मकानामेव प्रबन्धानाम् बाहुल्यं वरीवर्ति।

''फलवता च नाम प्रयत्नेन भवितव्यम्। न च प्रयत्नः फलाद् व्यतिरेच्यः'' इत्येवं महाभाष्ये कथयता भगवता पतञ्जलिना प्रयत्नः फलवान् भवत्येवेति प्रतिपादितम्।

अतः श्रुतेन यत्नेन च सम्यगुपासिताया वाग्देव्याः प्रसादेन, महता परिश्रमेण च रचितोऽयं प्रबन्धकुसुमाञ्जलिः नीर-क्षीर-विवेचन-शीलानां मनीषिणाम् परितोषाय कल्पिष्यते एवञ्च मामकीनः प्रयत्नः साफल्यं लप्स्यत एवेति विश्वासः।

अत्रास्माकं पवित्रं कर्तव्यं सहयोगिनां कृते कृतज्ञता प्रकाशनम्।

दिल्लीस्थ-राष्ट्रिय संस्कृत संस्थानस्यार्थिक-सहयोगेन ''प्रबन्ध कुसुमाञ्जलि''रयं प्रकाशितोऽभवदित्येतदर्थम् संस्थानस्य निदेशक – महाभागान् **डॉ० कमलाकान्तमिश्रवर्यान्** कार्तज्ञ्येन सभाजयामि।

डॉ० गङ्गानाथझा केन्द्रीय संस्कृत विद्यापीठस्य उपाचार्यः विद्वद्वरः **डॉ० किशोरनाथझामहोदयः** एतस्य प्रकाशने विश्रमरहित-परिश्रमेण यथासहयोगं व्यधात् तद् वाचा व्यक्तुमसमर्थोऽयं जनः केवलं शुभाशिषां राशिभिस्तस्य मङ्गलानि -कामयते।

मम किमपि सारस्वतकार्यं धर्मपत्न्याः **श्रीमत्याः सुशीलादेव्याः** सहयोगेनैव सम्पन्नतामधिरोहति। तां प्रति हार्दिकभावं प्रकटयन् अर्द्धनारीश्वरतया स्वयमेवामन्दमानन्दमनुभवामि।

दैवदुर्विपाकेन विविध-विपद्ग्रस्तोऽपि अरविन्द मुद्रणालयः एतद्ग्रन्थस्य प्रकाशने बद्धपरिकरोऽभवदिति तत्संचालकान् **श्री अरविन्ददास, श्री मनस्वीदास** प्रभृतीन् तत्सहयोगिनश्च सर्वान् प्रति हार्दिकीं कृतज्ञतां ज्ञापयामीतिशम्।

गुरुपूर्णिमा
२२-७-१९९५

विदुषामाश्रवः
जयमन्त मिश्रः

विषयानुक्रमणिका

अवतरणिका

I संस्कृत-प्रबन्धाः

1.	वेद-विषयकाः केचन मौलिकविचाराः	1
2.	महर्षियास्कस्य वैज्ञानिकदृष्टिः	10
3.	व्याकरणस्य विभिन्नसम्प्रदायेषु पाणिन्यष्टकस्य वैशिष्ट्यम्	12
4.	उणादिशब्दानामव्युत्पन्नत्वम् – एकं विवेचनम्	19
5.	महर्षि-पाणिनेर्व्यावहारिकदृष्टिः	22
6.	महर्षि-पाणिनेरुत्सूत्र-प्रयोगाः	27
7.	उपसर्गाणां द्योतकत्ववाचकत्वविषये प्राचां विचारः	31
8.	महर्षिवाल्मीकि-पाणिन्योः पौर्वापर्यम्	35
9.	अरस्तूमहोदस्य भरतमुनेश्च नाट्यविषयक-विचारः	38
10.	सुपद्मव्याकरण-प्रणेतुः पद्मनाभस्य कृतयः परिचयश्च	48
11.	पराविद्या परात्मा च	52
12.	शाङ्कर-वेदान्तदर्शनस्य प्रासङ्गिकता	55
13.	न्यायशास्त्रोपयोगिता	63
14.	गीताया ज्ञान-विज्ञाने	65
15.	श्रीमद्भागवततात्पर्यनिर्णयः	69
16.	कलिसंवत्प्रारम्भकाल-विमर्शः	76
17.	काव्यशास्त्रीय-सम्प्रदाय-रहस्यम्	79
18.	अलंकारः काव्यजीवितमित्येतत् समीक्षणम्	95
19.	अलंकार-शास्त्रमेव सौन्दर्य-शास्त्र-समुद्गम-स्थानम्	99

20.	अलंकारशास्त्रे शास्त्रान्तर-प्रक्रियायोगः	103
21.	आचार्याभिनवगुप्तपादानां शान्तरसविषयकविचारः	117
22.	स्वभावोक्तेरलंकारत्व-समीक्षणम्	128
23.	चित्रालंकार-चित्रणम्	134
24.	भोजराजस्य अलंकारशास्त्रीयचिन्तनम्	138
25.	काव्य-श्रवणात् परं रस-निष्पत्ति-पर्यन्तं समपेक्षितकालस्य विमर्शः	146
26.	भर्तृहरेः सूक्ष्मेक्षिका	149
27.	भारते प्रतीक-नाटक-परम्परा	155
28.	संस्कृत-काव्यशास्त्रे विहारस्य योगक्षेमः	158
29.	बाणभट्टस्य गद्य-शैली	161
30.	संस्कृतसाहित्ये माघस्य महत्त्वम्	165
31.	किं कालिदासो मिथिलानिवासी	174
32.	देशस्य एकतायां संस्कृतस्य योगदानम्	181
33.	संस्कृतस्योपेक्षया राष्ट्रस्य विघातः	184
35.	आवश्यकतास्ति भावनात्मकैकतायाः	188
35.	संस्कृतस्य अद्याप्युपयोगित्वम्	190
36.	अस्माकं प्राचीना अधुनातनी च शिक्षा	196
37.	सत्यश्रमाभ्यां सकलार्थसिद्धिः	202
38.	महामहोपाध्याय डॉ० गोपीनाथकविराजस्य संक्षिप्तजीवनवृत्तम्	205
39.	मधुरमेकं संस्मरणम्	211
40.	पण्डित शीतल-प्रसादशुक्लः – यथाहमेनं जाने।	213

II हिन्दी प्रबन्ध

1.	नाट्य का प्रेक्षक	215
2.	शान्तरस और नाट्य	219
3.	परमात्मा से पराशक्ति का अभेद	230
4.	गीता के योगों में भक्तियोग	234
5.	रामो विग्रहवान् धर्मः	239
6.	कृष्णस्तु भगवान् स्वयम्	247
7.	श्रीमद्भगवद्गीता के ज्ञान और विज्ञान – एक चिन्तन	252
8.	ज्योतिर्लिङ्ग भगवान् वैद्यनाथ और उनका धाम	259
9.	वैदिक मन्त्रों में देवता का परिज्ञान	263
10.	मिथिला में श्रीकृष्ण-भक्ति	266
11.	निष्काम कर्मयोग – एक चिन्तन	269
12.	पुराणों का परम प्रयोजन – श्रेय और प्रेय की प्राप्ति	271
13.	आचार की परमावश्यकता	273
14.	शक्ति और शक्तिमान् की अभिन्नता	276
15.	भगवन्नाम की महत्ता	279
16	चरित्र की महत्ता	283
17.	सर्वं करोति निश्छिद्रं नाम सङ्कीर्तनं हरेः	286
18.	पुरुषोत्तम की सोलह कलाएं – एक विश्लेषण	289
19.	जगज्जननी जानकी का परमोदात्त चरित्र	294
20.	पुराणों में सदाचार महिमा	297
21.	पुराणों में भगवन्नाम संकीर्तन महिमा	299
22.	पुराणों में सत्य की महिमा	301

23.	मिथिला के शिव भोलेनाथ	303
24.	गुणनिधान हनुमान्	306
25	मिथिला के दुलहा श्रीराम	311
26.	मिथिला के ग्रामदेवता	317
27.	मिथिला के सिद्धयोगी परमहंस श्री लक्ष्मीनाथ गोस्वामी	321
28.	धर्म का आदर्श परिवार	324
29.	षोडश संस्कार और उनका महत्त्व	331
30.	सूत्रकार महर्षि पाणिनि	336
31.	हमारी प्राचीन और आधुनिक शिक्षा	338
32.	राजा प्रकृतिरञ्जनात्	345
33.	विदेशों में संस्कृत साहित्य	348
34.	संस्कृत की उपेक्षा राष्ट्र के लिए घातक	353
35.	ललित बाबू ने कहा था	356
36.	कीर्तिर्यस्य स जीवति	359

III मैथिली-प्रबन्ध

1.	शब्दतत्त्व	361
2.	रीतितत्त्व	371
3.	काव्यमे औचित्य	379
4.	काव्यमे सामञ्जस्य अपेक्षित	382
5.	धर्मनिरपेक्षता – एक विवेचन	384
6.	सत्यान्नास्ति परो धर्मः	389
7.	नहि ज्ञानेन सदृशं पवित्रमिह विद्यते	391
8.	अभावक आवश्यकता	393
9.	घर-घर एके लेखा	395
10.	दृष्टिसांकर्य	399

11. संयोग 402

12. मिथिलामे नाटकक परम्परा 408

13. मैथिली-सदृश भाषाक एना उपेक्षा किएक ? 412

14. कोन कथा सत्य ? 416

15. लोचनैः पीयमानः 419

16. नियागरा (फॉल्स) प्रपात 421

17. नेपालक मल्लकालीन मैथिलीसाहित्य 424

IV नेपाली-प्रबन्ध

1. संस्कृत रूपकका विशेषताहरू 428

2. नाट्यको प्रेक्षक 437

3. महर्षिपाणिनिका उत्सूत्र प्रयोग 441

4. अध्यात्मवाद र मानव समाज 445

5. मर्यादापुरुषोत्तम श्रीराम 448

6. जगज्जननी जानकी को परमोदात्त चरित्र 450

7. मिथिलामा शक्तिपूजा 453

V English Essays

1. The Literary Heritage of Nepal 456
2. Panini's Approach to Chhandas 475
3. Process of Experiencing Aesthetic Pleasure 478
4. Sanskrit Studies Outside India 481
5. Contribution of Nepal to Sanskrit Literature 484
6. Vidyapati as a Writer of Religious RITE 487
7. Jayadeva, the author of the Candraloka is identical with the author of the Prasannaraghava 491
8. Beef-eating : Anathema to The Vedic Aryans 496

ग्रन्थकार-वंशपरिचयः 501

आसीन्मे या प्रकृति-मधुरा लोकमातेव माता
दीने हीने नरिपरिजने दानशीला वदान्या।
मञ्जूदेवी प्रथितसुगुणा धर्मकर्मैकनिष्ठा
लोके मान्या महित-चरिता कृष्णापादानुरक्ता।।

जननी-स्नेह-सुधया वर्धितेन महीतले।
तनयेन तदीयेन जयमन्तेन सादरम्।।

तस्याः पुण्य-स्मृतौ देव्यामया भक्त्या समर्प्यते।
शारदाराधनाल्लब्धः "प्रबन्ध-कुसुमाञ्जलिः।।"

वेद-विषयकाः केचन मौलिकविचाराः

वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः।[१]
वेदो नारायणः साक्षात् स्वयम्भुरिति शुश्रुम।।

साक्षान्नारायणस्वरूपस्य, तस्यैव महतो भूतस्य निश्वसितरूपस्य, प्रकाशान्तरापेक्षारहितसूर्यस्येव स्वयमेव प्रकाशमानस्य, स्वयम्भुरूपस्य, नित्यस्य, साक्षात्कृतधर्मभिः तपस्यमानैः महर्षिभिः दृष्टस्य, अनादिपरम्परातः श्रूयमाणस्य, अपौरुषेयस्य, सच्चिदानन्दमयस्य मन्त्र-ब्रह्मणात्मकशब्दराशेर्भगवतो वेदस्य रूपं ब्रह्मणो रूपमिव अचिन्त्यमपि स्वस्वरूपेणैव बोधगम्यम्। 'तर्काप्रतिष्ठानात्[२]' इति भगवद्बादरायणसूत्रनिर्देशात् अचिन्त्यभावेषु तर्कयोजनाया अनौचित्यात्[३] वेद-विषयेऽपि अभियुक्तप्रतिपादितमार्गानुसरणमेव शरणं समेषां श्रेयस्करम्।

व्याकरण-दृष्ट्या विभिन्नधातु-निष्पन्नो वेदशब्दः उपर्युक्तान् समस्तानर्थान् अभिव्यनक्तीति विजानते शब्दतत्त्वविदो विपश्चितः। तथा हि-

१. आदादिकविद्ज्ञाने इत्यस्मात् करणे घञि 'वेत्ति-जानाति धर्मादिपुरुषार्थचतुष्टयोपायान् अनेन' इति वेदः।

२. दैवादिकविद् सत्तायाम् इत्यस्मात् भावे घञि वेदः। एतेन वेदस्य सद्रूपत्वम्।

३. तौदादिकविद्लृ लाभे इत्यस्मात् करणे घञि 'विन्दति लभते धर्मादिपुरुषार्थान् अनेने'ति वेदः।

४. रौधादिकविद् विचारणे इत्यस्मात् करणे घञि[४] 'विन्ते-विचारयति सृष्ट्यादिप्रक्रियामनेने'ति वेदः।

---

१. श्रीमद्भागवते ६।१।४०।

२. बादरायणब्रह्मसूत्रम् अ० २, पा० १, अधि० ४, सू० १२।

३. अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।

४. धाता यथापूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः। अघमर्षणसूक्तम्।
युगान्तेऽन्तर्हितान् मन्त्रान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा।। मनुः।
अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।। महाभारते।
सर्ववेदमयेनेदमात्मनाऽऽत्मात्मयोनिना।
प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते।। श्रीमद्भा० ३।९।४३।
अन्तर्हिते भगवति ब्रह्मा लोकपितामहः।
प्रजाः ससर्ज कतिधा दैहिकीर्मानसीर्विभुः।। तत्रैव ३।१०।१।

५. चौरादिकविद् चेतनाख्याननिवासेषु इत्यस्मात् करणे घञि[1] वेदयते आख्याति नामादिकमनेनेति वेदः।

सत्तार्थक विद्यतेः, ज्ञानार्थकवेत्तेस्तथा लाभार्थकविन्दतेः भावे घञि विद्यते इति वेदः, वेत्तीति वेदः, विन्दतीति वेदः इत्येवंरूपेण वेदस्य सन्मयत्वं, चिन्मयत्वम् आनन्दमयत्वञ्च तेन सच्चिदानन्दमय-ब्रह्मरूपत्वमपि सिद्ध्यति। अत एव शब्दब्रह्म-परब्रह्मणोरेकत्वात् "ओमित्येकाक्षरं ब्रह्म" इत्यादि संगच्छते।[2] इदमेव एकाक्षरं ब्रह्म गीतोक्तम् "गिरामस्म्येकमक्षरम्"[3] इत्येवं रूपेण परमात्मनो रूपतया निर्दिष्टम्। तथा कठोपनिषदि –

"एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।[4]
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।।

इत्येवंरूपेण श्रुतम्।

अस्तित्वभावापन्नस्यैव पूर्वतो विद्यमानस्य पदार्थस्य दर्शनं भवति। साक्षात्कृत-धर्मभिर्महर्षिभिः वेदस्य दर्शनं कृतम् इत्येतेन पूर्वकल्पत एव वेदस्य विद्यमानत्वं सिद्ध्यति। अत एव वेदा नित्या अपौरुषेयाश्चेति कथनं सर्वथा संगतम्।

अत्रेदं ध्यातव्यम् – कल्पादौ मन्त्र-द्रष्टारः साक्षात्कृतधर्माणो महर्षयः ब्रह्मणो मानसाः सुताः स्वयमुद्भूताः ऐश्वर्यशालिनः बुद्धेः परंगता अभूवन्, येषु भृगु-वसिष्ठादयः दश प्रमुखा आसन्[5]। इमे दीर्घजीविनः साक्षात्कृत-धर्माणः ऋषयः स्वजीवनकाले अवरेभ्यः अवरकालिकेभ्यः विज्ञानशक्तिहीनेभ्यः असाक्षात्कृतधर्मभ्यः उपदेशद्वारा मन्त्रान् शब्दतः अर्थतश्च सम्प्रददुः। तदनन्तरं बुद्धिह्रासाधिक्ये सति उपदेशेनापि मन्त्रान् ज्ञातुं ये असमर्था अभूवन् तेषां कृते इमे श्रुतर्षयः अवरऋषयः शाखा-प्रशाखा-प्रवक्तारः ग्लायन्तः - अर्थात् कथमिमे अल्पग्रहणशक्तिकाः एतावन्तम् समुपदिश्यमानम् अर्थजातम् शब्दतः अर्थतश्च ग्रहीतुं समर्था भवेयुरिति खिद्यमानाः

---

१. सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक्
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे।। मनुः १/२१।।
तेषां तु यानि नामानि प्राक्सृष्ट्यां प्रतिपेदिरे।
शर्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यजः।।

२. भगवद्गीता ८।१३।

३. तत्रैव १०।२५।

४. कठ० १।२।१६।

५. ईश्वराः स्वयमुद्भूता .... तस्मान् महर्षयः।। वायुपु० ५९।८२-८।३।।

सन्तः तेषु अनुकम्पया भेदज्ञानार्थम्–भेदतत्त्वप्रकाशनार्थं वा निघण्टुनामकं ग्रन्थं वेदं वेदाङ्गानि च समाम्नातवन्तः[१]।

एतावता स्पष्टमिदं यद् अवरकालिकेभ्यः ऋषिभ्यः पूर्वम् समस्तवेदजातम् शाखा-प्रशाखादि-भेद-रहितमासीत्। तदध्ययनस्य दुरूहतया सौविध्यार्थम् शाखादीनां व्यसनमभूत्। व्यसनादेव बादरायणो महर्षिः व्यासः अथवा वेदव्यास[२] इत्यभिधीयते। व्यसनादेव एकविंशतिधा बाह्वृच्यम्, एकशतधा आध्वर्यवम्, सहस्रधा सामवेदम्, नवधा आथर्वण[३]मित्युच्यते। इत्येतेन एकत्रिंशदधिकैकादशशतशाखाः वेदानां पतञ्जलिसमये आसन्। पुराणेषु शाखा-संख्या-विषये किञ्चिदन्तरमपि दृश्यते। शौनकस्य चरणव्यूहानुसारेण ऋग्वेदस्य आश्वलायनी, सांख्यायनी, शाकला, वाष्कला, माण्डूकायनाश्चेति पञ्चैव शाखा आसन्[४]। एतास्वपि पञ्चसु इदानीम् शाकलशाखा उपलभ्यते यस्याः पठन-पाठने प्रचलतः। एतावता अधुना अनुपलब्धाः शाखाः पुरापि नासन्निति न भ्रमितव्यम्, यतः कासांचित् अनुपलब्धानां शाखानाम् ब्राह्मणम्, उपनिषत्, श्रौतसूत्रम्, गृह्यसूत्रम् केषाञ्चिन्मन्त्राणामुल्लेखश्च समुपलभ्यन्ते। डा० अमलधारी सिंहः स्वकीये शोधात्मके निबन्धे वाष्कलशाखाया उपलब्धिं सप्रमाणं संसूचयति। इयं स्थितिः वेदान्तरशाखा-समुपलब्धि-विषयेऽपि भवितुमर्हति।

अयं हि मन्त्र-ब्राह्मणात्मकः शब्दराशिर्वेदः प्रत्यक्षानुमानाभ्याम् अगम्यमुपायं वेदयतीति वेदस्य वेदत्वम्। उक्तं हि सायणाचार्येण –

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।[५]

---

१. साक्षात्कृतधर्माण ऋषयो बभुवुः। तेऽवरेभ्यः असाक्षात्कृतधर्मभ्यः उपदेशेन मन्त्रान् संप्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नासिषुः वेदं च वेदाङ्गानि च। यास्क-निरुक्ते १।६।२०।

२. पराशरात् सत्यवत्यामंशांश - कलया विभुः।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम्।। भागवते १२।६।४६।।
जातःपराशरात् योगी (व्यासः) स च –
चातुर्होत्रं कर्मशुद्धे प्रजानां वीक्ष्य वैदिकम्।
व्यदधात् यज्ञसन्तत्यै वेदमेकं चतुर्विधम्।।
(ऋक्-पैलः, साम-जैमिनिः, यजुः – वैशम्पायनः, अथर्व-सुमन्तुः। इतिहास-पुराणानि-रोमहर्षणः)
त एव ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा।
शिष्यैः प्रशिष्यैः तच्छिष्यैः वेदास्ते शाखिनोऽभवन्।। तत्रैव १।४।१६-२४।।

३. एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामेवदः नवधाथर्वाणः एकविंशतिधा बाह्वृच्यम् इति पातञ्जल महाभाष्ये।

४. चरणव्यूहे १।७।

५. कृष्ण यजुर्वेदभाष्य भूमिका।
प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता।।

एतस्य च वेदस्य स्वस्वरूप-नित्यत्वादिज्ञानम् सूर्यस्य स्वस्वरूपेणैव स्वज्ञानमिव स्वत एव भवतीति वेदस्य स्वतः प्रामाण्यम्।

अस्यैव च वेदस्य ऋग्यजुःसाम-संज्ञक-त्रिप्रकारक-मन्त्राणाम् चतुर्ष्वपि वेदेषु सद्भावात् त्रयीति, ऋषि-गुरु-परम्परातः श्रवणात् श्रुतिरिति, निश्चयेन मन्त्रार्थबोधनात् निगम इति, बहुशः आम्नातत्वात् आम्नाय इत्येवमादीनि बहूनि नामधेयानि सन्ति।

पद-क्रमादिपाठैः वेदस्वरूपस्य आनुपूर्व्येण अद्यापि परिरक्षणात् नियतवाचोयुक्तिकत्वात् नियतानुपूर्वीकत्वाच्च श्रूयमाणयथास्थितशब्दराशेरेव वेदत्वम्। अतः "अग्निमीळे पुरोहितम्" इत्यस्यैव वेदत्वम् न तु 'वह्निमीडे पुरोहितम्' इत्यस्य। इत्येवं सति यः कश्चनाधुना ऋषिंमन्यः वैदिकभाषायां स्वरचितं पदजातमपि वेदं मनुते तत् आधुनिकपदजातं वेदत्वेन कदाचिदपि स्वीकर्तुं न शक्यते। वैदिकभाषा-मात्रत्वेन वेदत्वम् न कदापि केनापि अङ्गीकृतम् नापि अद्यापि अङ्गीकर्तुं शक्यते। नवनिर्मित-साहित्ये वेदत्वमाधातुं न कोऽपि प्रभवति।

इदमत्रावधेयम्--

यत्तु वाल्मीकीयं रामायणम्, वैयासिकं महाभारतम्, कालिदासीयं रघुवंशम् इत्यादि व्यवहारेण यथा रामायण-महाभारत-रघुवंशादेः वाल्मीकि-व्यास-कालिदासादि-कर्तृत्वं निश्चीयते, तथा कठ-शाकल-वाष्कल-कौथुमेत्यादिरूपेण तद् तद् वेदशाखा-कर्तृत्वेन कठादीनामाख्यानात् वेदानामपि कर्तृत्वं प्रतीयते इति तन्न, दृष्टान्तदार्ष्टान्तिकयोर्भेदस्य स्फुटत्वात्। काठकम्, कौथुमन्तु कठेन प्रोक्तम् – प्रकर्षेण उक्तम् अध्यापितम्, इत्यर्थे "तेन प्रोक्तम्" इति पाणिनिसूत्रेण प्रोक्तार्थे अण् प्रत्ययो भवति न तु कृतार्थे। तेन रघुवंशादिवत् काठकादिशाखायाः कठादिकर्तृत्वं नैव स्वीकर्तुं शक्यते। अद्यापि पुराणस्य प्रवचनकर्ता तत्पुराणस्य कर्तृत्वेन नैवावबुध्यते।

एतद्विषये भगवान् जैमिनिः--

"वेदांश्चैके सन्निकर्षं पुरुषाख्या"[1] इति पूर्वपक्षं समुत्थाप्य "आख्या प्रवचनात्[2]" इति सूत्रेण तत् खण्डयामास। वेदस्य अपौरुषेयत्वञ्च सिद्धान्तयामास।

एवमेव ये चाप्यभिदधति वेदेषु प्रावाहणि-बबरस्य औद्दालकिकुसुरबिन्दस्य आर्ष्टिषेण देवापिशन्तन्वोश्च एवंविधस्यान्यस्य वा जननमरणवतां नामानि अवलोक्य

---

१. जै० सू० १।१।२७।
२. तत्रैव १।१।३०।

बबरादिभ्यः पूर्वम् तेषामभावात् वेदा अधुनातनपुरुषरचिता अनित्याश्चेति तदपि न विचारसहम्।

"अनित्यदर्शनाच्च[1]" इति सूत्रेण अनित्यता-विषयकं पूर्वपक्षं समुद्भाव्य "उक्तं तु शब्दपूर्वत्वम्[2]" इति सूत्रेण नित्यत्वं समर्थयामास। अयमाशयः--

पूर्वकल्पतः समागतानामेव बबरादिनाम्नां प्रयोगोऽयं वर्तते, न तु इदानीन्तनानाम्।

उच्चार्यमाणस्य शब्दराशेर्वेदस्य वागिन्द्रिये एव विद्यमानतया ततः परं नित्यत्वं न स्यादिति औदुम्बरायणमतं समुत्थाप्य शब्दस्य व्याप्तिमत्त्वात् तन्नित्यत्वं सम्यग् उपपद्यते इति महर्षिणा यास्केन सयुक्ति साधितम्। एतच्चाधुना वयं रेडियोयन्त्रद्वारा प्रत्यक्षमेव अनुभवामः।

अर्थज्ञानसहितवेदाध्ययनेनैव तदध्ययनसाफल्यम्--

मन्त्राणामर्थवत्त्वं प्रतिपाद्य अर्थज्ञानसहितस्यैव वेदस्य अध्ययनेन तस्य अध्येता सफलः सर्वान् कामान् अवाप्नोतीति भगवता यास्केन--

"स्थाणुरयं भारहारः किलाभूत्
अधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते
नाकमेति ज्ञानविधूतपाप्मा[3]।।"

इत्येवमुद्धरता प्रतिपादितम्।

यथा हि शुष्कमपि इन्धनम् अनग्नौ कदापि न ज्वलति, तथैव अर्थज्ञानरहिते अध्येतरि तदधीतमपि निष्फलमेव भवति। अतः ये केचनाधुना वेदस्य पाठमात्रेणैव कृतकृत्यतां मन्यन्ते ते वस्तुतो न भवन्ति सर्वथा सफलमनोरथाः, किन्तु शुद्धपाठमात्रेण पारायणजन्यं पुण्यं लभन्ते एव।'

"नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन"।।[4]

इत्यादिना भगवद्गीतयापि ज्ञानस्य महत्त्वं स्मर्यते।

---

१. जै० सू० १।१।२८।
२. तत्रैव १।१।२६।
३. निरुक्ते १।६।१८-१६।
४. गीता ४।३७-३८।

साक्षात्कृतधर्मणाम् परमर्षीणां युगे वेदार्थज्ञानाय वेदव्याख्यानस्य पृथगावश्यकता नासीत्। शब्द-श्रवणेन सहैव शब्दार्थयोस्तादात्म्यं तेषां कृते हस्तामलकवत् प्रत्यक्षमासीत्, अर्थज्ञानमनायासमेवासीत्। ततः परं तदुपदेशद्वारा मन्त्र-ग्रहणसमये मन्त्रोपदेशेनैव सह अर्थज्ञानमपि अवराणाम् असाक्षात्कृतधर्मणाम् समभूत्। यथावन् मन्त्रोपदेशग्रहणेऽप्यसमर्थानां तृतीयकोटिकानाम् ऋषीणाम् समये तत्त्वतो वेदरहस्यज्ञानाय निर्वचनशास्त्रं प्रादुरभूत्। यत्र महर्षियास्कस्य निरुक्तं मुकुटायमानमस्ति। महर्षियास्कः अर्थस्य-अर्थात् ज्ञेयपदार्थस्य समृद्धिं कार्य-वैविध्यं च परितोऽवलोक्य एकस्य शब्दस्य अनेकं निर्वचनं चकार। तच्च निरुक्ताध्येतारो विजानते एवेति नास्ति तत् प्रदर्शनस्यात्र आवश्यकता। किञ्च निर्वचन-प्रसङ्गे महर्षिणा प्रदर्शितः संकेतः सर्वथा मन्तव्य एव।

"नामानि आख्यातजानि"[१] इति नैरुक्तसमयं सम्प्रदर्श्य मुख्यतः धात्वर्थमेवाभिलक्ष्य "अक्षर-वर्ण-सामान्यान्निर्ब्रूयात् न त्वेव न निर्ब्रूयात् न संस्कारमाद्रियेत[२], इत्येवं प्रतिपादयता महर्षिणा "अर्थनित्यः परीक्षेत[३]" "केनचिद् वृत्ति-सामान्येन" इति कथयता अर्थप्रधानो भूत्वा निर्वक्तव्यमिति 'शब्दसामान्यादर्थसामान्यं बलीय' इति समर्थितम्। अपरञ्च "नैक- पदानि निर्ब्रूयात्[४]" इत्येवमादिशता प्रकरणादिकम् अविज्ञाय नैरुक्ताभिमानेन जहादीनि पदानि न निर्वक्तव्यानि, अपि तु प्रसङ्गादिकं विज्ञायैव तन्निर्वक्तव्यम्।

अन्यच्च ऋषिषु उत्क्रामत्सु मुक्तेषु मन्त्रार्थज्ञानचिन्तया मनुष्या यास्कादिमुनिसमये देवान् अब्रुवन्–को न ऋषिर्भविष्यतीति ? देवाः तेभ्यः एतं तर्कं युक्तिमयं निरुक्तशास्त्रम् ऋषिं प्रायच्छन्[५]। एवं हि वेद-व्याख्याने यास्कीयनिरुक्तनिर्दिष्टपद्धतिरेव शरणम्। यास्कीय-निरुक्तमाधारीकृत्यैव परवर्तिनः स्कन्दस्वामि-वेङ्कट-माधवोवट-सायण-दयानन्दसरस्वतीप्रमुखा वेदभाष्यकारा वेदार्थान् प्रकटयाञ्चक्रुः।

योगी अरविन्दः आधुनिकयुगीनः महान् चिन्तकः तत्त्वद्रष्टा पुरुषोऽभवत्। स च स्वकीये ध्यानयोगे वेदस्य किमपि अलौकिकं महत्त्वं दृष्टवान् यथा यास्केन मन्त्रेषु सर्वत्र अधियज्ञात्मकम्, अधिदैवात्मकम् आध्यात्मिकञ्च रूपम् प्रदर्शितम् तथैव

---

१. निरुक्ते १।४।

२. तत्रैव २।१।

३. तत्रैव २।१।१।

४. तत्रैव २।१।

५. मनुष्या ऋषिषूत्क्रामत्सु देवानब्रुवन्–को न-ऋषिर्भविष्यतीति ? तेभ्य एवं तर्कमृषिं प्रायच्छन् मन्त्रार्थचिन्ताऽभ्यूहमभ्यूढम् तस्माद् यदेव किञ्चानूचानोऽभ्यूहतिआर्षं तद् भवति। तत्रैव १३।१।१३।

अरविन्दमहाशयेनापि अवलोकितम् तथा धात्वर्थमूलकनिर्वचनप्रक्रियाया महत्त्वं स्वीकृतम्।

यद्यपि वेदरहस्यप्रतिपादके (The Secret of the Vedas) इति प्रबन्धे भारोपीय- मूलकधातुना सहापि क्वापि वैदिकशब्दस्य सम्बन्धस्थापनप्रयासस्तेन विहितः, परन्तु मन्त्रार्थ-ज्ञाने नैरुक्तप्रक्रियैव बाहुल्येन अनुसृता। एवं हि वेदव्याख्याने यास्कीयनिरुक्तपद्धतिरेव समेषां शरणम्।

वेद-व्याख्या-प्रसङ्गे वेदविद्यासमुद्धारकस्य समीक्षाचक्रवर्तिनः विद्यावाचस्पतेः मिथिलाभिजनपण्डित-मधुसूदनझाशर्मणः वेदस्य वैज्ञानिकं भाष्यमपि ध्यातव्यम्, यस्मिन् आत्म-सृष्टि-पितृ-श्राद्ध-यज्ञ-पृथिव्यन्तरिक्ष-द्युलोकानाम् तत्तल्लोकदेवतादीनाम् स्वरूपाणि वेदविज्ञानमाधारीकृत्य प्रदर्शितानि। एतद् वेदविज्ञानपद्धत्या महामहोपाध्याय गिरिधरशर्मचतुर्वेदि-वेदवीथीपथिकपण्डितमोतीलालशास्त्रि – डॉ० वासुदेव शरणाग्रवालादिभिः लिखितानां विविधानां विशालानां ग्रन्थानामपि मननं वेद-विद्या-प्रचाराय श्रेयस्करम्।

अधुनातनाः पाश्चात्त्या वेदव्याख्यातारः तदनुसर्तारः भारतीयाश्च वेदव्याख्याने तुलनात्मक-भाषाशास्त्रम् तुलनात्मकदेवशास्त्रञ्च आधारीकृत्य वैदिकशब्द-निर्वचने कल्पनाप्रसूताया भारोपीयभाषायाः कमपि मूलधातुम् अन्विष्यन्ति।

नीरक्षीरविवेकिनः पाश्चात्त्या अपि अनेके विद्वांसः वैदिकवाङ्मयं मूलतः भारतीयमेवेति मन्वानाः तद्व्याख्याने प्राचीनभारतीयपद्धतिमेव समुचितां मन्यन्ते। अतो यास्कीय-पद्धति-महत्त्वं सर्वैरङ्गीकृतम् अद्यापि अङ्गीकर्तव्यम्।

एवं महत्त्वशालिनाम् वेदानां कथमधुना भारते खेदावहो ह्रासः अभूत्? एतस्मिन् ह्रासे वेदाधिकारसीमितत्वं नास्ति कारणम्, अपि तु युगधर्मप्रभावेण आधियज्ञिकाधिदैविकाध्यात्मिकमूल्यस्य तन्महत्त्वस्य च तिरस्करणात् स्वाध्याये लोकानामप्रवृत्तिरिति खेदं जनयति।

वेदस्य सर्वतोभावेन रक्षायाः प्रयासोऽपि यत्र तत्र विधीयते इति सन्तोषमपि आवहति।

साम्प्रतम् भारतसर्वकारेण नवदेहल्यां संस्थापितेन 'वेदविद्याप्रतिष्ठानेन' वेद-विद्यायाः संरक्षणाय, प्रचाराय, प्रसाराय, गवेषणाय च प्रयासो विधीयते।

जयपुरस्थेन 'राजस्थानवैदिकशोधसंस्थानेन', जोधपुरस्थेन 'प्राच्यविद्याप्रतिष्ठानेन,' इन्दौरस्थेन 'वेदसदनेन', कालिकातास्थेन रवीन्द्रभारतीविश्वविद्यालयान्तर्गतेन सम्प्रत्येव 'School of Vedic Studies' इत्याख्येन वेदाध्ययनपीठेन, पटनास्थेन श्रीहनुमन्मन्दिरेण, होसियारपुरस्थेन 'वैदिकशोधसंस्थानेन', एवंविधेन अन्येन पीठसंस्थानादिना च वेद-विद्यायाः परिरक्षणार्थम् उज्जीवनार्थं च विविधाः प्रशस्या उपाया विधीयन्ते। एतन्महत्त्वपूर्णकार्यस्य सम्यक् सम्पादनाय देवस्थानेन अनेनापि दायित्वं गृहीतमिति अमन्दमानन्दं जनयति।

श्रवणपरम्परातः समागतायाः श्रुतेः तद्रूपेण संरक्षणस्य इदानीं महती आवश्यकता वरीवर्ति। तदर्थं यावान् यादृशः प्रयासः समपेक्षितः तावान् तादृशः प्रयासो न भवति।

दक्षिणभारते कतिपयेषु परिवारेषु पीठेषु च विहारे बौंसीस्थे श्यामाचरणपीठे, लगमास्थे जगदीशनारायण-ब्रह्मचर्याश्रमे, वाराणस्यां कतिपयस्थलेषु च सस्वरवेद-पाठाध्यापनस्य व्यवस्था वर्तते, परन्तु सापि सन्तोषावहा नास्ति। वेदविद्याया महत्त्वं जानानैः भारतीयैः श्रुतेः परम्परानुसारं संरक्षणं सर्वथा विधेयमेव।

इदानीम् भारते राष्ट्रियभावनायाः भावनात्मकैकतायाः, सम्पूर्णप्रभुत्वसम्पन्नतायाः, राष्ट्रस्य एकतायाः, अखण्डतायाः, पारस्परिकबन्धुत्वभावनायाः कृते वेद-विद्यायाः प्रचारः न केवलं परमावश्यकः, अपि तु राष्ट्र-रक्षणार्थम् एष एवोपायः शरणम्।

अस्माकमियं निर्भ्रान्तधारणा वरीवर्ति "यन्मनुरवदत् तद् भेषजम्"। भगवान् मनुः कथयति--

"वेद एव द्विजातीनां निःश्रेयसकरः परः"

"धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः"। २।१३।।।

"वेदाद् धर्मो हि निर्बभौ" ५। ४४।

"वेदमेवाभ्यसेन्नित्यम्" १।४७।

"वेदोऽखिलो धर्ममूलम्" २।६।

"सर्वं वेदात् प्रसिद्ध्यति" १२।९७।

"मोघमन्नं विन्दते अप्रचेताः

सत्यं ब्रवीमि वध इत् स तस्य।

नार्यमणं पुष्यति नो सखायम्

केवलाघो भवति केवलादी।।'' ऋ० १०।११७।६।।

''अक्षैर्मा दिव्यः कृषिमित् कृषस्व

वित्ते रमस्व बहु मन्यमानः।।'' १०।३४।१३।।

''इहैवस्तं मा वियौष्टं विश्वमायुर्व्यश्नुतम्।

क्रीव्ठन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे।।'' तत्रैव ७।६।५३।।

''संगच्छध्वम् संवदध्वम् सं वो मनांसि जायताम्'' १०।१६।२।।

''समानो मन्त्रः समितिः समानी'' तत्रैव १०।१६।३।।

''समानमस्तु वो मनो यथा वः सुसहासति'' तत्रैव १०।१६।४।।

''ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्।'' ईशोप० १।

इत्यादिषु निहितानां भावानां पूर्णतः अनुसरणेनैव राष्ट्रस्य सर्वविधकल्याणं शक्यसंभवम्। एतदर्थं वेदस्य सम्यक् पठनं पाठनं प्रचारः प्रसारश्च कर्तव्यकोटौ समागच्छन्ति। इतिशम्।

जयतु भगवान् वेदः

जयतु भगवान् श्रीवेङ्कटेश्वरः

महर्षियास्कस्य वैज्ञानिकदृष्टिः

वैज्ञानिक-चाकचिक्येन चकिताश्चमत्कृताश्च अधुनातना जना न जानन्ति न वा स्वीकुर्वन्ति प्राचीनानां महर्षीणाम् आध्यात्मिकं वैभवम्, वैदुष्यं वैशिष्ट्यञ्च। आस्माकीनाः प्राचीना महर्षयः मन्त्र-द्रष्टारः सन्तः विश्वेषां पदार्थानां याथातथ्यं जानाना आसन्। ऋषिशब्दस्य निर्वचनं कुर्वता महर्षियास्केन "ऋषिर्दर्शनात्" इति प्रतिपाद्य 'स्तोमान् (मन्त्रान्) ददर्श (पश्यति) ऋषिरिति' औपमन्यवाचार्यमतमपि प्रदर्शयाञ्चक्रे[१]। एतस्मिन्नर्थे "तद् यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भु अभ्यानर्षत्, त ऋषयोऽभवन् तदृषीणामृषित्वमिति विज्ञायते"[२] इति ब्राह्मणमपि प्रादर्शि। अर्थात् यस्मात् तपस्तप्यमानान् एतान् ऋषीन् ऋग्यजुःसामाख्यं स्वयम्भु ब्रह्म अभ्यागच्छत्। (तपोविशेषेण अनधीतमेव वेदम् ते तत्त्वतो ददृशुः ज्ञातवन्त इति भावः) ते खलु ऋषयोऽभवन् तद् ऋषीणाम् ऋषित्वमित्येवं ब्राह्मणेऽपि विचार्यमाणं सत् ज्ञायते। एतेन ऋषयः सूक्ष्मानपि आधिभौतिकान्, आधिदैविकान् आध्यात्मिकांश्च पदार्थान् हस्तामलकवत् पश्यन्तीति अवगम्यते।

आधुनिक - प्राकृत वैज्ञानिक-दृष्ट्यापि महर्षि-यास्कस्य महत्त्वाधायकं वैज्ञानिकत्वं तन्निरुक्ते विलोक्यते। तथा हि - वैश्वानरस्याग्नेः विचारणायाम् पार्थिवोऽग्निः वैश्वानरः उताहो वैद्युतः, आदित्यो वेति प्रश्ने "अयमेव पार्थिवोऽग्निः वैश्वानरः"[३] इत्याचार्यशाकपूणिमतं समर्थयता महर्षियास्केन प्रतिपादितम्--

"विश्वानरौ एते उत्तरे ज्योतिषी। वैस्वानरोऽयं यत् ताभ्यां जायते" इति। अर्थात् वैद्युतरूपं मध्यमम्, आदित्यरूपमुत्तमञ्च इमे उभे ज्योतिषी विश्वानरौ उच्येते। अयं हि पार्थिवः अग्निः यतः ताभ्यां मध्यमोत्तमाभ्यां वैद्युतादित्यरूपाभ्यां विश्वानराभ्यां ज्योतिर्भ्याम् जायते, अतः तयोरपत्यत्वाद् वैश्वानर इति निगद्यते।

कथमयं पार्थिवोऽग्निः एताभ्यां ज्योतिर्भ्यां जायते इति जिज्ञासां समादधता तेन तत्रैव प्रतिपादितम्--

"यत्र वैद्युतः शरणमभिहन्ति। यावदनुपात्तो भवति मध्यमधर्मैव तावद् भवति, उदकेन्धनः शरीरोपशमनः। उपादीयमान एवायं संपद्यते उदकोपशमनः शरीरदीप्ति[४]" रिति।

---

१. निरुक्ते २।३।१२।

२. तत्रैव उद्धृतम्।

३. तत्रैव ७।६।२३।

४. तत्रैव ७।६।२३।

अयमाशयः – यावत्कालपर्यन्तं वैद्युतः अग्निः शरणम् – आश्रयरूपं जलं प्राप्नोति, यावच्च मनुष्यैरस्पृष्टो भवति तावदयं मध्यम[1]धर्मा भवति, अर्थात् उदकेन दीप्यते, शरीरेण शुष्ककाष्ठेन अन्येन वा प्रतिहतमूर्तिस्वभावकेन उपशाम्यति। यदा चायं मध्यमो वैद्युतोऽग्निः परिगृह्यते तदैव पार्थिवोऽग्निः संपद्यते, अर्थात् जलेन उपशाम्यति शरीरेण काष्ठादिना च प्रदीप्यते। अत्र जलाज् जायमानायाः काष्ठादि-सम्पर्कोपशमशीलायाश्च विद्युतः स्वभावः--यदधुना वैज्ञानिकप्रयोगेण प्रदर्श्यते–महर्षिणा तदानीन्तने एव काले साधु प्रतिपादितः।

विश्वानरादादित्यरूपादपि अयं पार्थिवोऽग्निर्वैश्वानरः समुत्पद्यते इति प्रतिपादयता महर्षिणा यास्केन कथितम् - "उदीचि प्रथमसमावृत्ते आदित्ये, कंसं वा मणिं वा परिमृज्य प्रतिस्वरे, यत्र शुष्कगोमयम् असंस्पर्शयन् धारयति तत् प्रदीप्यते। सोऽयमेव संपद्यते"[2] इति। अयं भावः –

ग्रीष्मसमये यदा आदित्यः प्रखरकिरणो भवति तदा कांस्यपात्रं सूर्यकान्तमणिं वा परिशोध्य आतपे यदि स्थापयति, तदधोभागे शुष्कगोमयम् असंस्पर्शयन् धारयति, तदा तद्गोमयं प्रदीप्यते। सः शुष्कगोमयजन्मा अयं पार्थिवः अग्निः संपद्यते। अत्र महर्षियास्कस्य वैज्ञानिकदृष्टेः प्रयोगोऽपि सुस्पष्टं दृश्यते। एतेन उपर्युक्त वैश्वानरविषयकप्रतिपादनेन महर्षेर्वैज्ञानिकता कमपि महिमानमादधाति।

आध्यात्मिकोन्नत्यै प्रयतमानानां प्राचीनानां महर्षीणाम् आधिभौतिकोन्नतौ हेयज्ञानतया आधिभौतिकविज्ञाने न तथा तेषामभिनिवेश इति जानत एव विवेकिनो विपश्चितः।

वेद – वेदाङ्गानां सम्यगध्येतारः महर्षीणां दर्शनेषु कृतिषु आधुनिकविज्ञान-प्रतिपादितान् विषयान् अवलोकयन्ति निर्दिशन्ति च जिज्ञासूनां जिज्ञासासमाधानाय, ज्ञानार्थिनां ज्ञानवर्द्धनायेतिशम्।

---

१. मध्यमस्येव धर्मो यस्येति व्यधिकरण-बहुव्रीहौ अनिच्।
२. तत्रैव ७।६।२३।

व्याकरणस्य विभिन्नसम्प्रदायेषु पाणिन्यष्टकस्य वैशिष्ट्यम्

ब्रह्मलोके महितत्वकामनया षडङ्ग-वेदस्य अध्ययनमावश्यकम्। तत्र षट्स्वपि अङ्गेषु व्याकरणस्य मुखमिव[1] मुख्यतया प्राधान्यम्। सर्वेष्वपि व्याकरणेषु च लोक-सर्ववेदसाधारणतया मूर्धन्यायमानं पाणिनीयं व्याकरणमित्याम्नाति महर्षिपतञ्जलिः।[2] इदं हि पाणिनीयं व्याकरणं महाशास्त्रं पदसाधुत्वलक्षणं सर्वोपकारकम् कार्त्स्न्येन ग्राह्यम् न किमपि त्याज्यमिति निर्दिशति पराशरोपपुराणम्[3]। पाणिन्यष्टकस्य वैशिष्ट्यम्, महत्त्वम् गौरवञ्च पश्चात् प्रदर्शयिष्यन्ते। प्रथमं व्याकरणस्य विभिन्नसम्प्रदायाः चर्च्यन्ते।

एवं हि अनुश्रूयते--

समुद्रवद्व्याकरणं महेश्वरे
तदर्धकुम्भोद्धरणं बृहस्पतौ।
तद्भागभागाच्च गतं पुरन्दरे
कुशाग्रबिन्दून् पतितं हि पाणिनौ।।[४]
यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात्।
पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे।।[५]

अतः पाणिनेः प्राचीनाः सम्प्रदाया विव्रियन्ते--

१. ब्राह्मसम्प्रदायः

ब्रह्मणः सकाशादेव ज्ञानविज्ञानानां प्रादुर्भावात् व्याकरणमपि प्रथमं तत एव प्रकटितमभूत्। अतः ब्रह्मा प्रथमो वैयाकरणः।

---

१. छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।। पाणिनीयशिक्षा।

२. सर्ववेदपारिषदं हीदं शास्त्रम्। इति "पूर्वापरप्रथम"- २।१।५८। इति सूत्रे भाष्यम्।

३. पाणिनीयं महाशास्त्रं पदसाधुत्व लक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं, त्याज्यं न किञ्चन।। पराशरोपपुराणम्।

४. सारस्वतभाष्ये।

५. महाभारत - मनबोधटीकायाम्।

२. ऐशान-सम्प्रदायः

महर्षिपाणिनिः अक्षरसमाम्नायं महेश्वरादेवाधिगम्य कृत्स्नं व्याकरणं प्रोक्तवान्।[१] प्रत्याहारसूत्राणि माहेश्वरसूत्राण्येव उच्यन्ते। अतः शिवः द्वितीयो वैयाकरणः।

३. बृहस्पति-सम्प्रदायः

एवं हि अनुश्रूयते–"बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्त्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम,"[२] एवं हि इन्द्रः गुरोः बृहस्पतेः दिव्यं वर्षसहस्त्रं यावद् व्याकरणमधीतवान्। सुराचार्यस्य व्याकरण-सम्प्रदायः बार्हस्पत्यसम्प्रदायो बृहस्पति-सम्प्रदायो वा उच्यते।

४. ऐन्द्र-सम्प्रदायः

वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुर्विति। तमिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्।[३] अर्थात् इन्द्र एव प्रथमं प्रकृति-प्रत्यय-विभागेन वाचं व्याकृतवान्। अतः इन्द्रश्चतुर्थवैयाकरणः। तस्य सम्प्रदायश्च ऐन्द्रः।

५. वायव्य-सम्प्रदायः

वायुपुराणे वायुः "शब्दशास्त्रविशारदः"[४] इत्युच्यते। एतेन वायुः वैयाकरणः वायव्यसम्प्रदायस्य प्रवर्तकः। यामलाष्टकतन्त्रेऽपि वायव्यस्य उल्लेखः प्राप्यते।

६. भरद्वाज-सम्प्रदायः

"बृहस्पतिः इन्द्राय इन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः व्याकरणं प्रोवाच इति कथनात् "ऋतो भारद्वाजस्य"[५] इति सूत्रे पाणिनिकृतनिर्देशाच्च भारद्वाजपूर्वज-भरद्वाजस्य संकेतेन तत्सम्प्रदायः प्रतीयते।

---

१. येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः।। पाणिनिशिक्षा।
नृत्तावसाने....... शिवसूत्रजालम्।। नन्दिकेश्वरः, काशिका।

२. पस्पशाह्निके शब्दानुशासनप्रसङ्गे।

३. तैत्तिरीय संहिता।

४. वायुपुराणम् २।४४।

५. अष्टाध्यायी ६।२।६७।

७. भागुरि-सम्प्रदायः

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।

आपं चैव हलन्तानां यथा वाचा निशा दिशा।।[१]"

इत्यस्मिन् श्लोकवार्तिके आचार्यभागुरि – मतस्योल्लेखात् वैयाकरण-भागुरेः सम्प्रदायोऽवगम्यते।

८. पौष्करसादि-सम्प्रदायः

"चयो द्वितीया शरि पौष्करसादेरिति वाच्यम्"[२] इति वार्तिके पौष्करसादिमत-निर्देशात् पौष्करसादिसम्प्रदायः परिज्ञायते।

९. चारायण-सम्प्रदायः

महाभाष्ये[३] 'कम्बल-चारायणीयाः, ओदनपाणिनीयाः, घृतरौढीयाः' इत्याद्युदाहरणात् चारायणसम्प्रदायस्य उल्लेखः प्राप्यते। "पुरुकृते च्छच्छ्रयोः" इति चारायणसूत्रमपि उद्ध्रियते। पुरुशब्दस्य छेपरे कृतशब्दस्य च्छ्रेपरे अन्त्यस्य लोपो भवति। तेन पुरुच्छदनम् 'पुच्छम्' कृतस्य छदनं विनाशनम् - 'कृच्छ्रम्' इति सिद्ध्यति। एतेन चारायणसम्प्रदायोऽपि पुरा आसीत् इति प्रतीयते।

१०. काशकृत्स्न-सम्प्रदायः

काशकृत्स्नेन प्रोक्तं काशकृत्स्नं व्याकरणम्। काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणीत्यादि महाभाष्य[४]प्रयोगात् काशकृत्स्न-सम्प्रदायः प्रवर्तमान आसीत्।

११. शन्तनु-सम्प्रदायः

शन्तनुः फिट्सूत्रप्रवक्ता आसीत्। तस्यापि एकः व्याकरण-सम्प्रदायः आसीत्। तस्य सूत्राणि शान्तनवसूत्राण्युच्यन्ते।

---

१. अव्ययादाप्सुपः २।४।८२ इति सूत्रे श्लोकवार्त्तिकम्।

२. ङ्णोः कुक् टुक् शरि - ८।३।२८ इति सूत्रे वार्त्तिकम्।

३. १।१।७३ इति सूत्रस्य महाभाष्ये।

४. ४।१।६३ इति सूत्रमहाभाष्ये।

१२. वैयाघ्रपद-सम्प्रदायः

'दशकाः वैयाघ्रपदीयाः' इत्युल्लेखात् एतद्व्याकरणम् दशाध्यायात्मकमासीत्।

१३. माध्यन्दिनि-सम्प्रदायः

काशिकानुसारेण[१] उशनसः सम्बोधने माध्यन्दिनिमते त्रीणि रूपाणि भवन्ति - हे उशनः, हे उशनन्, हे उशन। तथा – 'इकः षण्ढेऽपि सम्बुद्धौ गुणो मान्ध्यन्दिनेर्मते'' इति निर्देशेन एतत् सम्प्रदायस्य अस्तित्वमवगम्यते। ''अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः''[२] इति वार्त्तिकम् माध्यन्दिनि - व्याकरणमनुसरतीति संभाव्यते।

१४. रौढि-सम्प्रदायः

''वृद्धिर्यस्याचामादिस्तद्वृद्धम्''[३] इति सूत्रे महाभाष्ये 'घृतरौढीयाः' इति प्रयोगः प्राप्यते। घृतप्रधानो रौढिः – घृतरौढिः, तस्य छात्राः घृतरौढीयाः इति काशिका व्याचष्टे। ''सिद्धं तु रौढादिषूपसंख्यानात्''[४] इति भाष्यवार्त्तिके रौढिसम्प्रदायस्य उल्लेखो विद्यते।

१५. शौनकि-सम्प्रदायः

''करोतेरपि कर्तृत्वे दीर्घत्वं शास्ति शौनकिः''[५] तेन करोतेः कर्तरि ल्युटि दीर्घे 'कारण' इति सिद्ध्यति। ''धाञ्कृञोस्तनुनह्योश्च बहुलत्वेन शौनकिः''[६] इत्याद्युल्लेखात् शौनकि-सम्प्रदायस्य बोधो भवति।

१६. गौतम-सम्प्रदायः

''आचार्योपसर्जनश्चान्तेवासी''[७]ति सूत्रमहाभाष्ये 'आपिशल-पाणिनीय-व्याडीय-गौतमीयाः' इति प्रतिपादनात् ''प्रथमपूर्वो हकारश्चतुर्थः तस्य संस्थानं प्लाक्षि-कौण्डिन्य-गौतम-पौष्करसादीनाम्'' इति तैत्तिरीयप्रातिशाख्यवचनात् गौतम-सम्प्रदायस्य सत्ता प्रतीयते।

---

१. ऋदुशनसपुरुदंसोऽनेहसां च- ७।१।९४ इति सूत्रे काशिका।
२. तत्रैव सूत्रे वार्त्तिकम्।
३. १।१।७३ इति सूत्रे भाष्यम्।
४. गोत्रावयवात् - ४।१।७९ इति सूत्रे महाभाष्ये।
५. चरकटीकायां जज्झटः।
६. भट्टिकाव्ये जयमङ्गलाचार्यः।
७. आचार्योपसर्जनान्तेवासी ६।२।३६। इति सूत्रभाष्ये।

१७. व्याडि-सम्प्रदायः

'संग्रह'[१]ग्रन्थस्य कर्ता पाणिनेः सम्बन्धि[२]त्वेन प्रसिद्धः दाक्षायणो व्याडिः वैयाकरण आसीदिति ज्ञायते व्याकरण-कोविदैः।

"इकां यण्भिर्व्यवधानं व्याडि-गालवयोरिति वक्तव्यम्"[३] इति वचनेन व्याडिसम्प्रदायः प्रमाणीक्रियते।

उपर्युक्ता एते सप्तदशाचार्या अष्टाध्याय्यामनुल्लिखिताः सन्ति। पाणिन्यष्टके समुल्लिखिता निम्नोक्ता आचार्याः प्रसिद्धा एव – १. आपिशलिः[४], २. काश्यपः[५] ३. गार्ग्यः[६], ४. गालवः[७], ५. चाक्रवर्मणः[८], ६. भारद्वाजः[९] ७. शाकटायनः[१०], ८. शाकल्यः[११] ९. सेनकः[१२], १०. स्फोटायनः[१३]।

१८. महर्षिपाणिनेः अष्टाध्यायीरूपं विश्वविश्रुतं व्याकरणं लौकिक-वैदिकशब्दानां समेषामनुशासने सर्वातिशायि। पाणिनेरुत्तरकालीनैर्वैयाकरणैर्विरचितानि प्रसिद्धा-प्रसिद्धानि कतिपयव्याकरणानि एवंविधानि सन्ति--

१. कातन्त्रविरचितम् - कातन्त्रव्याकरणम्

२. चन्द्रगोमिनः - चान्द्रव्याकरणम्

३. क्षपणकस्य - क्षपणकव्याकरणम्

४. देवनन्दिनः - जैनेन्द्रव्याकरणम्

५. वामनस्य - विश्रान्तविद्याधर-व्याकरणम्

---

१. उभयप्राप्तौ कर्मणि- २,३,६६ इति सूत्रभाष्ये - शोभना खलु दाक्षायणस्य "संग्रहस्य" कृतिः।
२. दक्षस्य पुत्रो दाक्षिः तस्य पुत्रो दाक्षायणो व्याडिः। दक्षस्य पुत्री दाक्षी तस्याः पुत्रो दाक्षेयः पाणिनिः। एतेन व्याडेः पाणिनिः पैतृष्वस्रेय आसीत्।
३. शेश्छन्दसि बहुलम् ६।१।७० इति सूत्रपरिभाषावृत्तौ पुरुषोत्तमदेवः।
४. वा सुप्यापिशलेः ६।१।९२
५. तृषिमृषिकृषेः काश्यपस्य - १।२।२५।
६. ओतो गार्ग्यस्य ८।३।२०।
७. अड् गार्ग्यगालवयोः ७।३।९९।
८. ई चाक्रवर्मणस्य ६।१।१३०।
९. ऋतो भारद्वाजस्य ७।२।६७।
१०. लङः शाकटायनस्यैव ३।४।१११।
११. लोपः शाकल्यस्य ८।३।१९
१२. गिरेश्च सेनकस्य ५।४।११२
१३. अवङ् स्फोटायनस्य ६।१।१२३

६. अकलङ्कस्य - जैनशाकटायनम्

७. पाल्यकीर्तेः - पाल्यकीर्तिव्याकरणम्

८. शिवस्वामिनः - शिवस्वामिव्याकरणम्

६. भोजदेवस्य - सरस्वतीकण्ठाभरणम्

१०. बुद्धिसागरस्य - बुद्धिसागर-व्याकरणम्

११. हेमचन्द्रस्य - हैमव्याकरणम्

१२. भद्रेश्वरसूरेः - क्षपणकव्याकरणम्

१३. अनुभूतिस्वरूपस्य - सारस्वतव्याकरणम्

१४. वोपदेवस्य - मुग्धबोधव्याकरणम्

१५. क्रमदीश्वरस्य - जौमरव्याकरणम्

१६. पद्मनाभमिश्रस्य - सुपद्मव्याकरणम्

१७. रूपगोस्वामिनः - हरिनामामृत-व्याकरणम्

१८. बलरामपञ्चाननस्य - प्रबोधप्रकाशव्याकरणम्

एतद्भिन्नान्यपि कतिपयानि निम्नस्तराणि व्याकरणानि सन्ति--

१. विज्ञलभूपतेः - प्रबोधचन्द्रिका

२. विनयसुन्दरस्य - भोजव्याकरणम्

३. विनायकस्य - भावसिंहप्रक्रिया

४. चिद्रूपाश्रमस्य - दीपव्याकरणम्

५. नारायणसुरनन्दस्य - कारिकावली

६. नरहरेः - बालबोधव्याकरणम्

७. शुभचन्द्रस्य - चिन्तामणिव्याकरणम्

८. भरतसेनस्य - द्रुतबोधव्याकरणम्

६. रामकिंकरस्य - आशुबोधव्याकरणम्

१०. रामेश्वरस्य - शुद्धाशुबोधव्याकरणम्

११. शिबप्रसादस्य - व्याकरणम्

१२. काशीश्वरस्य - ज्ञानामृतव्याकरणम्

एतेषु अष्टानामेव शाब्दिकानां तेषां व्याकरणानाञ्च प्रसिद्धिर्वर्ततेतराम्-

उक्तञ्च –

ब्राह्ममैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टकम्।।
इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः।।

एतेषु पाणिनीयव्याकरणमेव विश्वस्मिन् प्रामुख्यं भजते, यस्मिन् माहेश्वरसूत्रसहितानि ३९९५ सूत्राणि सन्ति। एनेनैव व्याकरणेन वैदिका लौकिकाश्च सर्वे शब्दा व्युत्पाद्यन्ते। अत इदानीम् अस्यैव अध्ययनाध्यापनयोः सर्वत्र प्रचलनं विद्यते।

इदमत्रावधेयम्--

महाभाष्यकार-महर्षिपतञ्जलिना निर्दिष्टस्य ''यो हि उत्सूत्रं कथयेन्नादो गृह्येते'' ति प्रभुसम्मितबाक्यस्यानुसारेण व्याकरणान्तरेणापाततः शुद्धोऽपि पाणिनीयव्याकरणानुसारम् उत्सूत्रप्रयोगः नैव ग्राह्यो भवेत्। अत एव महर्षिणा अनेकत्र ''अपाणिनीयन्तु भवति'' इत्युक्त्वा तादृशप्रयोगस्य परित्यागो विधेय इति प्रतिपादितम्।

वैयाकरणप्रवरेण नागेशभट्टेन ''कृवापाजिमिस्वदिसाध्यशूभ्य उण्'' इत्यस्य व्याख्याने पतञ्जलिनिर्दिष्टमार्गानुसारेण स्पष्टं प्रतिपादितम्--

''पाणिनि-शास्त्रबोधितानामेवेदानीं साधुत्वम्'' इति। अतः पाणिनिसम्प्रदायस्य महत्त्वं गौरबं वैशिष्ट्यञ्च सर्वथा निर्विवादमिति शम्।

उणादिशब्दानामव्युत्पन्नत्वम्–एकं विवेचनम्

शब्दाः संज्ञा-प्रमाणेन अर्थान् बोधयन्ति, योग-प्रमाणेन वा अर्थान् निरूपयन्तीति विषयमवलम्ब्य आदि-कालादेव आचार्या भिन्नमता दृश्यन्ते। आचार्यपाणिनेः पूर्वस्मिन् समये महर्षियास्कस्य काले एव एतद्विषये सिद्धान्तद्वयं प्रचलितमासीत्। महर्षिशाकटायनः "सर्वाणि नामानि आख्यातजानी"ति[1] स्वीकुर्वाणः सर्वेषां नाम्नां धातु-प्रत्यय-मूलक- निष्पत्तिमङ्गीचकार। महर्षिगार्ग्यस्तु एतन्मतविपरीतम् "न सर्वाणि नामानि[2]धातुजानी"ति मन्यमानः स्वमतं स्थापयाञ्चकार।

नामानि आख्यातजानीत्येवं दृढ़प्रतिज्ञया आचार्यशाकटायनः सत्यशब्दं धातुद्वयेन निर्ब्रुवाण इण्धातोः णिजन्तरूपात् 'आययतेः' अन्त्यार्धम् यकारम्, अस्धातोः शत्रन्तात् पूर्वार्द्धम् 'सदि'त्यादाय इत्यनयोः (सत् + य इति संयोगेन 'सन्तमर्थमाययती'ति) सत्यं व्युत्पादयति।[3]

महर्षिपाणिनिस्तु "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[4] इत्यनेन अव्युत्पन्नस्य अर्थवच्छब्दस्य तथा "कृत्तद्धितसमासाश्चे"[5]ति व्युत्पन्नस्य च शब्दस्य प्रातिपादिकसंज्ञां विदधत् महर्षिगार्ग्यमतमनुसरति। अतः शाकटायनस्य निरुक्तकारस्य च मते सर्वे शब्दा धातुजा व्युत्पन्नाः। अर्थात् धातु-प्रत्यय-संयोगात् निष्पन्नाः। गार्ग्यस्य वैयाकरण-शिरोमणेः पाणिनेश्च मते सर्वे शब्दा न व्युत्पन्नाः।

येषु धातु-प्रत्यय-योगस्य स्पष्टं प्रतीतिर्भवति त एव शब्दा व्युत्पन्ना अन्ये च रूढ़-संज्ञा-शब्दा अव्युत्पन्नाः। अत एव "उणादयो बहुलम्" इति सूत्रभाष्ये महर्षिपतञ्जलिना "बहुलग्रहणं किमर्थमि"त्येवमाक्षिपता निम्नलिखितेषु सप्तसु वार्त्तिकेषु उणादिसूत्राणामपाणिनीयत्वं प्रतिपादयता तेषां शाकटायनकर्तृत्वञ्च निरूपयता बहुलग्रहणेनैव सर्वं समाहितम्।

तथाहि–

१. 'बाहुलकं प्रकृतेस्तनुदृष्टेः'।[6]

---

१. निरुक्ते प्रथमाध्याय चतुर्थपादे।

२. तत्रैव।

३. एतेः कारितं च यकारादिं चान्तकरणमस्तेः शुद्धं च सकारादिं च। तत्रैव।

४. पाणिनिसूत्रम् १।२।४५।

५. तत्रैव १।२।४६

६. पा० सू० ३।३।१।

२. प्रायसमुच्चयनादपि तेषाम्।

३. कार्यसशेषविधेश्च तदुक्तम्।

४. नैगमरूढिभवं हि सुसाधु।

५. नाम च धातुजमाह निरुक्ते।

६. व्याकरणे शकटस्य च तोकम्।

७. यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्।।

अयमाशयः उणादिप्रकरणे अल्पाभ्य एव प्रकृतिभ्यः उणादिप्रत्यया विहि सन्ति न तु सर्वाभ्यः प्रकृतिभ्यः। एवं स्थितौ अनुक्ताभ्योऽपि प्रकृतिभ्य उणा भवन्ति। यथा "हृषे रुलच्"[1] इति विहित उलच् प्रत्ययः शकेरपि शङ्कु शब्द-निष्पत्यर्थं भवति।

एवमेव उणादिप्रत्ययानां प्रायेणैव समुच्चयनं भवति। अर्थात् या उणादिप्रत्ययाः सन्ति ते सर्वे न साकल्येन उणादिसूत्रैर्विहिताः। अविहिता अ प्रत्ययाः उणादित्वेन संगृहीता भवन्त्येव। यथा 'ऋ गतौ' इत्यस्मात् उणादिसूत्रैरविहि फिडफिड्डौ प्रत्ययौ ऋफिडऋफिड्डादि शब्द-सिद्ध्यर्थं भवतः।

एवमेव उणादिप्रकरणे सशेषाण्येव कार्याणि विहितानि न तु निःशेषाणि। अविहितान्यपि कार्याणि भवन्ति। यथा षहेः षकारस्य "धात्वादेः षः[2] सः" सत्त्वाभावो भवति।

यतो हि नैगमाः रूढिभवाश्च संज्ञाशब्दाः सर्वे सुसाधव एव सन्ति। त साधुत्वं तु पाणिनेरपि सम्मतम्। एवं हि नैगमरूढिभवानां शब्दानाम् उणादिप्रक्रि साधुत्वाभावेऽपि तेषां साधुत्वं बाहुलकादेव सिद्ध्यति। अतः "उणादयो बहुल इत्येकमेव सूत्रं विधाय महर्षि-पाणिनिः उणादिप्रक्रियायां स्वकीयामस्वीकृतिं दर्शयामा नैरुक्ता वैयाकरणशाकटायनश्च केवलं नामानि धातुजानीति स्वीकुर्वते इति उपर्यु पञ्चम-षष्ठ-वार्त्तिकाभ्यां प्रतिपाद्यते। इदमत्रावधेयम्--

महर्षिशाकटायनस्य उणादिप्रकरणम् पञ्चपादात्मकं विद्यते। अ पञ्चपादीत्युच्यते। अत्र ७४८ सूत्राणि सन्ति, यैः (३२५) पादोत्तरशतत्रयप्रत् विधीयन्ते। एभिश्च सूत्रैः समेषां नैगमरूढिभवानां शब्दानां साधुत्वं नैव निष्पद्य

---

१. उणादि सूत्र संख्या ६६।
२. पा० सू० ६।१।६४।

अतः समेषां साधुत्वाय बाहुलकन्तु शरणीकरणीयमेव। अतः "यत्र विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्'[1] इति वार्त्तिकमवतारयता भाष्यकृता प्रकृतविषयमुपसंहरता उणादिशास्त्रीय-विधिप्रक्रिया-जातं प्रदर्शयाञ्चक्रे--

"संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु।।" इति

"उणादयो बहुलम्" इति सूत्रे शेखराख्ये व्याख्याने वैयाकरणवरेण नागेशभट्टेन महाभाष्यानुसारेण प्रतिपाद्यते--

"प्रायः उणादिसूत्रप्रत्ययान्ता रूढिशब्दा अवयवार्थशून्या असन्तमप्यवयवार्थमाश्रित्य व्युत्पाद्यन्ते। तत्रापि प्रायः कर्तरि। बाहुलकादन्यत्रापि। अनेन (उपर्युक्त) भाष्यवार्त्तिकसमूहेन "उणादयो बहुलम्" इति व्याकरणान्तर-व्यवस्थापकमिति स्पष्टमेवोक्तम्। उणाद्यन्ता ये शास्त्रान्तरे व्युत्पादिताः शब्दास्तत्र बहुलमिति वक्तव्यम्, वर्तमानाधिकारे ते वक्तव्याः, भूतेऽपीति वक्तव्यमिति सूत्रार्थश्च सूचितः। स्वशास्त्रे तेषां साधुत्वबोधनं चैतावतैव कृतम्। पाणिनेस्तु तेष्वव्युत्पत्तिपक्ष एवाभिमतः। तदुक्तम्- "आयनेयी"[2]ति सूत्रभाष्ये – "प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धमिति। तत्र 'पाणिने'रित्युक्त्वा तस्य अव्युत्पन्नानि उणादयः प्रातिपदिकानीति सूचितम्" इति।

एवं हि उणादिप्रक्रियाया अपाणिनीयत्वेऽपि उणादि-प्रत्यय-निष्पन्नानां शब्दानां साधुत्वन्तु पाणिनि – नयेऽपि "उणादयो बहुलम्" इति सूत्रानुसारेण असन्दिग्धमेव। तेन "पाणिनिशास्त्र-बोधितानामेवेदानीं साधुत्वम्" इति सिद्धान्तेऽपि तेषामुणादिनिष्पन्नानां साधुत्वे न कापि विचिकित्सा।

महर्षिशाकटायनो वैयाकरणः सन्नपि नैरुक्तो वर्तते। नैरुक्तः अर्थप्रधानो भूत्वा शब्दं निर्ब्रूते। नाम च धातुजमेव मनुते। अतश्च उणादिप्रकरणस्य गौरवं न प्रहीयते, अपि तु पदार्थज्ञाने परमोपकारकतया नितरां महीयते इति शम्।

---

१. महाभाष्ये तृतीयाध्याय तृतीयपाद - प्रथमाह्निके।
२. पा० सू० ७।१।२।

महर्षि - पाणिनेर्व्यावहारिकदृष्टिः

शब्द-ब्रह्म-निष्णातेन महर्षि-पाणिनिना व्याकरण-सिद्धान्त-विषयक-विभिन्न मत-भेदेषु व्यावहारिक-मध्यम-मार्गानुसारि-समन्वयात्मक-सन्तुलित-स्वसिद्धान्तः यथासम्भ व्यवस्थापयाञ्चक्रे। अधस्तनानि कतिपयान्येवोदाहरणानि विषयस्यास्य याथा निरूपयिष्यन्ति।

(१) नाम्नामाख्यातजत्वानाख्यातजत्व-विचारे समन्वयात्मकदृष्टिः

"सर्वाणि नामानि आख्यातजानि"[१] इति शाकटायनस्य नैरुक्तानाञ्च राद्धान्त आसीत्। "न सर्वाणि प्रातिपदिकानि धातुजानी"ति[२] गार्ग्यस्य अन्येषाञ्च केषाञ्चिद्वैयाकरणानां सिद्धान्त आसीत्। अत एव स्वमत-स्थापनाग्रहेण शाकटायनेन सत्य-शब्दस्य निर्वचनं कुर्वाणेन इण् धातोर्णिजन्तरूपस्य 'आययती'त्यस्य यकारो अस्धातोः शत्रन्तं सदिति संयोज्य सत्यस्य व्युत्पत्तिः प्रदर्शिता।[३] एतन्मत-विपरीत-मतिना पाणिनिना "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[४] "कृत्तद्धितसमासाश्चे"ति[५] सूत्रद्वयं विदधता घटपटाद्यव्युत्पन्नानाम् पाचक-दाशरथि-पीताम्बरादि-कृत्तद्धित-समासान्तानाञ्च प्रातिपदिकत्वं स्वीकुर्वता मध्यम-व्यावहारिकमार्गानुसरणं कृतम्। उणादि-प्रत्ययानाञ्च कृत् "उणादयो बहुलम्"[६] इति सूत्रेण बाहुलकात् तेषां विधानं प्रदर्श्य कृत्-प्रत्यय-कोटौ केषाञ्चिदेव "तितुत्रतथसिसुसरकसेषु च"[७] इत्येतदिण्निषेधकसूत्रे निर्दिष्टानां प्रत्ययानां स्वीकरणात् अन्येषामुणादिप्रत्ययानां प्रत्ययत्वास्वीकरणमेव कृतम्। अत एव 'उणादयोऽव्युत्पन्नानि प्रातिपदिकानि' इति "आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्"[८] इति सूत्रस्य वार्त्तिक-भाष्यम् पाणिनि-सिद्धान्तानुसारि संगच्छते। अत एव "शमेर्ढः"[९] शण्ढः इत्यादौ ढस्य एयादेशो न भवति।

---

१. निरुक्ते १, ४, १२।

२. तत्रैव १, ४, १२।

३. एते कारितं च यकारादिं चान्तकरणमस्तेः शुद्धं च सकारादिं च। तत्रैव १, ४, १३।

४. पा० सू० १।२।४५।

५. पा० सू० १।२।४६।

६. पा० सू० ३।३।१।

७. पा० सू० ७।२।९।

८. पा० सू० ७।१।२।

९. उणादि सूत्रम् ९९।

(२) शब्दार्थ-प्रतीतौ योग-प्रमाणे संज्ञा-प्रमाणे च तुल्यदृष्टिः

शब्दः स्वकीयव्युत्पत्तिमूलकमेवार्थं लोके बोधयतीति योगप्रमाणवादिनः प्रत्यपादयन्। अध्वानमश्नुते इति हेतोरेव अश्वशब्दः घोटकरूप-जीव-विशेषं बोधयति। अतश्च कारणात् 'द्रव्ये शब्दनिवेशः' इति। एवं हि योगार्थमेव शब्दः प्रतिपादयतीति योगप्रमाणवादिनां पक्षः।

यदि च नामशब्दः योगार्थस्यैव वाचकस्तर्हि अध्वनोऽशनाद्-व्यापनात् उष्ट्रोऽपि अश्ववचनीयः स्यादित्याक्षिप्य संज्ञाप्रमाणेन--रूढ्या-लोकव्यवहारेणेति यावत् अश्वादि-शब्दानामर्थ-विशेषे प्रयोगात् अश्वशब्दात् उष्ट्रादेर्बोधो न भवतीति संज्ञाप्रमाणवादिनां पक्षः।

अमुमेव सिद्धान्तं प्रकारान्तरेण प्रतिपादयता महर्षिपाणिनिना ''लुपि युक्तवद् व्यक्ति- वचने''[१] इत्युपक्रम्य--''तदशिष्यं संज्ञाप्रमाणत्वात्''[२] ''लुब्योगाप्रख्यानात्''[३] ''योगप्रमाणे च तदभावेऽदर्शनं स्यात्''[४] ''प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्''[५] ''कालोपसर्जने च तुल्यम्''[६] इत्यादीनि सूत्राणि विरचयाञ्चक्रिरे।

अयमाशयः पञ्चालानां निवासो जनपदः 'पञ्चालाः' इत्यादिषु ''तस्य निवासः''[७] इति विहितस्य अणः ''जनपदे लुप्''[८] इति लुपि सति ''लुपि युक्तवद्व्यक्तिवचने'' इति प्रकृतिवद् बहुवचनविधानात् 'पञ्चालाः' इति बहुवचनान्तं रूपं सिध्यति। अन्यथा योगार्थस्य - अवयवार्थस्य-प्रत्ययार्थस्य--बोधादेकत्वं प्रसज्येत इति पूर्वाचार्यमतं - समुपस्थाप्य--तद्-युक्तवद्वचनम् अशिष्यम् = न कर्तव्यम्, संज्ञाप्रमाणत्वात् = संज्ञानाम्= लोकव्यवहाराणाम्-प्रामाण्यादेव 'पञ्चालाः' इत्यादि बहुवचनान्तं रूपं सेत्स्यति। न केवलम् युक्तवद्व्यक्तिवचन-विधानमनर्थकम् 'कटुबदर्या अदूरभवो जनपदः कटुबदरी' त्यादि-सिद्ध्यर्थं लुबपि न विधेयः। योगस्य अवयवार्थस्य 'पञ्चाला' इत्यादौ अप्रख्यानात्-अप्रतीतेः लुपोऽपि विधानं व्यर्थमेवेति।

यदि नाम योगप्रमाणे--पञ्चालक्षत्रिय-सम्बन्धे-सत्येव 'पञ्चालाः' इत्यादिप्रयोगः स्वीक्रियेत तर्हि तदभावे--क्षत्रियसम्बन्धाभावे- पञ्चालादीनां जनपदे प्रयोगो न स्यात्। एवमेव 'प्रत्ययार्थः प्रधानम्' इत्येवं रूपं प्राचीनाचार्यपरिभाषितवचनमपि अशिष्यम्,

---

१. पा० सू० १।२।५१।
२. पा० सू० १।२।५३।
३. पा० सू० १।२।५४।
४. पा० सू० १।२।५५।
५. पा० सू० १।२।५६।
६. पा० सू० १।२।५७।
७. पा० सू० ४।२।६९।
८. पा० सू० ४।२।८१।

अर्थस्य लोकत एव सिद्धेः। एवमेव काल-विषये उपसर्जन-विषये च पूर्वाचार्याणां विशेषवचनं निरर्थकमेव तत्रापि लोकव्यवहारादेव सिद्धेः। अतः पाचक-हारकादौ योगप्रमाणादर्थावगतिरिव अङ्गबङ्ग-पञ्चालादिषु संज्ञाप्रमाणादर्थबोध इति सर्वं समञ्जसम्।

(३) जाति-व्यक्ति-शक्ति-विषयेऽपि उभयत्र शक्तिरिति समन्वयदृष्टिः

घट-पटादि-शब्दानां घटत्वपटत्वादिजातावेव शक्तिरिति वाजप्यायनमतम्। अर्थ-क्रियाकारितया लिङ्गवचनादिसम्बन्धितया च घट-पटादिव्यक्तावेव शक्तिरिति व्याडि-मतम्। 'सरूपाणामेकशेष एकविभक्तौ''[1] इति सूत्रभाष्ये पतञ्जलिना पक्षयोरुभयोर्गुणदोषौ प्रदर्शयता,–"किं पुनराकृतिः पदार्थः आहोस्वित् द्रव्यम्। उभयमित्याह। कथं ज्ञायते। उभयथा ह्याचार्येण सूत्राणि पठितानि। आकृतिं पदार्थं मत्वा–"जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्"[2] इत्युच्यते। द्रव्यं पदार्थं मत्वा "स्वरूपाणामेकशेष एकविभक्तौ[3] इत्यारभ्यते" इत्युक्तम्। एवञ्च पाणिनिना जातौ व्यक्तौ चेत्युभयत्र पदार्थत्वमङ्गीकृत्य ऋजुर्व्यावहारिकः मध्यमः पन्था अनुसृतः।

(४) उपसर्गाणां वाचकत्व-द्योतकत्व-विषये समन्वयात्मिका दृष्टिः

प्रादीनामुपसर्गाणां वाचकत्वं द्योतकत्वं वेति प्राचीनमते उपस्थापयता महर्षियास्केन "न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायन" इति प्रतिपादितम्। एवञ्च नामाख्यात-मध्यात् पृथग्भूतानां केवलानामुपसर्गाणां शाकटायनमते निरर्थकत्वम् नामाख्यातयोस्तु कर्मोपसंयोगद्योतकत्वम्[4]।

उच्चावचाः पदार्था भवन्तीति गार्ग्यः इति गार्ग्यमतं प्रदर्शयता यास्केन नामाख्याताभ्यां वियुक्तानामपि उपसर्गपदानां विविधा अर्थाः गार्ग्यमते भवन्तीति "तद् य एषु पदार्थः प्राहुरिमे तम्"[5] इत्यनेन सूचितम्। एवञ्च उपसर्गाणां निरर्थकत्वमेव सार्थकत्वमेव वेति परस्पर-विरोधि-विचार-पक्षद्वये उभयोः सामञ्जस्यं प्रदर्शयता महर्षि-पाणिनिना "अधिपरी अनर्थकौ"[6] इत्येवं सूत्रयता अनर्थकयोरधिपर्योः

---

१. पा० सू० १।२।६४।
२. पा० सू० १।२।५८।
३. सरूपाणामिति सूत्रस्थं महाभाष्यम्।
४. निरुक्ते १।१।३।
५. तत्रैव १।१।३।
६. पा० सू० १।४।९३।

गत्युपसर्गसंज्ञा-बाधिकां कर्मप्रवचनीयसंज्ञां विधाय अन्येषां सार्थकत्वं सूचितम्। "सुप् प्रतिना मात्रार्थे"[१] इत्यादौ तु प्रत्यादेः सार्थकत्वं सुस्पष्टमेव।

(५) व्यक्तध्वनिमूलकानुकरणादिव अव्यक्तध्वनिमूलकानुकरणादपि शब्दनिष्पत्तिरिति व्यावहारिकदृष्टिः

"काक इति शब्दानुकृतिः। तदिदं शकुनिषु बहुलम्"[२] इत्येवं प्रतिपादयता यास्केन अव्यक्तध्वनिमूलकानुकरणादपि शब्दनिष्पत्तिर्भवतीति स्वमतं संस्थापयाञ्चक्रे। एतद्विपरीतं स्वमतं प्रतिपादयता आचार्यौपमन्यवेन "न शब्दानुकृतिर्विद्यते" इत्युद्घोषितम्। अर्थात् शकुनिष्वपि न शब्दानुकृतिहेतुकं नाम विद्यते, नामानुगुणक्रियाया बहुषु असंभवात्, नानाक्रियावशात् नानानामधेयप्रतिलम्भापत्तेश्च। अतो हि औपमन्यवाचार्यः अव्यक्तशब्दानुकृतिहेतुकं नाम भवतीति पक्षं नानुमनुते।

महर्षिपाणिनिस्तु "अव्यक्तानुकरणाद् द्व्यजवरार्द्धादनितौ डाच्"[३] इत्यत्र अव्यक्तानुकरणादपि शब्दाद् डाचं विधाय अव्यक्त-ध्वनिमूलकानुकरणादपि नाम्नो निष्पत्तिर्भवतीति स्वीचकार।

(६) धातूनां क्रियावचनत्वे भाववचनत्वे च समन्वयदृष्टिः

"क्रियावचनो धातुः"[४] इति पक्षे धातूनां क्रियावचनत्वम् अर्थात् सपरिस्पन्द-साधन-साध्यत्वम्। एवञ्च किं करोति ? पठति, इति यत्र करोतिना सह सामानाधिकरण्यं नास्ति तत्र अस्ति, विद्यते इत्यादौ धातुत्वं न स्यात्।

यदि च "भाववचनो धातुः"[५] इति पक्षं स्वीकृत्य धातूनां भाववचनत्वम् अर्थात् सपरिस्पन्दापरिस्पन्दान्यतर-साधन-साध्यत्वम्[६] इत्यङ्गीक्रियेत तर्हि भवनं भाव इत्यर्थत्वात् भाव-विरोधिव्यापारे विनाशादौ 'भिनत्ति, छिनत्ति' इत्यादौ धातुत्वं न स्यात्। एवञ्चैकतरपक्षाश्रये असामञ्जस्यमवलोक्य महर्षि-पाणिनिना धातूनां क्रियावचनत्वं भाववचनत्वं च अङ्गीकुर्वता "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[७] तथा "तुमर्थाच्च भाववचनात्"[८] इति सूत्रद्वयं विरचयाञ्चक्रे।

---

१. पा० सू० २।१।६।
२. निरुक्ते ३।४।१८।
३. पा० सू० ५।४।५७।
४. "भूवादयो धातवः" पा० सू० १।३।१ सूत्रस्य भाष्ये वार्त्तिकम्।
५. तत्रैव।
६. तत्रैव महाभाष्ये उद्योतः।
७. पा० सू० २।३।१४।
८. पा० सू० २।३।१५।

(७) शब्दनित्यत्वानित्यत्ववादे समन्वयदृष्टिः

"इन्द्रियनित्यं वचनमित्यौदुम्बरायणः"[१] अर्थात् यावदेव शब्दः वागिन्द्रिये वर्तते तावदेव तस्यास्तित्वम्। उच्चारणानन्तरं शब्दस्य विनाशात् शब्दोऽनित्य इति शब्दानित्यत्वप्रतिपादकम् औदुम्बरायणमतं यास्काचार्येण निरुक्ते समुपस्थापयाञ्चक्रे। शब्दानित्यत्वे च उपसर्गस्य धातुना, धातोः प्रत्ययेन, प्रत्ययस्य च लोपागमवर्णविकारैः योगः सम्बन्धो नोपपद्यते, विनष्टाविनष्टयोर्युगपत् सम्बन्धभावात् इति दोषं समुद्भाव्य "व्याप्तिमत्त्वात्तु शब्दस्य"[२] इति शब्दनित्यत्ववादिनां मतं प्रतिपादितम्।

"प्राग्वहतेष्ठक्"[३] इति सूत्रे वार्त्तिकभाष्ये नैत्यशाब्दिकानां कार्यशाब्दिकानां च सम्प्रदाय-द्वयस्य समुल्लेखात्, व्याडिकृते 'संग्रह'[४]ग्रन्थेऽपि शब्दस्य नित्यत्व-कार्यत्वयोः साधु परीक्षणात् महर्षिपाणिनेः प्रागेव शब्द-नित्यत्वानित्यत्व-विषयक-विवाद आसीदिति विज्ञायते।

महर्षिपाणिनि-नये च परमार्थतः शब्दनित्यत्वमेव। "अदर्शनं लोपः"[५] इत्यत्र च लोपो न विनाशः, अपि तु अश्रवणम्। दृशेः ज्ञान-सामान्यवचनत्वात् दर्शनम्--ज्ञानम्, तच्च शब्दानुशासनप्रस्तावात् शब्दविषयकं सच्छ्रवणम्, तच्च श्रोतुर्व्यापारः, श्रोतृ-व्यापारनिषेधश्च अश्रवणम् इति फलितार्थः।

न चैवम् "लोपोव्योर्वलि"[६] इत्यादौ वकारयकारयोरश्रवण-विधानेन श्रोतृ-व्यापारस्यैव निषेधात् प्रयोक्तृ-व्यापारस्योच्चारणस्य अनिषेधात् वकार-यकारयोर्लोप-प्रयास एव निष्फल इति वाच्यम्, असति श्रवणे उच्चारणस्यैव अनर्थकतया सामर्थ्यात् श्रवण-निषेधे तद्धेतु-भूतस्योच्चारणस्यैव निषेधात्।

एवञ्चैवं पारमार्थिकदृष्ट्या शब्द-नित्यत्व-सिद्धान्तं स्वीकुर्वाणेनापि महर्षिपाणिनिना व्यावहारिकप्रक्रिया-दशायाम् लोपागम-वर्ण-विकारा अपि विधीयन्ते।

एवं हि उपर्युक्तानां विवाद-ग्रस्तानां कतिपयानां विषयाणां पर्यालोचनेन महर्षि-पाणिनेः समन्वयात्मक-व्यावहारिक-मध्यममार्गः दुराग्रहरहितः सर्वत्र सुस्पष्टमवलोक्यते इतिशम्।

---

१. निरुक्ते १, १, १।

२. निरुक्ते १, १, २।

३. पा० सू० ४।४।१।

४. "किं पुनर्नित्यः शब्दः आहोस्वित् कार्यः ? 'संग्रह' एतत् प्राधान्येन परीक्षितम् नित्यो वा स्यात् कार्यो वेति" महाभाष्ये पस्पशाह्निके।

५. पा० सू० १, १, ६०।

६. पा० सू० ६।१।६६।

महर्षि - पाणिनेरुत्सूत्र - प्रयोगाः

महर्षि-पाणिनेः सूत्रनिचयमभिलक्ष्यैव प्रायेण आचार्यैः

"अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।

अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।"

इति श्लोको लक्षयाञ्चक्रे। यद्यपि अष्टाध्याय्यां समुल्लिखितानाम् आपिशलि[१]- काश्यप[२] गार्ग्य[३]- गालव-चाक्रवर्मण[४]- भारद्वाज[५]- 'शाकटायन[६]'- शाकल्य[७]- 'सेनक[८]'- स्फोटायनानां[९] दशानामाचार्याणामपि व्याकरणसूत्राणि अधुना अनुपलभ्यमानान्यपि पाणिनेः पूर्वं भवितुमर्हन्तिस्म। महर्षिगोतमस्य[१०] न्यायसूत्राण्यपि ततः पूर्वं कदाचिदासन्नेव, तथापि उपर्युक्तं सूत्रलक्षणं यथा सर्वतोभावेन महर्षिपाणिनेः सूत्रेषु घटते न तथान्यत्र। एवञ्च क्वापि असन्देहार्थं, क्वापि प्रयोजनान्तरसिद्ध्यर्थं, क्वापि अस्मदज्ञातफलप्राप्त्यर्थं, क्वापि तदानीन्तनायां भाषायां स्वनियमप्रतिकूलस्यापि शिष्टैर्व्यवहृतस्य प्रयोगस्य परिग्रहार्थं च महर्षिरुत्सूत्रप्रयोगाँश्चकार। तथा हि-

(१) "अ अ"[११] इति सूत्रे अस्य अः इत्यर्थे समासे विभक्तेर्लुकि समासे संहिताया नित्यत्वात् सवर्णदीर्घस्य अवश्यंभावितयापि असन्देहार्थमेव महर्षिणा सवर्णदीर्घो न कृतः। एवमेव "तुमर्थे सेसेन-से-असेन्-क्से-कसेनध्यै-अध्यैन्-कध्यै-कध्यैन्-शध्यै-शध्यैन्-तवै- तवेङ्-तवेनः"[१२] इत्यत्र समासे संहिताया नित्यतयापि 'असे-असेन्' इत्यत्र पूर्वरूपम् 'अध्यै-अध्यैन्' इत्यत्र च आयादिसन्धिर्न व्यधायि।

---

१. वा सुप्यापिशलेः ६।१।९१।

२. तृषिमृषिकृषेः काश्यपस्य १।२।२५।

३. अड् गार्ग्यगालवयोः ७।३।९९।

४. ई चाक्रवर्मणस्य ६।१।१२८।

५. ऋतो भारद्वाजस्य ७।२।६३।

६. त्रिप्रभृतिषु शाकटायनस्य ८।४।५०; लङः शाकटायनस्यैव ३।४।१११।

७. इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६।१।१२५।
लोपः शाकल्यस्य ८।३।१९; सर्वत्र शाकल्यस्य; ८।४।५१; सम्बुद्धौ शाकल्यस्येतावनार्षे १।१।१६।

८. गिरेश्च सेनकस्य ५।४।११२।

९. अवङ् स्फोटायनस्य ६।१।२१।

१०. अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च २।४।६५।

११. ८।४।६८।

१२. ३।४।९।

(२) ''अल्पाच्तरम्''[1] इति सूत्रस्य अल्पः अल्पसंख्यः अच् यस्य तत् अल्पाच्, अल्पाजेव अल्पाच्तरम् इति स्वार्थे एव तरबिति भाष्यानुसारि[2]- व्याख्यानेन द्वयोर्बहूनां वा पदानां द्वन्द्वे अल्पाच्पदं पूर्वं निपततीत्यर्थो भवति। अत एव ''शिव-केशवौ' इत्यत्रेव 'धव-खदिर-पलाशाः' इत्यत्रापि अल्पाच्पदस्यैव पूर्वनिपातो भवति। यदि च ''द्विवचनविभज्योपपदे तरबीयसुनौ''[3] इति सूत्रविहितस्तरप्प्रत्ययः स्वीक्रियेत तर्हि द्वयोरल्पाचोः पदयोरेव अल्पाच्तरस्य पूर्वप्रयोगः स्यान्नतु 'धव-खदिर-पलाशाः' इत्यादौ। एवञ्च 'द्वयोर्बहूनां वा पदानां द्वन्द्वे अल्पाचः पदस्य पूर्वनिपातो भवति' इत्यर्थकस्य ''अल्पाच्तरम्'' इति सूत्रस्यानुसरणं स्वयं महर्षिणा अधोलिखितेषु स्वसूत्रेषु न कृतम्। तथा हि--

''प्रकाशनस्थेयाख्ययोश्च''[4] इत्यत्र प्रकाशनं च स्थेयश्च इत्यनयोर्द्वन्द्वे अल्पाचः पदस्य स्थेयस्य पूर्वनिपातनमकुर्वाणेन पाणिनिना उत्सूत्रप्रयोगो व्यधायि। ''कर्मणो रोमन्थतपोभ्यां वर्तिचरोः''[5] इत्यत्र रोमन्थश्च तपश्च इत्यनयोर्द्वन्द्वे अल्पाचः तपसः प्राप्तपूर्वनिपातस्य उपेक्षाम्, ''नासिकास्तनयोर्ध्माधेटोः''[6] इत्यत्र नासिका च स्तनश्च इत्यनयोर्द्वन्द्वे पूर्वप्रयोगार्हस्य अल्पाच्तरस्य स्तनस्य पूर्वनिपाताभावम्, ''लक्षणहेत्वोः क्रियायाः''[7] इत्यत्र लक्षणं च हेतुश्च इति द्वन्द्वे प्राप्तपूर्वप्रयोगस्य हेतुशब्दस्य पूर्वनिपाताभावं विदधता महर्षिणा स्वनियमोल्लङ्घनं कृतम्।

(३) ''अजाद्यदन्तम्''[8] इति सूत्रेण अजादित्वे सति अदन्तस्य प्रातिपदिकस्य पूर्वनिपातेन ईशश्च कृष्णश्चेत्यादिद्वन्द्वे अजाद्यदन्तस्य ईशस्यैव पूर्वप्रयोगो भवति। एवं नियमे सत्यपि ''सर्वकूलाभ्रकरीषेषु कषः''[9] इत्यत्र ''समुद्राभ्राद्घः''[10] इत्यत्र च अभ्रस्य, ''नासिकोदरौष्ठजङ्घदन्तकर्णशृङ्गाच्च''[11] इत्यत्र नासिका च उदरं च ओष्ठश्च इत्यादीनां द्वन्द्वे उदरस्य ओष्ठस्य वा, ''केशाश्वाभ्यां यञ्छावन्यतरस्याम्''[12] इत्यत्र

---

१. २।२।३४।
२. ''अल्पाच्तरम्'' इति सूत्रस्थं भाष्यम्।
३. ५।३।५७।
४. १।३।२३।
५. ३।१।१५।
६. ३।२।२६।
७. ३।२।१२६।
८. २।२।३३।
९. ३।२।४२।
१०. ४।४।११८।
११. ४।१।५५।
१२. ४।२।४८।

केशश्च अश्वश्च इत्यनयोर्द्वन्द्वे अश्वस्य, "तस्मिन्नणि च युष्मकास्माकौ"[1] इत्यत्र युष्माकश्च अस्माकश्च इत्यनयोर्द्वन्द्वे अस्माकस्य, "वत्सांशाभ्यां कामबले"[2] इत्यत्र अंशस्य, "काण्डाण्डादीरन्नीरचौ"[3] इत्यत्र अण्डस्य, "ग्रन्थान्ताधिके च"[4] इत्यत्र अन्तस्य, "मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ"[5] इत्यत्र अश्वस्य, "सार्वधातुकार्धधातुकयोः"[6] इत्यत्र आर्धधातुकस्य "प्रसितोत्सुकाभ्यां तृतीया च"[7] इत्यत्र उत्सुकस्य च पूर्वनिपातमकुर्वता महर्षिणा उत्सूत्रप्रयोगाः कृताः।

(४) "वासुदेवार्जुनाभ्यां वुन्"[8] इत्यत्र वासुदेवश्च अर्जुनश्च इत्यनयोर्द्वन्द्वे "अजाद्यदन्तम्" "अल्पाच्तरम्" इति सूत्राभ्यां प्राप्तस्य अर्जुनस्य पूर्वप्रयोगस्याभिधानम् 'सर्वतोऽभ्यर्हितं पूर्वं निपततीति' ज्ञापनरूपप्रयोजनसिद्ध्यर्थम्। अत एव सीतारामौ, राधाकृष्णौ, मातापितरौ इत्यादिषु सीतादिशब्दानां पूर्वनिपातनं भवति। एवञ्चाभ्यर्हितस्य पूर्वप्रयोग-नियमे सत्यपि "श्वयुवमघोनामतद्धिते"[9] इत्यत्र श्वा च युवा च मघवा च इत्येतेषां द्वन्द्वे अभ्यर्हितस्य मघोनः पूर्वनिपातो न कृतः।

पूर्वप्रयोग-नियामक-सूत्राणां स्वसूत्रेष्वेव अननुसरणात् पूर्वप्रयोगनियामकशास्त्रस्य अनैयत्य-ज्ञापनरूप-प्रयोजनं सिद्ध्यतु नाम ते प्रयोगास्तु उत्सूत्रा अभूवन्नेव। वार्त्तिककृतापि 'महाजनो येन गतः स पन्थाः' इत्यनुसरता "कोपधप्रतिषेधे तद्धितवुग्रहणम्"[10] इत्यत्र तद्धितश्च वुश्च इत्यनयोर्द्वन्द्वे नियमप्राप्तस्य अल्पाचः पूर्वप्रयोगमविदधता निःशङ्कं तन्नियमोल्लङ्घनं कृतम्। अत एव 'ससौष्ठवौदार्यविशेषशालिनीम्'[11] इत्यादौ नियमप्रतिकूलस्यापि औदार्यदेः परनिपातस्य विधाने महाकविभिः औदार्यं प्रदर्शितम्।

"हनो वध लिङि"[12] इत्यत्र 'वध' इति लुप्तप्रथमाकम्, "तृतीया तत्कृतार्थेन गुणवचनेन"[13] इत्यत्र च 'तत्-कृत' लुप्ततृतीयाकम्। ईदृशं च निर्विभक्तिकं सत्

---

१. ४।३।२।
२. ५।२।९८।
३. ५।२।१११।
४. ६।३।७९।
५. ६।३।१३१।
६. ७।३।८४।
७. २।३।४४।
८. ४।३।९८।
९. ६।४।१३३।
१०. न कोपधायाः (६।३।३७) इति सूत्रस्थं वार्त्तिकम्।
११. किरातार्जुनीये प्रथमे सर्गे।
१२. २।४।४२।
१३. २।१।३०।

अपदं प्रयुञ्जानेन महर्षिणा 'अपदं न प्रयुञ्जीत' इति नानुसृतम्। अस्माभिरज्ञातं किमपि भवतु नाम अत्राप्यलौकिकं फलम्, लौकिकदृष्ट्या, एतादृशप्रयोगास्तु अव्यवहर्तव्या एव।

अत्रेदमवधानीयम्

यथा भगवता पाणिनिना यत् सूत्रितम् तन्नियमस्यानुसरणं कतिपयसूत्रान्तरेषु न कृतम् तथा वयमपि तल्लक्षणविपरीतं सूत्रान्तरलक्ष्यमवलोक्य लक्षणप्रतिकूलं प्रयोगं कर्तुं प्रभवाम इत्यस्माकं कृते स्वच्छन्दाचरणं प्रतिषेधयता महाभाष्यकृता पतञ्जलिना पस्पशाह्निके ''लक्ष्यलक्षणे व्याकरणम्'' इति व्याचक्षाणेन ''यो हि उत्सूत्रं कथयेत् नादो गृह्येत'' इति सुस्पष्टं प्रत्यपादि। एवं हि लक्षणैकचक्षुष्काणामस्माकं लक्ष्यैकचक्षुष्कस्य शब्दब्रह्म-विजानतो भगवतो महर्षिपाणिनेर्लक्षणानामनुसरणमेव शरणमिति शम्।

उपसर्गाणां द्योतकत्ववाचकत्वविषये प्राचां विचारः

(१) **उपसर्गशब्दार्थः**–उपगृह्य उपगम्य वा आख्यातम्[1] अर्थविशेषं सृजतीत्यर्थे उपपूर्वकात् सृज् धातोः कर्तरि घञ्[2]प्रत्यये कुत्वे[3] उपसर्गशब्दः निष्पद्यते। धातुमुपगृह्य तस्यार्थविशेषं प्रकटयति तेनायमुपसर्गः। अथ वा उपगम्य धातोः समीपं गत्वा स्वार्थं सृजति बोधयतीत्युपसर्गः।

(२) **उपसर्गस्य द्योतकत्वं वाचकत्वं वा**–अयं हि उपसर्गो द्योतको वाचको वेति विचारः अतिप्राचीनकालादेव विपश्चितां चेतांसि सन्दोलयति।

(३) **महर्षि शाकटायनमते उपसर्गाणां द्योतकत्वम्**–"न निर्बद्धा उपसर्गा[4] अर्थान्निराहु'रिति शाकटायनमते नामाख्यातमध्यात् निष्कृष्य बद्धाः पद-वाक्य-रूपेण रचिताः उपसर्गाः निश्चयेन अर्थान् न प्रतिपादयन्ति। ते हि "[5]नामाख्यातयोस्तु कर्मोपसंयोग-द्योतका भवन्ति।" अर्थात् नामाख्यातयोरेव कर्म-क्रियारूपमर्थमाश्रित्य तत्क्रियाश्रयमेव कमपि विशेषम् उपसंयुज्य तदुपसंयोगेन द्योतयन्ति। अतः उपसर्गाः कर्मोपसंयोगद्योतका एव भवन्ति न तु स्वातन्त्र्येण कमप्यर्थं वाच्यवृत्त्या अभिदधति। अत्रायमाशयः यथा प्रदीपसंयोगे द्रव्यस्य अभिव्यज्यमानो गुण-विशेषो द्रव्याश्रय एव भवति न तु प्रदीपाश्रयस्तथैव प्रहरतीत्यादौ प्रहाररूपोऽर्थः हरत्याश्रय एव न तु प्रोपसर्गाश्रयः। अतः प्रादय उपसर्गा धातोः पृथगवस्थिता न वाचकाः। महर्षिशाकटायनस्य तदनुयायिनाञ्च एतत्कथनस्येदं रहस्यम् यथा पदात् अपगतानां वर्णानाम् अर्थाभिधायकत्वं नास्ति तथैव धातोः पृथग् विरचितानामुपसर्गाणाम् साक्षादर्थाभिधाने शक्तिर्नास्ति, किन्तु नामाख्यातयुक्तानामेव। एवञ्च प्रादीनामर्थवत्त्वाभावेन "अर्थवदधातुरप्रत्ययः

---

१. तत्र नामानि आख्यातजानि (धातुजानि) इति शाकटायनमते आख्यातेन धातोर्ग्रहणम्। निरुक्तम् - १-४।
२. "पुंसि संज्ञायां घः प्रायेण" पाणिनिसूत्रम् ३।३।११८।
३. चजोः कु घिण्यतोः। पा० सू० ७।३।५२।
४. निरुक्तम् १।१।४।
५. तत्रैव १।१।४।

प्रातिपदिकम्''[1] इति प्रातिपदिकत्वाभावेऽपि ''कृत्तद्धितसमासाश्चे[2]''ति सूत्रे चकारग्रहणात् तेषां प्रातिपदिकत्वेन पदत्वादिकं संपद्यते।

(४) **महर्षिगार्ग्यमते उपसर्गाणां वाचकत्वम्**–महर्षिशाकटायन-मत-विपरीतं स्वमतं प्रतिपादयता महर्षिगार्ग्येण ''उच्चावचाः पदार्था भवन्ती[3]''ति समुद्घोषयाञ्चके। अर्थात् नामाख्याताभ्यां वियुक्तानामपि प्रादीनामुपसर्गाणां बहुप्रकारा अर्था भवन्ति। एतावता स्वतन्त्रा अप्युपसर्गा अर्थवाचका भवन्तीति तत्तात्पर्यम्।

यत्तु वर्णवत् पृथगवस्थिता उपसर्गा अनर्थका इति तन्न, मृदोऽवयवेषु मृण्मय-भाण्डारम्भशक्तिरिव वर्णेष्वपि सामान्याभिधानशक्तिस्वीकारात्। यथा मृदोऽवयवानां घटारम्भशक्तिर्विद्यमानापि घट एवाभिव्यज्यते तथैव वर्णस्थापि सा त्वभिधानशक्तिः पदत्वेन समुदितानामर्थविशेषेऽवतिष्ठते। अन्यथा अनर्थकैर्वर्णैरारभ्यमाणं पदमपि अनर्थकमेव स्यात्। पदैश्च वाक्यं वाक्यैश्च शास्त्रमनर्थकं भवेदिति वर्णाः यथा अर्थवन्तः तथैव प्रादयोऽपि अर्थवन्तः।

यत् पुनरेतदुक्तम् प्रदीपवत् अनर्थका उपसर्गा इति तदपि न समीचीनम्। प्रकाशाख्येन स्वेनार्थेन प्रदीपोऽपि अर्थवानेव। यथा हि अर्थवत्त्वे सत्यपि प्रकाश्यमर्थम् आधारभूतं घटादिं प्रत्यायन् स्वप्रकाशनशक्तिम् अभिव्यनक्ति तथैव उपसर्गा अपि अर्थवन्तोऽपि सन्तः अनेकप्रकारां स्वार्थाभिधानशक्तिं विद्यमानामपि स्वार्थाभिधान-शक्त्याधारभूते नामाख्याते प्रत्याय्य अभिव्यञ्जयन्ति।

यदपि उपसर्ग-संयोगे सति प्रतीयमानोऽर्थः नामाख्यातयोरेव न तूपसर्गस्य तदपि न युक्तियुक्तम्। यथा लोके यो यत्र समर्थो भवति स तत्रान्यं नापेक्षते। नामाख्याते तु अर्थ-विशेषं प्रति उपसर्गसंयोगमपेक्षते, अत इदं सिद्धं भवति यत् क्रियाविशेषः उपसर्गस्यार्थः क्रियासामान्यमात्रञ्च आख्यातस्य। अतः महर्षिगार्ग्य-मते उपसर्गेषु वाचकता सम्बन्धेन यो हि पदार्थः विद्यते तं पदार्थम् इमे उपसर्गाः पृथगपि सन्तः प्रतिपादयन्ति[4]। अत उपसर्गा वाचका एव।

---

१. अष्टाध्यायी १।२।४५।
२. तत्रैव १।२।४६।
३. निरुक्तम् १।१।४।
४. तद्य एषु पदार्थः प्राहुरिमे तत्। निरुक्तम् १।१।४।
एवमुच्चावचानर्थान् प्राहुस्त उपेक्षितव्याः। तत्रैव १।१।५।

(५) **महर्षिपाणिनिमते प्रादीनां वाचकत्वम्** :-महर्षिपाणिनिस्तु क्रियायुक्तानामेव प्रादीनाम् उपसर्गत्वं[1] स्वीकुर्वाणः क्रिया-वियुक्तानां प्रादीनान्तु उपसर्गत्वमेव न मनुते। एवञ्च प्रकृते महर्षिपाणिनिमते सामान्येन प्रादीनां वाचकत्वमिति विचारः क्रियते।

प्र-परादीनां पदत्वं तु निर्विवादम्। पदत्वं च प्रातिपदिकसंज्ञायां सुबुत्पत्तौ सत्यामेव। प्रातिपदिकत्वं च अर्थवत्त्वे सत्येव। अतः प्रादीनामर्थवत्त्वं सिद्ध्यति। ''कृत्तद्धितसमासाश्चे''ति सूत्रेऽपि अर्थवदनुवृत्त्या तत्रापि अर्थवत एव प्रातिपदिकत्वम्।

कर्मप्रवचनीयसंज्ञाविधानप्रसङ्गे ''अधिपरी[2] अनर्थकौ'' इत्येतेन निरर्थकयोः अधिपर्योः कर्मप्रवचनीयत्वेन उपसर्गरूपयोस्तयोः सार्थकत्वं सिद्ध्यति। एतत्प्रकरणे महर्षेरन्यान्यपि सूत्राणि प्रादीनां वाचकत्त्वं प्रतिपादयन्ति।

''अपपरी वर्जने''[3], ''आङ् मर्यादा[4]वचने'' ''प्रतिः प्रतिनिधि[5]प्रतिदानयोः'' इत्यादिषु अपपर्योर्वर्जनार्थत्वम्, आङः मर्यादाभिविधिवाचकत्वम्, प्रतेः प्रतिनिधिप्रतिदानबोधकत्वं सुस्पष्टमेव। अत एव 'अपहरेः परिहरेः संसारः' इत्यादिषु वर्जनार्थः, 'आमुक्तेः संसारः' इत्यत्र मर्यादार्थः, 'आसकलाद् ब्रह्म' इत्यत्र अभिविध्यर्थः, 'प्रद्युम्नः कृष्णात्-प्रति' इत्यत्र प्रतिनिध्यर्थश्च क्रियापदमन्तरापि तत्तद्बोधविषयतां प्राप्नुवन्ति।

एवमेव ''सुप् प्रतिना मात्रार्थे''[6], ''अक्षशलाकासंख्याः[7] परिणा'', ''आङ्मर्यादाभिविध्योः[8]'' इत्यादिषु मात्रार्थ-लेशार्थ-वाचकेन प्रतिना, विपरीतार्थ-प्रतिपादकेन परिणा, मर्यादाभिविधि-बोधकेन आङा च सह समास-विधानात् प्रतिपर्यादीनां वाचकत्वं सुस्पष्टमेव।

''उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत्।।''

---

१. उपसर्गाः क्रियायोगे। १।४।५९।
२. अष्टाध्यायी १।४।९३।
३. तत्रैव १।४।८८।
४. तत्रैव १।४।८९।
५. तत्रैव १।४।९२।
६. तत्रैव २।१।९।
७. तत्रैव २।१।१०।
८. तत्रैव २।१।१३।

इति कथनेनापि उपसर्गस्य शक्तिमत्वं ज्ञायते। अन्यथा उपसर्गद्वारा धात्वर्थस्य बलपूर्वकम् अन्यस्मिन्नर्थे (स्वकीयार्थे-उपसर्गार्थे इति यावत्) आनयनं न संभाव्यते। एवं हि महर्षिशाकटायनमते उपसर्गाणां द्योतकत्वेऽपि महर्षिगार्ग्यस्य भगवतः पाणिनेश्च मते प्राद्युपसर्गाणां वाचकत्वमेव।

उपसंहार :--

महर्षिशाकटायनमते प्रादीनामुपसर्गाणां द्योतकत्वम्। इदमत्र रहस्यम्--यतो नामानि आख्यातजानि अतस्तानि अर्थवन्ति। प्राद्युपसर्गास्तु नाख्यातजा अतस्ते निरर्थका द्योतका एव।

महर्षिगार्ग्य-पाणिनि-मते न सर्वाणि नामानि आख्यातजानि। कानिचिद् व्युत्पन्नानि कानिचिच्च अप्रत्यक्षक्रियाणि अव्युत्पन्नानि। एवं च यथा घटपटादीनि अव्युत्पन्नान्यपि नामानि अर्थवन्ति तथैव अव्युत्पन्ना अपि प्राद्युपसर्गा अर्थवन्त इतिशम्।

महर्षिवाल्मीकि-पाणिन्योः पौर्वापर्यम्

रघुकुलतिलकस्य भगवतो रामभद्रस्य जीवन-लीलामाधारीकृत्य विरचितस्य इतिहासात्मकस्य आदिकाव्य-वाल्मीकि-रामायणस्य साक्ष्येण इदं सुस्पष्टं ज्ञायते यत् महर्षि वाल्मीकिः श्रीरामचन्द्रस्य जीवन-लीला-वेलायां विद्यमान आसीत् तथा तदानीमेव रामायणमादिकाव्यं व्यरीरचत्।

अयोध्यातो वनं प्रस्थितो रामो रमणीये चित्रकूटे सीतालक्ष्मणाभ्यां सह महर्षि-वाल्मीकिमभ्यवादयत्[१]। प्रसन्नो महर्षिः तान् स्वागतं व्याहरन् समपूजयत्[२]।

पौरापवादभीतो रामः श्रीसीतानिर्वासन-समये जाह्नवीतटनिकटे तमसातीर-वासिनो-वाल्मीकेरुपाश्रमं सीतां विसर्जयितुं लक्ष्मणमादिदेश[३]।

श्रीरामकर्तृकाश्वमेधमखे कुशल-वाग्भ्यां कुश-लवाभ्यां कुमाराभ्यां सह समागतस्य प्राचेतसमहर्षिवाल्मीकेः श्रीरामेण सह साक्षात्कारोऽ[४]भवदित्यादिघटनाः प्रमाणयन्ति यत् श्रीरामचन्द्रस्य जीवन-लीलाकाले एव प्राचेतसमहर्षिवाल्मीकिः भारतभुवं भूषयन्नासीत्। त्रेतायुगान्तेऽवतीर्णस्य रामभद्रस्य राज्यकालः द्वापरात् प्रागेवासीदिति[५] पौराणिकाः प्रतिपादयन्ति। एवञ्च श्रीरामस्य समसामयिकस्य महर्षिवाल्मीकेः तद्रामायणस्य रचनायाश्च कालः स एव।

रामायणे नामग्राहं समुल्लिखितेषु महर्षिप्रवरेषु महर्षिपाणिनेर्नाम नोपलभ्यते।

अयोध्यायां कृतराज्याभिषेकं महाराजं रामचन्द्रं सभाजयितुं भारतस्य विभिन्नाभ्यो दिशाभ्यो बहवो महर्षयोऽभ्यागताः--

"प्राप्तराज्यस्य रामस्य राक्षसानां वधे कृते।
आजग्मुर्मुनयः सर्वे राघवं प्रतिनन्दितुम्।।

---

१. इति सीता च रामश्च लक्ष्मणश्च कृताञ्जलिः।
अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन्।। वा० रा० अयो० ५६।१६।

२. तान् महर्षिः प्रमुदितः पूजयामास धर्मवित्।
आस्यतामिति हो वाच स्वागतं तं निवेद्य च।। तत्रैव ५६।१७।

३. गङ्गायास्तु परे पारे वाल्मीकेस्तु महात्मनः।
आश्रमो दिव्यसंकाशस्तमसातीरमाश्रितः।।
तत्रैतां विजने देशे विसृज्य रघुनन्दन।
शीघ्रमागच्छ सौमित्रे कुरुष्व वचनं मम।। तत्रैव उत्तरे ४५।१७-१८।

४. तत्रैव उत्तरे ९३।१८-१९।

५. पुराणगणनानुसारम् विक्रमात् ८६७१०० वर्षेभ्यः प्राक्।

कौशिकोऽथ यवक्रीतो गार्ग्यो गालव एवच।
कण्वो मेधातिथेः पुत्रः पूर्वस्यां दिशि ये श्रिताः।।
स्वस्त्यात्रेयश्च भगवान् नमुचिः प्रमुचिस्तथा।
अगस्त्योऽत्रिश्च भगवान् सुमुखो विमुखस्तथा।
आजग्मुस्ते सहागस्त्या ये श्रिता दक्षिणां दिशम्।
नृषजुः कवषो धौम्यः कौशेयश्च महानृषिः।।
तेऽप्याजग्मुः सशिष्या वै ये श्रिताः पश्चिमां दिशम्।
वसिष्ठः कश्यपोऽथात्रिर्विश्वामित्रः सगौतमः।।
जमदग्निर्भरद्वाजस्तेऽपि सप्तर्षयस्तथा।
उदीच्यां दिशि सप्तैते नित्यमेव निवासिनः।।[1]''

इत्येतेषु मुनिषु पाणिनेर्नाम न विद्यते। एवमेव भगवत्याः सीतादेव्या अग्निपरीक्षणानन्तरम् समुपस्थितेषु शिव-ब्रह्मेन्द्रदेवेषु[2] महर्षिषु च महर्षिपाणिनिर्नास्ति। एतेन अनुमीयते यत् महर्षिवाल्मीकेः समये महर्षिपाणिनिर्नासीत्। अत एव पाणिनीय-व्याकरणस्य प्रभावो रामायणे नावलोक्यते। अपाणिनीयप्रयोगाणां बाहुल्यं दृश्यते। पाणिनेः पूर्वस्मिन् काले प्रवर्तमानम् ऐन्द्र-माहेश्वरादि-विशालं व्याकरणमनुसृत्यैव महर्षी रामायणं रचयांचकार।

एवञ्च वाल्मीकि-समये पाणिनीय-व्याकरणस्य अनस्तित्वेन रामायणे संकेतितेषु नवसु[3] व्याकरणेषु पाणिनीय-व्याकरणं संगृहीतं न भवति। एवमेव ''ससूत्र वृत्त्यर्थपदं महार्थं ससंग्रहं सिद्ध्यति वै [4]कपीन्द्रः'' इत्यत्र ससंग्रहघटक'संग्रह'शब्देन व्याडिकृत-संग्रहग्रन्थस्य संकेतो न भवति, यतः संग्रहग्रन्थकर्ता व्याडिः महर्षिपाणिनेः

१. तत्रैव उत्तरे १।१।६।
२. तत्रैव युद्ध का० अ० ११७।
३. नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहुव्याहरतानेन न किञ्चिदपशब्दितम्।। तत्रैव किष्किन्धा० ३।२६।
सोऽयं नव व्याकरणार्थवेत्ता। तत्रैव उत्तरे ३६।४७।
४. असौ पुनर्व्याकरणं ग्रहीष्यन्
सूर्योन्मुखः प्रष्टुमनाः कपीन्द्रः।
उद्यद्गिरेरस्तगिरिं जगाम
ग्रन्थं महद् धारयनप्रमेयः।।
ससूत्रवृत्त्यर्थपदं महार्थं
ससग्रहं सिद्धयति वै कवीन्द्रः। तत्रैव उत्तरे ३६।४५-४६।

समसामयिकः सम्बन्धी आसीत्। अतः ब्रह्म-महेश्वरेन्द्र-बृहस्पति-भरद्वाज- गार्ग्य-गालव-काश्यप - गौतमादीनां यानि व्याकरणानि पाणिनेरति-प्राचीनानि आसन्, तेष्वेव प्रसिद्धानां नवानां तत्र संकेतो विद्यते। एते च व्याकरणप्रवक्तारः महर्षिपाणिनेः बहोः कालात् प्रागेवासन्।

एतच्च पाणिनीयाष्टके निर्दिष्टानाम् आपिशलि-गार्ग्य-गालव-काश्यप-सेनक-शाकल्य-चाक्रवर्मण-शाकटायन-भारद्वाज-स्फोटायनानां दशानां व्याकरण-प्रवक्तॄणां नामग्राहं समुल्लेखेनापि निश्चीयते। अतः पाणिनिः वाल्मीकेः परवर्तीति निश्चितं भवति।

पाणिनेरष्टाध्याय्याम् युधिष्ठिर[१]-गाण्डीव[२] महाभारतादि[३]शब्दविशेषाणां निष्पत्त्यर्थम् विशेषसूत्राणां प्रणयनात् [४]वासुदेवार्जुन-[५]शौनक-पाराशर्य[६]-वैशम्पायन[७]-कुन्ति-कुरु[८]प्रभृतीनां महाभारतकालीन-विशिष्टनामधेयानां समुल्लेखाच्च पाणिनेः महाभारतकालात् परवर्तित्वं निश्चीयते। उपर्युक्तनाम्नां च वाल्मीकि-रामायणे अनुपलब्ध्या रामायण-प्रणेतुर्वाल्मीकेः महाभारतसमयात् पूर्ववर्तित्वं सुनिश्चीयते।

एवं हि आदिकाव्यस्य महाभारतात् पूर्वकालिकत्वे सिद्धेऽपि ये केचन ऐतिहासिकंमन्याः महाभारतरचनायाः रामायणरचनातः पूर्वकालिकत्वं स्वीकुर्वते ते भ्रान्ता अनर्गलं जल्पन्ति।

नवव्याकरणार्थवेत्ता हनूमान् यानि नवव्याकरणानि अध्यगीष्ट एतेषु ब्राह्मम्, माहेश्वरम्, बार्हस्पत्यम्, ऐन्द्रम्, भारद्वाजम् इति पञ्च व्याकरणानि तथा गार्ग्य-गालव गौतम-काश्यपानां चत्वारि व्याकरणानि सन्तीति विपश्चितो निगदन्तीति शम्।

---

१. गवियुधिभ्यां स्थिरः पा० सू० ८।३।६५।
२. गाण्ड्यजगात् संज्ञायाम् पा० सू० ५।२।११०।
३. महान् व्रीह्यपराह्ण-गृष्टीष्वास-जाबाल-भार-भारत-हैलिहिल - रौरव-प्रवृद्धेषु। पा० सू० ६।२।३८।
४. वासुदेवार्जुनाभ्यां वुन्। पा० सू० ४।३।९८।
५. शौनकादिभ्यश्छन्दसि। पा० सू० ४।३।१०६।
६. पाराशर्य-शिलालिभ्यां भिक्षुनटसूत्रयोः। ४।३।११०।
कलापि वैशम्पायनान्तेवासिभ्यश्च। पा० सू० ४।३।१०४।
७. स्त्रियामवन्ति कुन्ति कुरुभ्यश्च। ४।१।१७६।
८. कुरुनादिभ्यो ण्यः। पा० सू० ४।१।१७२।

अरस्तूमहोदयस्य भरतमुनेश्च नाट्यविषयक - विचारः

यवनदेशस्य प्रसिद्धदार्शनिकः अरस्तूमहोदयः ख्रिष्टपूर्वे चतुर्थशतके (३८४-३२२) स्वाप्रतिमप्रतिभया न केवलं पाश्चात्त्यसभ्यतासंस्कृतिमूलकारणं विविध-दर्शन-ज्ञान-विज्ञानमाविश्चकार, अपि तु काव्यशास्त्रेऽप्यपूर्वां शक्तिं प्रकटयामास। तस्य 'काव्यशास्त्रम्'[१] तथा 'रीतिशास्त्रम्'[२] एतस्मिन् विषये प्रसिद्धं ग्रन्थरत्नमद्यापि विदुषां मानसं मोदयतितराम्।

प्रायस्तस्मिन्नेव प्राचीनयुगे महामुनिर्भरतो भारतभुवं स्वजन्मनाऽलञ्चकार, तथा ज्ञान-विज्ञान-कला-रत्नाकरं षट्त्रिंशदध्यायम् 'नाट्यशास्त्रम्' प्रणिनाय। भिन्नदेशकालसंस्कृतिष्वेधमानयोरप्युभयोर्नाट्यविषयकविचारे विद्यमाना मौलिकसमानता समालोचकानां चेतश्चमत्करोति। अरस्तूमहोदयस्य कतिपये नाट्य-काव्य-विषयक-विचारा न केवलं भारतीयतद्विषयक-विचारानुकूलतां भजन्ते, अपि तु तदभिन्नतामपि प्रतिपादयन्ति। नाट्यस्वरूपम्--

किं वा नाट्यमिति जिज्ञासां समादधता भरतमुनिना 'नाट्यशास्त्रे'--

त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्[३]।
नानाभावोपसम्पन्नं नानावस्थान्तरात्मकम्।।[४]
लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम्।
सप्तद्वीपानुकरणं नाट्ये ह्यस्मिन् प्रतिष्ठितम्।।
देवतानामृषीणां च राज्ञामथ कुटुम्बिनाम्।
कृतानुकरणं लोके नाट्यमित्यभिधीयते।।[५]
लोकस्वभावानुकरणाच्च नाट्यस्य सत्त्वमीप्सितम्।।[६]

---

१. Aristotle's Poetics.
२. Rhetorics.
३. नाट्यशास्त्रे १। १०४।
४. तत्रैव १। १०८
५. तत्रैव १। ११८।
६. तत्रैव सप्तमाध्याये।

इत्येवंरूपेण 'लोकवृत्तानुकरणम्,' 'अवस्थानुकरणम्' नाट्यमित्यादि बहुशः प्रतिपादयाञ्चक्रे। नाटकं निरूपयता तेन--

सुश्लिष्टसन्धियोगं च सुप्रयोगं सुखाश्रयम्।

मृदुशब्दाभिधानं च कविः कुर्यात्तु नाटकम्।।[1]

मृदुशब्दसुखार्थं च कविः कुर्यात्तु नाटकम्।[2]

मृदु-ललित-पदार्थं गूढशब्दार्थहीनं,

बुधजनसुखयोग्यं बुद्धिमन्नृत्त्ययोग्यम्।

बहुरसकृतमार्गं सन्धिसन्धानयुक्तं,

भवति जगति योग्यं नाटकं प्रेक्षकाणाम्।।[3]

इत्यादिरूपेण तत्स्वरूपं प्रतिपादितम्।

अनुकरणात्मकस्य रूपकस्य दशसु प्रभेदेषु प्रधानतमस्य नाटकस्य रसाभिव्यञ्जक-मृदुललितशब्दैः शोभनार्थैश्च शरीरं विधेयमिति मुनेः स्पष्टं मतम्।

अत्रेदं विचारणीयम्--

'नाट्यशास्त्रे' भरतमुनिना 'लोकवृत्तानुकरणम्', 'लोकस्वभावानुकरणम्', 'कृतानुकरणम्' इत्यादि यन्नाट्यविषये प्रतिपादितम्, तत्र 'अनुकरणम्' नटद्वारा प्रदर्शितम्, किमनुकार्यस्य कार्यकलापस्याभिनयरूपम्, उताहो कविद्वारा निरूपितं जागतिकपदार्थस्य वर्णनात्मकं कविकर्मरूपम् ? एतज्जिज्ञासायाः समाधाने आपाततस्त्विदमेव प्रतिभाति यद् नटद्वारा कृतमभिनयरूपमेवानुकरणं मुनेरभिप्रेतम्, यतस्तदनुसरणकारिणां भट्टलोल्लटाभिनवगुप्तधनञ्जयधनिकविश्वनाथप्रभृतीनाम्--"मुख्यया वृत्त्या रामादावनुकार्ये तद्रूपतानुसन्धानान्नर्तकेऽपि प्रतीयमानो रसः[4]," "नहि नटो रामसादृश्यं स्वात्मनः शोकं करोति, सर्वथैव तस्य तत्राभावात्, भावेनानुकारत्वात्,[5]" "अवस्थानुकृतिर्नाट्यम्[6]", "काव्योपनिबद्धधीरोदात्ताद्यवस्था-

---

१. तत्रैव २१, १२०।

२. तत्रैव २१, १३१।

३. तत्रैव १७, १२३।

४. काव्यप्रकाशे चतुर्थोल्लासे।

५. अभिनवभारत्याम् ३७ तमे पृष्ठे।

६. दशरूपके १, ७।

नुकारश्चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम्,[1]" "अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्"[2] "अनुकर्तृगतत्वं चास्य निरस्यति[3]" इत्यादि-कथनेषु रङ्गमञ्चेऽनुकारकनटेन प्रदर्शितं धीरोदात्तादिनायकानां विविधानामवस्थानामाङ्गिक-वाचिकाहार्य-सात्त्विकाभिनयरूपं प्रयोगात्मकमेवानुकरणं प्रतिभाति, परन्तु सूक्ष्मेक्षिकया दर्शनेन नवनिर्माणात्मकं कविव्यापाररूपमप्यनुकरणं भरतमुनेः, तमनुसरतां च विपश्चितां मतमिति निश्चिन्वन्ति समालोचकविचक्षणाः।

भरतमुनेः--

एतद्रसेषु भावेषु सर्वकर्मक्रियासु च।
सर्वोपदेशजननं नाट्यमेतद् भविष्यति।।
धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति।।
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
न स योगो न तत् कर्म नाट्येऽस्मिन् यन्न दृश्यते।।
सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च।
अस्मिन्नाट्ये समेतानि तस्मादेतद् मया कृतम्।।
वेदविद्येतिहासानामाख्यानपरिकल्पनम्।
विनोदजननं काले नाट्यमेतद् भविष्यति।।[4]
सन्ध्यन्तरैकविंशत्या चतुष्षष्ट्यङ्गसंयुतम्।
षट्त्रिंशल्लक्षणोपेतं गुणालङ्कारभूषितम्।।
महारसं महाभोगमुदात्तवचनान्वितम्।।
महापुरुषसञ्चारं साध्वाचारजनप्रियम्।।
सुश्लिष्टसन्धियोगं च सुप्रयोगं सुखाश्रयम्।
मृदुशब्दाभिधानं च कविः कुर्यात्तु नाटकम्।।
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।

---

१. तत्रैव अवलोकटीकायाम्।
२. साहित्यदर्पणे ३, ४८।
३. तत्रैव।
४. नाट्यशास्त्रे १, ११०-११६।

न तत्कर्म न योगोऽसौ नाटके यन्न दृश्यते।।
यो यः स्वभावो लोकस्य नानावस्थान्तरात्मकः।
साङ्गाभिनयसंयुक्तो नाट्यमित्यभिधीयते।।
सर्वभावैः सर्वरसैः सर्वकर्मप्रवृत्तिभिः।
नानावस्थान्तरोपेतं नाटकं संविधीयते।।
तदेवं लोकभावानां प्रसमीक्ष्य बलाबलम्।
मृदुशब्दं सुखार्थं च कविः कुर्यात्तु नाटकम्[१]।।

इत्यादिकथनेन स्पष्टं भवति यत् कविव्यापाररूपमपि लोकवृत्तानुकरणं मुनेरभिप्रेतम्। अत एव तेन न केवलं रङ्गमञ्चोपयोगिनां बहिरङ्गरूपाणां चतुर्विधाभिनयानामेव सविस्तरं वर्णनं कृतम्, अपि तु नाट्यान्तरङ्गरूपाणां प्रधानीभूतानां रसभावादीनामपि विशेषरूपेण निरूपणं कृतम्। अत्रेदं विभावनीयम्--

यथैव चानुकार्यवृत्तस्यानुकर्तृभिः कृतमभिनयरूपमनुकरणं तत्तादात्म्यापादनरूपं सदेव शोभनं भवति, न तथा कविभिः कृतं लोकवृत्तानामनुकरणं यथावत् तेषां तद्रूपेण प्रतिपादनम्। किन्तु कविकृतलोकवृत्तानुकरणं कवेः प्रतिभाव्युत्पत्त्यभ्यासात् सृष्टं नवनिर्माणरूपं सदेव सहृदयहृदयाह्लादकं भवति। काव्ये हि कविवर्णितवस्तुनस्त्रयाणां रूपाणामनुकरणं क्रियते कर्तुं शक्यते च--

(१) (कवि-हृदये) वस्तुनः प्रतीयमानरूपस्य,

(२) वस्तुनः सम्भाव्यरूपस्य (यथा तद्रूपं भवितुमर्हति),

(३) वस्तुन आदर्शरूपस्य (यथा तेन रूपेण भाव्यम्) इति।

एवं च कविकर्मणः साफल्यं वस्तुनः सम्भाव्यरूपस्यादर्शरूपस्य चानुकरणे एव, यतो हि तत्रैव प्रतिभायाः कल्पनायाश्च समुपयोगो भवति। तथाविधानुकरणेनैव काव्यनिबन्धनं धर्म्यं यशस्यमायुष्यं हितं बुद्धि-विवर्द्धनं लोकोपदेशजननं धर्मार्थकाममोक्षसाधनं च भवति। तेनैव च कविर्वस्तुतः प्रजापतिपदवीं लभते।

अरस्तूमहोदयेनानुकरणात्मककलासूत्कृष्टतमायास्त्रासद्या लक्षणं कुर्वता प्रोक्तम्--"त्रासदी कस्यचिद् गम्भीरस्य, स्वतः पूर्णस्य, निश्चितायामयुक्तस्य कार्यस्यानुकृतिः, यस्या माध्यमं नाटकस्य विभिन्नभागेषु विभिन्नरूपेण प्रयुक्ता

---

१. तत्रैव २१, ११८-१३१।

सर्वविधालङ्कारैरलङ्कृता भाषा भवति, यत्र च त्रास-करुणयोरुद्रेकद्वारा मनोविकाराणां समुचितविरेचनं भवति[१]'' इति। एतल्लक्षणानुसारेण--

(१) त्रासदी कार्यस्यानुकृतेर्नाम।

(२) इदं कार्यं गम्भीरं स्वतः पूर्णं निश्चितायामयुक्तं च भवति।

(३) अस्य कार्यस्य समाख्यानं वर्णनं वा न भवति, अपि तु प्रदर्शनं भवति।

(४) भाषा छन्दोलयगीतादिभिरलङ्कृता भवति[२]।

(५) त्रास-करुणयोरुद्रेकद्वारा तादृशमनोविकाराणां विरेचनं भवति, येन त्रासद्याः प्रयोजनस्यानन्दानुभवस्य सिद्धिर्भवति। अत एव च कारणात् त्रासद्या अनिवार्यरूपेण षडङ्गानि भवन्ति, यानि तस्याः सौन्दर्यस्य निर्धारणं कुर्वन्ति। तानि च--(१) कथानकम्, (२) चरित्र-चित्रणम्, (३) पदरचना, (४) विचारतत्त्वम्, भावतत्त्वं वा (५) दृश्यविधानम् (६) गीतं च। एतेषु कथानकम्, चरित्रचित्रणम्, विचारतत्त्वं चानुकृतेर्विषयः, दृश्यविधानम् अनुकृतेर्माध्यमम् पदरचना गीतं चानुकरणस्य विधिः[३]।

(१) अत्र प्रकरणे स्वकाव्यशास्त्रस्यान्यस्मिन् प्रकरणे चानुकरणार्थे प्रयुक्तः अरस्तूमहोदयस्य 'मीमेसिस' इति शब्दः कल्पनात्मकं पुनर्निर्माणं नूतनसर्जनम्–इत्याद्यर्थमेव बोधयति, न तु वस्तुनो यथावद्रूपस्यानुकरणम्।

''पारमार्थिकसत्यस्यानुकरणं जगत्, तस्यानुकरणं काव्यमित्यनुकृतेरनुकरणतया काव्यं सत्यादतीव दूरतरमतः काव्यं हेयम्'' इति प्लेटोमहोदयस्य मतं दूषयन्, काव्यात्मकमनुकरणं न यथावदनुकरणम् अपि तु प्रेयः श्रेयः समन्वितमादर्शरूपमिति प्रतिपादयंश्च अरस्तूमहोदयोऽनुकरणस्य प्रयोगं न सङ्कुचितार्थे चकार, अपि तु पूर्वप्रतिपादितदिशा भरतमुनेरभिप्रेतार्थे एव। अत एव अरस्तूमहोदयमते इतिहासात्

---

१. Tragedy, then, is, an imitation of an action that is serious, complete, and of certain magnitude; in language embellished with each kind of artistic ornament, the several kinds being found in separate parts of the play; in the form of action, not of narrative, pity and fear effecting the Proper Purgation of these emotions.

— Poetics VI.

२. By 'language embellished' I mean language into which rhythm, harmony and song enter. Ibidem.

३. Every tragedy, therefore, must have six Parts, which Parts determine its quality—namely, Plot, Character, Diction, Thought, Spectacle, Song. Two of the Parts Constitute the medium of imitation, one the manner, and three the object of imitation. Ibidem.

काव्यं भव्यतरम्; यत इतिहासे घटनाया यथावद् वर्णनं भवति, काव्ये तु तस्यास्तथा वर्णनं भवति यथा तया घटनया भाव्यम्। काव्ये दार्शनिकता भवति, अत एवेतिहासादिदं महत्तरम्। काव्यस्य कथावस्तु सार्वभौमं सार्वकालिकं च; इतिहासस्य कथावस्तु देशकाल-विशेष-परिच्छिन्नम्[१]। एवञ्चानुकरणसिद्धान्ते उभयोर्मतं साम्यं भजते।

(२) भाषाः

नाटकस्य भाषाविषये यथा भरतमुनिना--

षट्त्रिंशल्लक्षणोपेतं गुणालङ्कारभूषितम्।[२]

शब्दानुदारमधुरान् प्रमदाभिनेयान्,[३]

मृदुललितपदार्थं गूढशब्दार्थहीनम्,[४]

इत्यादिप्रतिपादयता नाटकस्य शब्दप्रयोगैर्गुणालङ्कारभूषितैर्भाव्यमिति निरूपितम् तथैव अरस्तूमहोदयमतेऽपि त्रासद्या भाषा छन्दोलयगीतादिभिः सर्वविधालङ्कारैश्चालङ्कृता भवतीत्यनयोर्विचारे परं साम्यं वरीवर्ति।

(३) नाट्य-काव्य-कथावस्तु

भरतमुनिमते--

इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम्।

पञ्चभिः सन्धिभिस्तस्य विभागाः परिकीर्तिताः।।

इतिवृत्तं द्विधा.........।

अधिकारिकमेकं तु प्रासङ्गिकमथापरम्।।[५]

एतच्चेतिवृत्तमितिहासपुराणादिप्रसिद्धं कविकल्पितरूपमुत्पाद्यं चेति द्विविधम्।

---

१. The true difference is that one (history) relates what has happened, the other (Poetry) what may happen. Poetry, therefore, is a more philosophical and a higher thing than history. Ibidem IX.

२. नाट्यशास्त्रे २१, ११८।

३. तत्रैव १७, १२१।

४. तत्रैव १७, १२२।

५. तत्रैव २१, २।

अरस्तूमहोदयमतेऽपि कथावस्तु घटनानां विन्यासरूपमेव यच्च कार्यव्यापारानुकरणरूपं भवति। एतच्च कथानकं त्रासद्याः सर्वप्रमुखं वस्तु। एतदेवैतस्या आत्मरूपम्[1]।

कथानकस्यैवंविधमहत्त्वप्रदाने अरस्तूमहोदयस्येयं वाचो युक्तिः--

(१) त्रासद्यां न व्यक्तेरनुकरणं भवति, अपि तु कार्यस्य जीवनस्य चानुकरणं भवति।

(२) जीवनं च कार्यव्यापारस्यैवापरं नाम। अतो जीवनस्यानुकृतौ कार्यव्यापारस्यैव प्रामुख्यम्।

(३) सुखं दुःखं वा काव्यजन्यप्रभावस्य स्वरूपम्। तच्च कार्यकलापे एव निर्भरम्, अतः कार्यं कथानकं वा त्रासद्याः साध्यं भवति।

(४) चरित्रचित्रणं कार्यव्यापारेण सह गौणरूपेण स्वत एव समायाति।

(५) कार्यव्यापारमन्तरा त्रासदी न भवितुमर्हति; चरित्रचित्रणं विना भवितुं शक्नोति।

(६) चारित्र्यस्याभिव्यञ्जकानि भाषणविचारादीनि सर्वथा परिष्कृतान्यपि तथा सारभूतकारुणिकप्रभावं नोत्पादयन्ति यथा कथानकानां घटनानां च कलात्मकविधानानि।

(७) त्रासद्याः प्रबलतमं रागात्मकतत्त्वं स्थितिविपर्ययाभिज्ञानरूपं कथानकस्यैवाङ्गम्।

(८) अत एव नवोदितकलाकारा भाषायाः परिष्कारे चरित्रचित्रणे च प्रथमं सिद्धिं लभन्ते, परन्तु कथानकस्य सफलनिर्माणे ते समयमपेक्षन्ते[2]। एतावता अरस्तूमहोदयस्य मते कथानकस्य सर्वाधिकं महत्त्वं सुस्पष्टम्। इदमत्र रहस्यम्--

तत्समये उपलब्धेषु साहित्येषु–(१) कथानकस्य प्रामुख्येन, (२) वस्तुवादिदृष्टिकोणे अमूर्तभावादिवर्णनापेक्षया मूर्तसङ्घटनादिवर्णनस्यैवाधिकमहत्त्वेन, (३) अनुकरणसिद्धान्ते चरित्रचित्रणाद्यपेक्षया कथावस्तुवर्णनस्य सहजतया, (४) रस-भाव-चरित्रवर्णनस्यापि माध्यमतयेतिवृत्तस्यैव सत्त्वेन अरस्तूमहोदयो नाटकादौ कथानकस्यैव माहात्म्यं प्रतिपादयाञ्चकार।

---

१. The Plot, then, is the first principle, and, as it were, the soul of a tragedy, Poetics VI.

२. Ibid.

"इतिवृत्तं तु काव्यस्य शरीरं परिकीर्तितम्" इत्येवं प्रतिपादयता भरतमुनिना नाट्ये शरीररूपेण स्थितात् कथानकात् "नहि रसादृते कश्चिदर्थः प्रवर्तते[१]" इत्येवं प्रतिपाद्य प्रधानीभूतस्य रसस्यात्मरूपत्वं सुस्थिरीकृतम्। एतच्च सर्वथा समुचितम्, यतो हि भारतीये नाट्यदर्शने वस्तु-नायक-रसेषु रस एव प्रधानतमः, 'रसो वै सः' इत्यादिश्रुत्या रसे एवात्मस्वरूपत्वम्, आत्माभिव्यक्तिरूपत्वं च। एवञ्चात्माभिव्यक्तिरूपस्य रसस्य सफलप्रकाशकतयैव कथावस्तुनोऽपि साफल्यम्। अत एव काव्यस्यात्मतत्त्वं रसध्वनिः। भारतीयविचारदृशा कथानकापेक्षया चारित्र्यस्याधिकं महत्त्वम्, चारित्र्यापेक्षया चात्मभूतस्य रसस्य। एवं त्वरस्तूमहोदयस्य विचाराद् भरतमुनेरयं विचारो युक्ततरः।

अपरं च 'नाट्ये रस-भाव-चरित्र-चित्रणापेक्षया कथानकस्यैवाधिकं महत्त्वम्' इत्यरस्तू-महोदयस्य कथनं प्रकारान्तरेणापि न स्वीकर्तुं योग्यम्। एतत्सम्बन्धे तेन यत्तु प्रतिपादितम्--'कथानकेन विना त्रासदी भवितुं नार्हति, किन्तु चरित्र-चित्रणं विना भवितुं शक्नोति' इति, तदपि न सर्वथा समीचीनम्; यतो घटनायाः कर्तृभोक्तृरूपेण पात्रमेव सङ्घटकम्। तद् विना कथानकमेव कथं घटेत ? कथानकेन सह पात्राणां मनोवृत्तीनां प्रधानसम्बन्धोऽस्ति। पात्रमनोवृत्तिद्वारैव सामाजिकमनोवृत्तयः प्रेरिताः प्रभाविताश्च भवन्ति। एतत्तत्वस्यालेखनमेव चरित्रे चित्रणं नाम। अतश्चरित्रचित्रणं विना कथानकं भवितुमर्हतीति तस्य कथनं न युक्तम्। अत एतदेव कथनं सर्वथा समीचीनं यत् कथानकं रागात्मकतत्त्वस्य वाहकम्, चरित्रचित्रणं तस्याधारः रसश्च तस्य परिणामः, अर्थाच्चरममुद्देश्यम्।

(४) कथावस्तुन आयामः

अरस्तूमहोदयस्य मते नाटकीय-कथावस्तुन आयामो यथासम्भवं सूर्यस्यैकपरिक्रमणस्य (अहोरात्रस्य) किञ्चित् तदधिकसमयस्य वा सीमायामाबद्धः, यद्यप्यरस्तूमहोदयात् पूर्वस्मिन् काले तथा समय-बन्धनं नासीत्।[२]

एतादृशः कथावस्तुनः सीमित आयामो भारतीये 'नाट्यशास्त्रे' अपेक्षितो नास्ति, अत एव संस्कृतनाटकेषु तादृश-समयबन्धनं नावलोक्यते। कथानकस्य पूर्णतायाः प्रदर्शने एवं समय-सीमा-बन्धनं नाप्युचितं नैव सङ्गतम्।

---

१. नाट्यशास्त्रे रसप्रकरणे।

२. Poetics V.

(५) कथानकस्यैकान्वितिः

यथा भारतीये नाट्यशास्त्रे आधिकारिक-कथावस्त्वाधारीकृत्यैव प्रासङ्गिकाना-मन्यकथानकानां पञ्चसन्धिद्वारा वर्णनस्य विधानं वर्तते, यथा च तेषां समेषां निर्वहणसन्धौ ऐकार्थ्योपनयनद्वारा कार्यान्वितेर्निरूपणं दृश्यते, तथैव अरस्तूमहोदयस्य 'काव्यशास्त्रेऽपि' कथानकस्य एकान्वितेः[1] प्रतिपादनं दृश्यते। अत्रापि मुख्यकथानकस्याङ्गतयैवान्येषां परस्पर-सम्बद्धानां कथानकानां वर्णनेन भवितव्यमिति निरूपितं वर्तते। तत्र कार्यान्वित्या सह स्थानान्वितिकालान्वित्योरप्यावश्यकत्वं प्रतिपादितं विद्यते। परन्तु भारतीये नाट्यशास्त्रे कालान्वितेः स्थानान्वितेश्चोपेक्षैवावलोक्यते; यतः पूर्णकथानक-प्रयोगे एतयोरन्वित्योर्विधानं नैव सम्भवम्, नापि समीचीनम्।

(६) कथावस्तुनः पूर्णता

अरस्तूमहोदयस्य विचारेणादिमध्यावसानयुक्तमेव कथावस्तु पूर्णम्। तादृशेनैव च पूर्णेन नाटकीयकथावस्तुना भाव्यम्। परन्तु भारतीये नाट्यशास्त्रे उपर्युक्तपूर्णत्वसमन्वितमेव कथावस्तु नाटकस्य साफल्याय न भवति, यदि तेन सहृदय-सामाजिक-जिज्ञासा-परितोषो न जायते। अतो भारतीयमतानुसारेण जिज्ञासापरितोष एव पूर्णताया निकषः।

(७) कथानकस्य सम्भाव्यता

कथानक-सम्भाव्यता-विषये उभयोर्मतं समानमेव। सम्भाव्यतागुणद्वारेणैव कथानकस्य काम्यत्वम्, अन्यथा असम्भाव्यतया निरूपाख्यप्रसङ्गापत्त्या तत्र सहृदयानां प्रवृत्तिरेव न स्यात्।

(८) इतिवृत्तस्य सहजविकासः

यथा भरतमुनिमते इतिवृत्तस्य सहजविकासो नाट्यसन्ध्यङ्गद्वारा भवति तथैव अरस्तूमतेऽपि संवृति[2]-विवृति[3]-स्थितिविपर्यया[4]भिज्ञान[5]द्वारा कथानकस्य सहजविकासो भवति।

---

१. Unity of Plot.

२. Complication.

३. Unravelling.

४. Reversal of Situation.

५. Recognition.

(६) कुतूहलम्

अरस्तूमहोदयमते नाटकीयकथानके कुतूहलस्य तत्परितोषस्य च निरूपणं नितरामावश्यकम्। सामाजिकानां पुरतः कुतूहलोत्पादनाय घटनानामुपस्थित्या अकस्मादेव भाव्यम्, किन्तु तत्र सूक्ष्मरूपेण कार्य-कारणभावेनापि भवितव्यम्[१]।

भरतमुनिना 'नाट्यशास्त्रे' सन्धिप्रयोजन-प्रतिपादनावसरे "आश्चर्यवदभिख्यातम्"[२] इति कथयता कथानके आकस्मिकतायाः कुतूहलस्य प्रतिपादनं कृतम्। 'कौतूहलोत्तरावेशो भवेत्तु परिभावना[३]' इति मुखसन्धेः परिभावनारूपप्रभेदे तथा 'अद्भुतस्य च सम्प्राप्तिर्भवेत्तदुपगूहनम्[४]" इति निर्वहणसन्धेरुपगूहनरूपप्रभेदे कुतूहलस्य स्पष्टं प्रतिपादनं वरीवर्ति।

त्रासद्याः संघटनार्थं यथा अरस्तूमहोदयेन प्रस्तावनो[५]पाख्यानोप[६] संहाराणां[७] निरूपणं कृतम्, तथा भारतीये नाट्यशास्त्रेऽपि प्रस्तावना-प्रासङ्गिक-कथावस्तु-फलागमादिषु तेषां प्रतिपादनं वर्तते।

एवं च अरस्तूमहोदयस्य भरतमुनेश्च नाट्यविषयकमौलिकविचारेऽतीव साम्यं विद्यते।

---

१. Poetics IX.
२. नाट्यशास्त्रे २१, ५४।
३. तत्रैव २१, ७५।
४. तत्रैव २१, १०३।
५. Prologue.
६. Episode.
७. Exode.

सुपद्मव्याकरण - प्रणेतुः पद्मनाभदत्तस्य कृतयः परिचयश्च

मीमांसा-न्याय-वेदाध्ययन-पटुतर-पण्डितमण्डितमिथिला-महीमण्डन-महावैयाकरण-पद्मनाभदत्तः पाणिनि-व्याकरणरहस्यं समुद्घाटयन् गभीर-पाणिनि-शास्त्र-सागरं प्रविविक्षूणां कृते सोपानरूपं स्वकीयं सुपद्मव्याकरणं विरचयाञ्चकार। व्याकरणेऽस्मिन् स संज्ञादिपारिभाषिकशब्दान् सौलभ्याय पाणिनीयानेव संस्थापयांबभूव।

पञ्चस्वध्यायेषु विभक्तेऽस्मिन् ग्रन्थे प्रत्याहार-संज्ञा-सन्धि-षत्व-णत्व-कारक-विभक्ति-सर्वनाम-सन्-ङित्-यङ् यङ्लुगन्त-नामधातु-लकारार्थ-कृदुणादिप्रत्यय-समासालुक्-पुंवद्भाव-समासाश्रयविधि-तद्धित-तन्मध्यगत-स्त्रीप्रत्ययाँश्च निरूपयामास। व्यवहारे वैदिक-शब्दप्रयोगस्याल्पतया केवलं लौकिकसंस्कृतशब्दानेव संसाधयामास। स्वकीयव्याकरणस्य पञ्चाध्याय्यामेव पाणिनेरष्टाध्यायीं संक्षिप्तयाञ्चकार। पाणिनेश्चतुः-सहस्रसंख्याकानि सूत्राणि असौ सप्तविंशत्यधिकद्विशतसहितत्रिसहस्र-संख्यात्मकसूत्रेषु अन्तर्भावयां बभूव। कानिचित् पाणिनि-सूत्राणि ततृस्वरूपाण्येव संस्थापयामास कानिचिच्च परिवर्तितरूपाणि।

पाणिनीयाष्टकस्य कष्टग्राह्यतामभिलक्ष्य पद्मनाभदत्तः तत्र सौकर्येण बालानां प्रवेशाय ग्रन्थमिमं प्रणिनायेति विज्ञायते।

शब्दशास्त्रपारङ्गतस्यास्य पद्मनाभदत्तस्य सुपद्मव्याकरणातिरिक्ताः अन्येऽपि निम्नलिखिता द्वादश ग्रन्थाः समुपलभ्यन्ते--

1. सुपद्मपञ्जिका
2. प्रयोगदीपिका
3. धातुकौमुदी-धातुचन्द्रिका
4. उणादिवृत्तिः
5. पृषोदरादिवृत्तिः
6. यङ्लुग्वृत्तिः
7. परिभाषावृत्तिः
8. भूरिप्रयोगकोषः
9. आचारचन्द्रिका
10. शिशुपालवधमहाकाव्यस्य आनन्दलहरी टीका

11. गोपालचरितम्

12. छन्दोरत्नञ्च।

1. **सुपद्मपञ्जिका**--सुपद्मव्याकरणस्य व्याख्यानभूतेयं सुपद्मपञ्जिका, यत्र पद्मनाभदत्तः स्वविरचितसूत्राणामौचित्यं सविवरणं सुस्पष्टयति।

2. **प्रयोगदीपिका**--अन्वर्थनामिकेयं प्रयोगदीपिका सुपद्मव्याकरणस्यावगमनाय प्रयोग-साधनिकां प्रदर्शयन्ती कृत्-तद्धित-कारक-सन्धि-समासान् पञ्चसु अध्यायेषु विवृण्वती नितरां-समुपयोगिनी।

3. **धातुकौमुदी अथवा धातुचन्द्रिका**--पाणिनि-प्रक्रियामनुसरन्ती भ्वाद्यदादि-जुहोत्यादि-रूपेण धातुगणान् निर्दिशन्ती पद्मनाभदत्तस्य कृतिरियं धातुकौमुदी सौपद्मान् धातून् विवृणोति।

4. **उणादिवृत्तिः**--अध्यायद्वयात्मिका अन्वर्थनाम्नी पद्मनाभदत्तस्येयं कृतिः उणादिवृत्तिः, यस्यां स्वर-व्यञ्जन-प्रत्ययानां विवरणं वरीवर्ति।

5. **पृषोदरादिवृत्तिः**--उणादिवृत्तेः परिशिष्टतया विरचिता पृषोदरादिवृत्तिः, यत्र यथोपदिष्टशब्दानां निष्पन्नत्वं प्रदर्शितं वरीवर्ति।

6. **यङ्लुग्वृत्तिः**--कस्मिन्नर्थे यङ् यङ्लुक् च भवत एतस्य सविस्तरं विवरणं यङ्लुग्वृत्तौ प्रदत्तं ग्रन्थकृता। प्रसङ्गात् सन् क्यच् काम्यच्-नामधातुप्रयोगाः सप्रक्रियाश्चात्र प्रदर्शिताः।

7. **परिभाषावृत्तिः**--सुपद्मव्याकरणे समागतानां परिभाषाणां विवरणं-परिभाषावृत्तौ वरीवर्ति। अत्र काश्चित् परिभाषाः पाणिनीय-परिभाषा अनुसरन्ति, काश्चिच्च तद्भिन्नतां प्रदर्शयन्ति। इयमेव परिभाषावृत्तिः मातृकायां पद्मनाभदत्तस्य सर्वाः कृतीः[1] संसूचयति।

---

१. दिङ्मात्रं दर्शितं किन्तु सकलार्थ-(वि) प्रकाशनम्।
धैर्यावधेयं (तद्)धीराः (श्री) पद्मनाभ-निवेदितम्।।
उक्तो व्याकरणादर्शः सुपद्मस्तस्य पञ्जिका।
ततो हि बालबोधाय प्रयोगाणां च दीपिका।।
उणादिवृत्तिः रचिता तथा च धातुकौमुदी।
तथैव यङ्लुको वृत्तिः परिभाषास्ततः परम्।।
गोपालचरितं नाम साहित्ये ग्रन्थरत्नकम्।
आनन्द लहरी टीका माघे काव्ये विनिर्मिता।।
छन्दोरत्नं छन्दसि च स्मृतावाचारचन्द्रिका।
कोशे भूरिप्रयोगाख्यो रचितो यत्नतस्ततः।। परिभाषावृत्तौ।

8. **भूरिप्रयोगकोषः**--अन्वर्थनामा ग्रन्थोऽयं भूरिप्रयोगकोषः बहूनां प्रयोगाणामेकत्र कोषरूपेण संग्रहं विदधाति।

9. **आचारचन्द्रिका**--आचारशास्त्रमधिकृत्य विरचितेयम् आचारचन्द्रिका पद्मनाभदत्तस्य विभिन्नाचारविषयकं विशिष्टं ज्ञानं निर्दिशति।

10. **शिशुपालवधमहाकाव्यस्य आनन्दलहरी टीका** – गम्भीरस्य शिशुपालवधमहाकाव्यस्य आनन्दलहरी नामिकेय टीका रचयितुर्विविधशास्त्राध्ययनजन्यव्युत्पत्तिं प्रदर्शयन्ती सहृदयपाठकान् आनन्दलहर्यां निमग्नान् करोति।

11. **गोपालचरितम्** –गोपालकृष्णविषयकं मधुरचरितमाधारीकृत्य पद्मनाभदत्तेन विरचितं मनोहरकाव्यमिदं संसूचयति यन्महावैयाकरणोऽयं न केवलं शुष्कव्याकरणशास्त्र- प्रणयने एव निपुणः, अपि तु सरस-मधुर-काव्यविरचनेऽपि तथैव कुशलः।

12. **छन्दोरत्नम्**--गोपालचरितकाव्यरचनया पद्मनाभस्य विशिष्टकाव्यनिर्माणपाटवं संसिद्धम्। काव्य-रचना च छन्दोज्ञानाधीना। अतः स्वकीयं छन्दोंविषयकं विशिष्टं ज्ञानं प्रदर्शयितुं पद्मनाभः छन्दोरत्नं प्रणिनाय।

एतैरुपलब्धैः त्रयोदशभिर्ग्रन्थैः पद्मनाभदत्तस्य विविधशास्त्राध्ययनजन्यं विशिष्टं नैपुण्यं परिलक्ष्यते।

पद्मनाभस्य देशकालादि-परिचयः--

संस्कृतविपश्चितः स्वकीय-परिचय-प्रदाने यथा कृपणाः तथा नायं पद्मनाभदत्तः। एतस्य रचनाभिः अस्य देशकालादिपरिचयः सुस्पष्टं प्राप्यते। पद-वाक्य-प्रमाण-पारावारीणानां विदुषां जन्मभूमौ मिथिलायां दरभङ्गामण्डलान्तर्गत-भौरग्रामे महावैयाकरणोऽयं प्रादुरभवत्। अयम् श्रीदत्तस्य पौत्रः, दामोदरदत्तस्य तनूज आसीदिति 'सुपद्मपञ्जिका' ग्रन्थान्तः[१] साक्ष्येण प्रमीयते।

"शाके शैलनवादित्ये" इति पृषोदरादिवृत्तेरुपसंहारे स्पष्टोल्लेखात् सप्तनवत्यधिकद्वादशशकाब्दे (1297) तदनुसारम् पञ्चसप्तत्यधिकत्रयोदशख्रिष्टाब्दे (1375) पृषोदरादिवृत्तेर्विरचनात् ख्रिष्टीयचतुर्दशशतकोत्तरार्धेऽयं पद्मनाभदत्तः स्वजनुषा

---

१. इतिश्रीदत्तपौत्र-दामोदरसुत-श्रीयुत पद्मनाभदत्त-विरचितायां सुपद्मविवरणपञ्जिकायां प्रथमाध्यायस्य प्रथमः पादः। सुपद्मपञ्जिका।

मिथिलामहीं समलंचकार। अतो ये केचन पद्मनाभदत्तं कर्णाटवंशीयमहाराजस्य मिथिल शासकस्य नान्यदेवस्य समकालिकं मन्यन्ते ते भ्रान्ताः, यतो हि मिथिलाशासकः प्रसिद्धो नान्यदेवः एकोनविंशत्यधिकदशशतशकाब्दे (1019) सप्तनवत्यधिकदशशत ख्रिष्टाब्दे (1097) मिथिलायां वासं व्यधातृत[१]। अस्यैव अतिवृद्धप्रपौत्रः प्रसिद्धो हरिसिंहदेवो बभूव, यो हि चतुर्विंशत्यधिकत्रयोदशशतख्रिष्टाब्दे गयासुद्दीन तुगलकेन उपद्रुतः सिमरौनगढस्य स्वराजधानीं विहाय नेपालोपत्यकायां जगाम। नान्यदेवस्य उपर्युक्तः ख्रिष्टीयैकादशशतकोत्तरार्द्धकालः विजयसेनस्य देवपाराशिलालेख[२]प्रमाणेनापि निश्चीयते। अतश्चतुर्दशशतकोत्तरार्द्धभवः पद्मनाभदत्तः एकादशशतकोद्भवस्य नान्यदेवस्य समकालिको भवितुं नैवार्हति।

पद्मनाभदत्तोऽयं गोपीजनवल्लभगोपालश्रीकृष्णोपासकः परमवैष्णवः आसीदिति गोपालचरितकाव्येन उणादिवृत्ति-यङ्लुगवृत्ति-सुपद्मपञ्जिकादिग्रन्थारम्भकृतमङ्गलवचनेन च निश्चीयते।

मिथिलायां निर्मितस्य सुपद्मव्याकरणस्य प्रचारः अध्ययनाध्यापने च तदानीन्तने बङ्गप्रान्ते (गौडदेशे) विशेषतः जैसोर-खुलना-चौबीसपरगना-फरीदपुर-प्रभृति मण्डलेषु अभूवन्। मिथिलादेशेन सह बङ्गदेशस्य गाढसम्बन्ध-सूचकमिदमिति शम्।

---

१. नन्देन्दु-बिन्दु विधुसम्मित शाकवर्षे
तच्छावणे सितदले मुनिसिद्धतिथ्याम्।
स्वात्यांशनैश्चरदिने करिवैरिलग्ने
श्रीनान्यदेव नृपतिर्व्यदधीत वास्तुम्।।
– सिमरौन गढशिला लेखः नेपालवंशावली च।

२. त्वं नान्यवीर-विजयीति गिरः कवीनां
श्रुत्वाऽन्यथा मनन रूढ-निगूढरोषः।
तथा
शूरंमन्य इवासि नान्य! किमिह त्वं राघव! श्लाघसे ...।।
– देवपाराशिलालेखः २०, २१।

परा विद्या परात्मा च

'पराविद्या' इत्यस्या विचारप्रसङ्गे प्रमाणान्तरनिरपेक्षस्य स्वतः प्रमाणभूतस्य वेदस्य उपनिषदात्मकं शिरोरत्नमेव सन्देहान्धकारमपाकर्तुं सिद्धान्त-प्रभाकरञ्च प्रकटयितुं विचारसरणौ शरणम्। सम्पूर्णवेदस्य आध्यात्मिको हि तात्त्विकसिद्धान्तः ब्रह्मविद्यापरासु उपनिषत्स्वेव निहितः। अत एव वेदस्यायं भागः वेदान्त इति नाम्ना प्रसिद्धिमादधानः प्रस्थानत्रयीमध्ये प्राधान्यं भजते। ब्रह्मविद्या-विषयिकायाम् आध्यात्मिकमीमांसायाम् ईशाद्या दशोपनिषदः प्राधान्यमादधते। एतासु अन्यतमां मुण्डकोपनिषदमाधारीकृत्य प्रकृतविषयकविचारो विधीयते--

परां विद्यां जिज्ञासमानः महाशाल शौनकऋषिः महर्षिमङ्गिरसं पप्रच्छ-- "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विजानाति" इति।

तत्त्वज्ञो हि महर्षिरङ्गिराः प्रत्युवाच-"द्वे विद्ये वेदितव्ये इति स्म यद् ब्रह्मविदो वदन्ति। परा चैवापरा च।।४।। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।।५।।" इति। अर्थात् यया विद्यया परब्रह्मपरमात्मनस्तत्त्वज्ञानं जायते सा परा विद्या वा ब्रह्मविद्येत्युच्यते। ब्रह्मविद्याया निरूपणं यतो वेदेष्वेव वर्तते अतस्तदतिरिक्तस्यैव वेदाङ्गभागस्य अपरविद्यात्वम्।

ब्रह्मविद्यया यस्य परब्रह्मणो ज्ञानं भवति तत्परब्रह्म कीदृशमिति जिज्ञासायाम् ततूस्वरूपं प्रतिपाद्यते--

"यत् तददृश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रम् तदपाणिपादम्।

नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः।।[१]

अयमाशयः तद्ब्रह्म ज्ञानेन्द्रियैर्ज्ञातुम् तथा कर्मेन्द्रियैर्ग्रहीतुं योग्यं नास्ति। तद्गोत्राद्युपाधिरहितं ब्राह्मणादिवर्णगतभेदैः नीलपीतादिवर्णभेदैश्च रहितं वर्तते। तत् नेत्रकर्णादिज्ञानेन्द्रियैः हस्तपादादि-कर्मेन्द्रियैश्च रहितं विद्यते। तन् नित्यम् अविनाशि,

---

१. मुण्डकोपनिषद् ६।

व्यापकम् अन्तरात्मरूपेण सर्वगतम्, अत्यन्तसूक्ष्मं, निर्विकारमस्ति। ज्ञानिनः समस्तभूतजातस्य कारणं तत् सर्वत्र परिपूर्णं पश्यन्ति।

समस्तं जगत् तस्मात् कथमुत्पद्यते इति जिज्ञासायाम् उच्यते--

"यथोर्णनाभिः सृजते गृह्णते च
यथा पृथिव्यामोषधयः सम्भवन्ति।
यथा सतः पुरुषात् केशलोमानि
तथाक्षरात् सम्भवतीह विश्वम्"।।[१]

अर्थात् अक्षररूपं परमात्म-परब्रह्म एवास्य जड़-चेतनात्मकसमस्तविश्वस्य निमित्तमुपादानं च कारणम्। एतदेव दृष्टान्तत्रयेण विशदीक्रियते।

1. यथोर्णनाभिः स्वोदरस्थं जालं बहिर्निःसार्य प्रसारयति पुनश्च तन्निगिलति तथैवेदं परब्रह्म स्वोदरस्थं सूक्ष्मरूपेण अवस्थितं जडचेतनात्मकं जगत् सर्गादौ सृजति पुनश्च प्रलये स्वस्मिन्नेव गृह्णाति। अत एव गीतायाम् प्रतिपाद्यते –

   सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
   कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्।।[२]

2. यथा च पृथिव्यां नानाविधानि अन्न-तृण-वृक्ष-लतादीनि औषधिबीजानि भवन्ति तदनुरूपाण्येव अन्नादीनि उत्पद्यन्ते, तत्र पृथिव्याः कश्चित् पक्षपातो नास्ति, तथैव विभिन्नकर्मरूप-बीजानुसारेण विभिन्नजीवरूपाणि भवन्ति। अत एव परमात्मनः वैषम्य-नैर्घृण्यादिदोषलेशो नास्ति।
3. यथा च जीवितमनुजशरीरात् नख-केश-रोमाणि स्वतः समुत्पद्यन्ते तथैव परब्रह्मपरमेश्वरात् जगन्ति स्वतो भवन्ति विभवन्ति च।

अतः परमकारणरूपस्य परब्रह्म – परमात्मनः तात्त्विकसाक्षात्कारो यया विद्यया जायते सा परा विद्या। एतया च यदक्षरमधिगम्यते तदेव परात्मा। अस्यैव परात्मनो ज्ञानेन--

"भिद्यते हृदय-ग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"।।[३]

इत्येवं रूपेण छिन्नसर्वसंशयो ज्ञानवान् निरञ्जनः परमं साम्यमुपैति।

---

१. तत्रैव ७।
२. गीता ६। ७।
३. मुण्डकोपनिषद् २, ८, ५ वि० पु० अंश ६।

एतत्सम्बन्धे अमुमेवार्थं स्मरति भगवान् मनुः--

"द्वे ब्रह्मणी तु विज्ञेये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।
द्वे विद्ये वेदितव्ये इति चाथर्वणी श्रुतिः।
परया त्वक्षरप्राप्तिः ऋग्वेदादिमयाऽपरा।। इति।

परब्रह्म निरूपयन्ती तत्रैव मनुस्मृतिः प्रतिपादयति--

यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम्।
अनिर्देश्यस्वरूपञ्च पाणिपादाद्यसंयुतम्।।
व्याप्यव्याप्तं यतः सर्वं यद् वै पश्यन्ति सूरयः।
तद् ब्रह्म परमं धाम तद्ध्येयं मोक्षकाङ्क्षिभिः।।
श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम्।
तदेव भगवद्वाच्यं स्वरूपं परमात्मनः।। इति।

एतदेव तत्त्वं प्रकारान्तरेण प्रतिपादयति ईशावास्योपनिषद्--

"विद्यां चाविद्यां च यस्तद् वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।

अत्र विद्यापदेन परा विद्यैव गृह्यते। अविद्यापदेन च ब्रह्मविद्यातो भिन्नस्य यज्ञादिरूपकर्मानुष्ठानस्य ग्रहणं भवति न तु प्राकृतस्याज्ञानस्य। ईशोपनिषदः –

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।"

इत्येतेन मन्त्रेण शास्त्रविहितकर्मणां यावज्जीवं विधानं क्रियते। एवञ्चात्र यन्निर्दिश्यते तदेवोपर्युक्तमन्त्रे अविद्यापदेन प्रतिपाद्यते।

अत एव विष्णुपुराणे –

"विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथाऽपरा।
अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते।।[१]

इत्युच्यते।

इदमत्र निष्कर्षतो विज्ञेयम्-पराविद्या ब्रह्मविद्या वेति शब्दः मुख्यरूपेण ब्रह्म साक्षात्कार-बोधकः। अमुख्यरूपेण ब्रह्मसाक्षात्कारज्ञानसाधकानाम् उपनिषद्गीतादि-शास्त्राणामपि संज्ञकः। अत एव अध्यात्मप्रधानगीतादिग्रन्थान्ते 'ब्रह्मविद्यायाम्' इति प्रयुज्यते इतिशम्।

---

१. विष्णु पुराणम् अंशः ६।

शाङ्कर-वेदान्तदर्शनस्य प्रासङ्गिकता

नारायणं पद्मभवं वसिष्टं शक्तिं च तत्पुत्रपराशरं च।
व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम्।।
श्रीशङ्कराचार्यमथास्य पद्मपादं च हस्तामलकं च शिष्यम्।
तं त्रोटकं वार्त्तिककारमन्यानस्मद्गुरून् संततमानतोऽस्मि।।
श्रुति-स्मृति-पुराणानामालयं करुणालयम्।
नमामि भगवत्पादं शंकरं लोकशंकरम्।।

नारायण-पद्मनाभ-वसिष्ठ-शक्ति-पराशर-व्यास-शुकानाम् गुरु-शिष्य-परम्परायाम् योगीन्द्रगोविन्दाचार्य-शिष्यवर्य्याणाम् विश्ववन्द्यानाम् करुणावरुणालयानाम् अनन्तश्री-विभूषितानाम् भगवत्पादश्री-शङ्कराचार्याणाम् अद्वैतवेदान्तदर्शनस्य विश्वविश्रुतमहत्त्वस्य प्रासङ्गिकताविषये अधुनातनाः कतिपयजना जिज्ञासमानास्तदुपयोगितासम्बन्धे संशेरते इति चेखिद्यते चेतः। जिज्ञासा-समाधानात् पूर्वं वेदान्तदर्शन-संक्षिप्त-परिचयः परमावश्यकः।

अस्माकं भारते देशे प्रथमे मन्त्र-द्रष्टारः ऋषयो[1]-महर्षयो बभूवुः। ते वेदमन्त्रान् प्रत्यक्षीकृत्य उपदेशेन मुनिभ्यः मन्त्रान् सम्प्रददुः। वेदशास्त्रार्थावगन्तारो मुनयः तत्त्वतो वेदार्थमवगत्य उपदेशेन वेदार्थं तत्त्वतोऽवगन्तुमशक्तानां सुखग्रहणाय वेद-वेदाङ्गानि समाम्नासिषुः[2]।

ततश्च आचार्याः[3] शिष्यान् आचार-ग्रहणोपदेशपूर्वकम् बुद्धिं विशदयन्तः सरहस्यानि वेद-वेदाङ्गानि अध्यापयामासुः। उपनिषद्-ब्रह्मसूत्र-गीतात्मक-प्रस्थानत्रयी-भाष्याकाराः इमे आचार्याः स्वज्ञान-विज्ञानानुसारं स्वसिद्धान्त-प्रतिष्ठापकाः

---

१. ऋषिर्दर्शनात्। स्तोमान् (मन्त्रान्) ददर्शेत्यौपमन्यवः।
— निरुक्ते २।३।१२।
तद्यदेनान् तपस्यमानान् ब्रह्म स्वयम्भु अभ्यानर्षत् त ऋषयोऽभवन् तद्‌ऋषीणाम् ऋषित्वमिति ह विज्ञायते।
— तत्रैव उद्धृतं ब्राह्मणम्।

२. साक्षात्कृतधर्माण ऋषयो बभूवुः।
तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं--समाम्नासिषुर्वेदं च वेदाङ्गानि च। तत्रैव ६।१।२०।

३. आचार्यः आचारं ग्राहयति आचिनोत्यर्थान् आचिनोति बुद्धिमिति वा। निरुक्ते १।२।२।
उपनीय तु यः शिष्यं वेदमध्यापयेद द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।। मनुः २।१४०।

अभूवन्। तत्र न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्तरूपेषु षट्सु आस्तिक-दर्शनेषु प्रमुखस्य वेदान्तदर्शनस्य निम्नोक्ताः सिद्धान्तवादाः प्रचलिताः--

१. जगद्गुरुशंकराचार्यस्य	– अद्वैतवादः	शारीरकभाष्यम्।
२. भास्कराचार्यस्य	– औपाधिक भेदाभेदवादः	भास्करभाष्यम्।
३. रामानुजाचार्यस्य	– विशिष्टाद्वैतवादः	श्रीभाष्यम्।
४. मध्वाचार्यस्य	– द्वैतवादः	पूर्णप्रज्ञभाष्यम्।
५. निम्बार्काचार्यस्य	– द्वैताद्वैतवादः	वेदान्तपारिजातभाष्यम्।
६. श्रीकण्ठाचार्यस्य	– शैवविशिष्टाद्वैतवादः	शैवभाष्यम्।
७. श्रीपत्याचार्यस्य	– वीरशैवविशिष्टाद्वैतवादः	श्रीकरभाष्यम्।
८. वल्लभाचार्यस्य	– शुद्धाद्वैतवादः	अणुभाष्यम्।
९. विज्ञानभिक्षोः	– अविभागाद्वैतवादः	विज्ञानामृतभाष्यम्।
१०. बलदेवविद्याभूषणस्य	– अचिन्त्यभेदाभेदवादः	गोविन्दभाष्यम्।

एतानि सर्वाण्यपि दर्शनानि परमतत्त्वं ज्ञातुं परमपुरुषार्थं च अवाप्तुं प्रवर्तितानि। विभिन्नमार्गाण्यपि एकोद्देश्यकान्येव। यथा हि प्रतिपादयति "महिम्नः स्तोत्रम्"--

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति,
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषाम्
नृणामेको गम्यस्त्वमसि पयसामर्णव इव।।

एवं सत्यपि जगद्गुरुशंकराचार्यस्य अद्वैतवेदान्तसिद्धान्तः मुकुटायते, यतो हि विवेकिनो निर्भ्रान्तं निगदन्ति –

"आचार्याः शङ्कराचार्याः मतमद्वैतमेव च।।" इति।

प्रवर्तकाचार्यगौरव-तारतम्य - विचारणयापि भगवत्पादशंकराचार्यस्य गौरवमतिशेते। यतो हि अद्वैतसिद्धान्तप्रवर्तकः शंकरभगवत्पादः त्रिमूर्त्यन्तर्गत-भगवच्छङ्करावतारपुरुषः। विशिष्टाद्वैतप्रवर्तकः भगवद्रामानुजाचार्यः अनन्तावतारपुरुषः। द्वैतवादप्रवर्तकः पूज्यमध्वाचार्यः वाय्ववतारपुरुष इति मन्यते। तत्र वाय्वनन्तयोरुत्कर्षतारतम्ये विप्रतिपत्तिसंभवेऽपि उभयापेक्षा शङ्करोत्कर्षे न कस्यापि

विप्रतिपत्तिरिति शङ्करावतारस्य शङ्करभगवत्पादस्य गौरवं निःसंशयमतिशायि। भगवद्विष्णववतार-पुरुषस्य बादरायणस्य कृष्णद्वैपायनस्य तात्पर्यं तत्समकक्ष्यो भगवान् शंकर एव यथावदवगन्तुं शक्नोतीति मन्वानाः मनीषिणः ब्रह्मसूत्राणामपि उपनिषदामिव अद्वैते एव तात्पर्यं न द्वैते न वा विशिष्टाद्वैते इति तर्कयन्ति।

अद्वैतवादः – "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैवनापरः"

इति स्वीयसिद्धान्तनादं समुद्घोषयति। ब्रह्मणः स्वरूपनिरूपात्मकं च उपनिषदादि-वाक्य-चयं प्रदर्शयति –

सत्यं ज्ञानमनन्तं ब्रह्म। आनन्दं ब्रह्मेति व्यजानात्[१]।

एकमेवाद्वितीयं ब्रह्म[२]।

ब्रह्म वा इदमेक एव अग्र आसीत्[३]।

सदेव सौम्येदमग्र आसीत्। एकमेवाद्वितीयम्[४]।

आत्मा वा इदमेक एव अग्र आसीत्[५]।

ब्रह्मैवेदं विश्वम्[६]।

आत्मैवेदं सर्वम्[७]।

नेह नानास्ति किञ्चन[८]।

ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत् त्वमसि।[९]

स्वधया तदेकम्[१०]।

एकं सद् विप्रा बहुधा वदन्ति[११]।

---

१. तैत्तिरीयोप० २।१।१।
२. छान्दोग्योप० ६।२।१।
३. बृहदारण्यकोप० १।४।१०।
४. छान्दोग्योप० ६।२।१।
५. ऐतरेयोप० १।१।
६. मुण्डकोप० २।२।१२।
७. छान्दोग्योप० ७।२५।२।
८. बृहदारण्यकोप० ४।४।१९।
९. छान्दोग्योप० ६।८।७।
१०. ऋग्वेदे १०।१२९।
११. तत्रैव १।६४।४६।

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।

आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्।।[1]

वासुदेवः सर्वमिति स महात्मा सुदुर्लभः[2]।

प्रज्ञानं ब्रह्म[3]।

अहं ब्रह्मास्मि[4]।

अयमात्मा ब्रह्म[5]।

इत्यादि श्रुति-स्मृति-वाक्यैः ब्रह्मणः सत्यत्वम्, ज्ञानत्वम्, अनन्तत्वम्, आनन्दत्वम्, अद्वितीयत्वम्, आत्मस्वरूपत्वम्, सच्चिदानन्दस्वरूपत्वमवगम्यते। एवंविधानि अभेदप्रतिपादकानि श्रुति-स्मृति-वाक्यानि आधारीकृत्य श्रीशङ्कराचार्यः विरोधिमत-निरसन-पुरस्सरम् अद्वैतवादं प्रतिष्ठापयाञ्चकार।

एतदेवाद्वितीयं ब्रह्म जगतो जन्मादेः – उत्पत्तिस्थितिलयादेः – कारणमिति –

"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति।

यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व। तद्ब्रह्म[6]।।"

इति श्रुतिप्रमाणेन प्रतिपाद्यते। एतत् प्रतिपादकस्य "जन्माद्यस्य यतः[7]" इति ब्रह्मसूत्रस्य व्याख्यानं विदधता भगवता शङ्कराचार्येण "यतो वे"त्यादि श्रुतिवाक्यस्य स्वरूपनिर्णायकम् –

"आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते।

आनन्देन जातानि जीवन्ति।

आनन्दं प्रयन्त्यभिसंविशन्ति।।"[8]

---

१. दृग्दृश्यविवेके २०।
२. गीता ७।१९।
३. ऐतरेयोप०
४. बृहदारण्यकोप०
५. माण्डुक्योप०
६. तैत्तिरीयोप० ३।१।
७. ब्रह्मसूत्रम् १।१।२।
८. तैत्तिरीयोप० ३।६।

इति श्रुतिवाक्यम् स्वकीये भाष्ये समुद्धरता आनन्दरूपब्रह्मणः जगत्कारणत्वं निर्दिष्टम्। इदमेव तत्त्वं "शास्त्रयोनित्वात्[1]" इत्यादिना प्रकट्यते। एतेन ब्रह्म जगतः कारणमिति निश्चीयते। अत्रेदं जिज्ञास्यते – किमेतद् ब्रह्म जगतः समवायिकरणम् उताहो निमित्तकारणम् ? समवायिकारणत्वे ब्रह्मणः परिणामित्वात् तस्य कूटस्थत्व-व्याघातः। यद्यत् परिणामि द्रव्यम् तत्तज् जडम्, यथा मृत्तिकादि–इति व्याप्तिग्रहात् ब्रह्मणो जडत्वापत्तिश्च।

यदि नाम ब्रह्म निमित्तकारणम् तर्हि 'एक विज्ञानेन सर्वविज्ञानं भवती'ति श्रुत्युक्तम् असंगतं स्यात्। नहि निमित्तकारणविज्ञानेन सर्वस्य कार्यस्य विज्ञानं भवति। नहि स्वर्णकारे विज्ञाते सर्वाभूषणस्य विज्ञानं भवति। किञ्च "वाचारम्भणं विकारो नामधेयम् मृत्तिकेत्येव सत्यम्[2]" इत्यनेन समवायिकारणस्यैव सत्यत्वं निश्चितम्। अतः प्रकृते ब्रह्मणि पूर्वोक्तरीत्या कारणानिश्चयेऽपि शुक्तिरजतस्थले यथा उपादानकारण-निमित्तकारणयोरुभयोरेकत्र सन्निवेशस्तथा ब्रह्मण्यपि उभयोः स्थितिः मान्या। तथा हि शुक्तौ रजतं साक्षात्करोमीत्यत्र शुक्तिरजतं प्रति शुक्त्यविद्योपादानं कारणम्। तथैव अत्यन्तम् अज्ञातायां शुक्तौ, अर्थात् अधिष्ठाने एव अज्ञाते, न भवति शुक्ति-रजतोत्पत्तिः। अतः इदन्त्वेन सामान्यतो ज्ञाता शुक्तिनिर्मित्तकारणम्। विशेषतोऽज्ञाता सा उपादानकारणम्। अस्यैव कारणताद्वयस्य समावेशः विवर्तपदेनोच्यते। एवञ्च समसत्ताककार्यापत्तिः उपादानम्। विषमसत्ताककार्यापत्तिः विवर्त इत्युक्तं भवति। तथा च शुक्ति-रजतं शुक्त्यविद्यायाः परिणामः, शुक्तेश्च विवर्त इति सिद्ध्यति। प्रकृते च ब्रह्मणो भूतानि जायन्ते इत्यत्र भूतानि ब्रह्मात्मविषयिकायाः अविद्यायाः परिणामः, ब्रह्मणश्च विवर्त इति ज्ञेयम्। शुक्तौ रजतम् इत्यत्र शुक्तिज्ञाने संजाते यथा रजतज्ञानं बाधितं भवति तथैव ब्रह्मणि जगत् इत्यत्र "नेह नानास्ति किञ्चन" इत्यादिना अद्वितीयब्रह्मणो ज्ञाने सति जगतो ज्ञानम् बाधितं भवति। अत एव ब्रह्मज्ञानात् पूर्वम् जगतो व्यावहारिकसत्ता स्वीक्रियत एव। अतः शाङ्कर-वेदान्ते ब्रह्मणः पारमार्थिकसत्ता जगतो व्यावहारिकसत्ता तथा शुक्तिरजतस्य प्रातिभासिकसत्ता अङ्गीक्रियते।

"ब्रह्म सत्यं जगन्मिथ्या" इति जगतो मिथ्यात्वं तु न गगनकुसुमत्वम्, अपि तु अनिर्वचनीयत्वम्। यथा हि--

"नासद्रूपा न सद्रूपा माया नैवोभयात्मिका। अनिर्वाच्या"

---

१. ब्रह्मसूत्रम् १।१।३।

२. ब्रह्मसूत्रम्

तथैव - जगत् न सद्रूपम्, नासद्रूपम् नैवोभयात्मकम् अपि तु अनिर्वचनीयम्। अर्थात् सदसद्विलक्षणत्वं मिथ्यात्वं जगति वर्तते इति फलितम्।

ये केचन सत्त्वासत्त्वयोरनधिकरणं वस्तु अप्रसिद्धमिति निगदन्ति तन्न, अद्वैतिनां मते – यत् न सद् भवति तत् असद् भवति इति नास्ति। यत् न असद् भवति तत् सद् भवति इत्यपि नास्ति। सत्त्वासत्त्वयोरनधिकरणं वस्तु न भवतीति न तेषां मतम्।

त्रिकालाबाध्यत्वं सत्त्वम्। तच्च एकस्मिन् ब्रह्मणि। यत् कदापि प्रतीतिविषयं न याति तत् असत्। यथा गगनकुसुमम्। अत एव "अद्वैतसिद्धौ" त्रिकालाबाध्यत्वरूप-सत्त्व-व्यतिरेको न असत्त्वम्, किन्तु क्वचिदुपाधौ सत्त्वेन प्रतीयमानत्वानधिकरणत्वम्" मिथ्या तु प्रतीयते। अतः प्रतीति-विषयकत्वात् शुक्ति-रजतं न मिथ्या। एवमेव सत्त्वासत्त्वयोरभावरूपं विलक्षणं मिथ्यात्वं जगति वर्तते इति अद्वैतवादिनां मतम्।

केचित्तु मिथ्यात्वं नाम अर्थक्रियाकारित्वम्। अर्थक्रियाकारित्वं तु सप्रयोजनत्वम्। जगत् सप्रयोजनम् इति सर्वदर्शनानां मतम्। अतः व्यावहारिकसत्यत्वं जगतः भगवत्पादैरपि अभ्युपगम्यते।

यत्तु–"ततस्तु तं पश्यते निष्कलं ध्यायमानः[1]"

"परात्परं पुरुषमुपैति दिव्यम्[2]"

"यतो वा इमानी"त्यादि-भेदघटकश्रुतिवाक्यैः ब्रह्म-जगतोः ब्रह्मजीवयोर्वास्तविकभेदं मन्यमानाः अद्वैतवादमाक्षिपन्ति तन्न, "अहिकुण्डलवदुभयव्यपदेशात्[3]" यथा हि अहि-कुण्डलयोर्वास्तविकभेदाभावेऽपि अहिकथनेन अभेदस्य कुण्डलाभोगादि-कथनेन भेदस्य च प्रतीतिर्जायते तथैव ब्रह्मजीवयोर्ब्रह्मभूतयोर्वा वास्तविकाभेदः आविद्यिकभेदश्च प्रतीयते। यथा वा सविता तदाश्रितसावित्रप्रकाशश्च[4] उभयोरपि तेजस्त्वात् तौ अभिन्नौ अपि भेदव्यपदेशभाजौ भवतः, तथैव प्रकृतेऽपि भेदाभेदयोः सामञ्जस्यम् जायते। एवं हि शाङ्कर-वेदान्तानुसारं जगतो मिथ्यात्वं न गगनकुसुमायमानम्, अपि तु व्यावहारिकसत्तात्मकम्। पारमार्थिकदृष्ट्या तु असत्त्वात्मकमेव। तेन व्यावहारिकजगति दर्शनस्यास्य महत्त्वमुपयोगित्वञ्च न स्त इति न शङ्कनीयम्।

---

१. मुण्डकोप० ३।१।८।
२. तत्रैव ३।२।८।
३. ब्रह्मसूत्रम् ३।२।२८।
४. तत्रैव ३।२।२६।

शाङ्कर-वेदान्तस्य प्रासङ्गिकता–

योो हि "एकं ब्रह्मात्मकं जगत्" इति परमार्थतो मनुते स एव–

"ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्[१]।।

इत्येवं प्रकारेण निखिलं जगत् ईशेन व्याप्तम्, तेनैव परिपूर्णं मन्यमानः तत्स्मरणपूर्वकमेव अनासक्तः सन् जगन्मङ्गलाय विषयोपयोगं करोति। जागतिक-भोग्यपदार्थः न कस्यापि व्यक्ति-विशेषस्य अपि तु ईश्वरस्य। अतस्तस्मिन् भोग्ये वस्तुनि न ममत्वं न वा आसक्तिं कुर्यात्। एतेन त्यागस्य भावना जागर्ति। त्यागाच्छान्तिर्भवति। एतादृश एव महापुरुषः इह लोके कर्माणि कुर्वन्नेव शतं वर्षाणि जिजीविषति। अनया एकेश्वरभावनया अद्वैतदर्शनं भवति। तेन –

'अयं निजः परो वेति गणना नैव जायते।
तस्योदार-चरितस्य वसुधैव कुटुम्बकम्।। इति

मङ्गलात्मकविवेको जायते।

शाङ्कर-वेदान्तवादी एव वस्तुतः-

"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः[२]।।

एतादृशः समदर्शनः योगयुक्तात्मा आत्मयाजी आध्यात्मिकं स्वाराज्यं[३] लभते। यमुद्दिश्य प्राह भगवान मनुः--

"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति।।[४]

एतादृगेव आत्मयाजी देवयाजिनः श्रेयान् भवतीति निरूपयति भगवती श्रुतिः--"आत्मयाजी श्रेयान् देवयाजिनः" इति।

---

१. ईशोप० १।

२. गीता ६।२९।

३. स्वाराज्यं ब्रह्मत्वं लभते मोक्षमाप्नोतीत्यर्थः।
तत्रैव मन्वर्थमुक्तावली १२।९१।

४. मनुः १२।९१।
द्रष्टव्यो यजुर्मन्त्रः - "यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूते चात्मानं ततो न विजुगुप्सते।।"

एनमेव समुद्दिश्य विवेकी समुद्घोषयति--

"आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।" इति।

अद्वैतदर्शनेन यदेयं भावना सुदृढायते तदैव अध्यात्मवादेन सह भौतिकवादस्य समन्वयो भवति। उभयोः सामञ्जस्यं भवति। उभयत्र सन्तुलनं भवति। प्रेयः श्रेयसोः कल्याणकरं सम्मिलनं भवति।

अद्वैतदर्शनं पारस्परिकसौहार्दं द्रढयति। मानवेषु मित्रतां जनयति। परस्परोपकारित्वं भावयति। पारस्परिकं सुखदुःखं समनुभावयति। चिन्तामुक्तं समाजं कारयति। परस्पर-विरोधम् आतङ्कवादं च निर्मूलयति।

अद्वैतवादप्रतिष्ठापकः भगवत्पादश्रीशङ्कराचार्यः तदानीन्तने प्राचीनयुगे राष्ट्रस्य अखण्डतायाः कृते, एकतायाः कृते, राष्ट्रियभावनायाः कृते, भावनात्मकैकतायाश्च कृते भारतदेशस्य चतुर्षु दिग्विभागेषु चत्वारि पीठानि संस्थापयामास, यैरद्यावधि भारतीयानाम् आध्यात्मिक-धार्मिक-सांस्कृतिक भावनायाः राष्ट्रियैकतायाः प्रचारः प्रसारश्च भवतः। एवं हि अधुना अशान्तमये विश्वस्मिन् विश्वे अद्वैतवादस्य अधिकं समुपयोगित्वं प्रासङ्गिकत्वं च वर्तते।

परमतत्त्वप्रतिपादकस्य गम्भीरस्यास्य शाङ्कर-वेदान्तस्य रहस्यं महत्त्वञ्च सर्वेषां कृते सुज्ञानं सुलभञ्च न भवति। एतस्य ये विशिष्टाधिकारिणस्तेषामेव कृते एतज्ज्ञानं सुलभम्। यथा हि चिकित्साशास्त्रे अभियान्त्रिकविद्यायां वा प्रविविक्षूणां कृते अधिकारित्व-प्राप्तये प्रवेश-परीक्षोत्तीर्णताया अनिवार्यता भवति, तथैव साधन-चतुष्टयसम्पन्नः वेदान्तशास्त्रस्य अधिकारी भवति। अर्थात् यस्मिन् जने

(१) शम-दमोपरति-तितीक्षा-श्रद्धासमाधानरूपाः षट्सम्पदः,

(२) नित्यानित्यवस्तु-विवेकः,

(३) इहामुत्रफल-भोग-विरागः,

(४) मुमुक्षत्वञ्चेति चत्वारि साधनानि विद्यन्ते। एतादृश-साधन सम्पन्न एव वस्तुतो वेदान्तशास्त्रस्याधिकारी भवति।

एवं हि शाङ्कराद्वैतदर्शनम् अधिकारिणां मोक्षसाधकम् तथा जगतां मङ्गलकारकमिति विशिष्टं महत्त्वमादधातीतिशम्।

न्यायशास्त्रस्योपयोगिता

"भूतानां प्राणिनः श्रेष्ठाः प्राणिषु बुद्धिजीविनः।
बुद्धिमत्सु नराः श्रेष्ठाः नरेषु ब्राह्मणाः स्मृताः।।
ब्राह्मणेषु च विद्वांसः विद्वत्सु कृत-बुद्धयः।
कृतबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवेदिनः।।

इति वस्तुस्थिति-निरूपक-मनुस्मृत्यनुसारेण भूतेषु ब्रह्मवेदी श्रेष्ठः।

ब्रह्मविद् ब्रह्मैव भवतीति सिद्धान्तेन स साक्षाद् ब्रह्म-स्वरूपः।

अत एव पुरुषार्थ-चतुष्टये निःश्रेयसरूपश्चतुर्थः पुरुषार्थः मानवजीवनस्य चरमलक्ष्यत्वेन परम-साध्य इति समेषामास्तिकदर्शनानां निर्भ्रान्त-सिद्धान्तः। यतो हि तस्मिन्नेव पुरुषार्थे ब्रह्मवेदनम् ब्रह्मस्वरूपत्वं वा संभवति।

अत्रेदमवधानीयम् – शास्त्रादिप्रतिपादितानां धर्मार्थ-काम-रूपाणां त्रयाणां पुरुषार्थानां कृते मानवानां प्रवृत्तिः सुतरां दरीदृश्यते। पुत्रैषणा-वित्तैषणा--लोकैषणा इति तिसृणामेषणानां मानवमात्रे सुलभा समुत्पत्तिरवलोक्यते। परन्तु त्रिवर्ग-फल-प्राप्तौ एषणात्रयसिद्धावपि चरमं सुखं नावाप्यते इत्येव वस्तुस्थितिं प्रतिपादयन्ति तत्त्वज्ञानविचक्षणा दार्शनिकाः।

आत्यन्तिकदुःखनिवृत्तिस्वरूपे निःश्रेयसरूपे चरमपुरुषार्थे न्यायशास्त्रोपयोगित्वं सर्वप्रथमं प्रमाण-प्रमेयेत्यादि प्रथमं न्यायसूत्रं प्रतिपादयति[१]।

"प्रमाण-प्रमेयेत्यादीनां षोडशानां पदार्थानां तत्त्वज्ञानान्निःश्रेयसाधिगमो भवतीति।" प्रमाणप्रमेयेत्यादयश्च षोडशपदार्थाः सम्यगवगताः सन्त एव मोक्षसाधकस्य तत्त्वज्ञानस्य समुत्पादका भवन्ति। अतो न्यायशास्त्रस्य परमोपयोगित्वं नितरां सिद्ध्यति। यतो हि प्रमाणद्वारा प्रमेयादिज्ञेयपदार्थस्य परिज्ञानात् अज्ञानस्य विनाशात् तत्त्वज्ञानस्य समुदयाच्च निःश्रेयसाधिगमो जायते।

इदमत्र रहस्यम्– भासच्छल

---

१. प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्ता-वयव-तर्क-निर्णय-वाद-जल्प- वितण्डा- हेत्वाभासच्छल - जाति-निग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः। गौतम सूत्र -१।१।१।

अज्ञानं शोकसाधनमिति सर्वाणि दर्शनानि मन्यन्ते। अज्ञानं च "अतस्मिन् तद् बुद्धिः"। एतच्चाज्ञानं प्रत्येकस्मिन् जीवे अनादिकालाद् विद्यमानं केवलं तत्त्वज्ञानादेव विनष्टं भवति। एतेनैवाज्ञानेन रागद्वेषादयो दोषाः समुत्पद्यन्ते, दोषैः प्रवृत्तिर्जायते, प्रवृत्त्या च जन्म, जन्मना दुःखम् इति मूलभूतस्याज्ञानस्य कार्यपरम्परा। तत्र च दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानेषु उत्तरोत्तरापाये दुःखस्यात्यन्तिकाभावात् अपवर्गो जायते। एवं च अज्ञानमेव दुःखकारणम् तथा तत्त्वज्ञानमेव अज्ञाननिवारकत्वात् निःश्रेयस-कारणमिति सिद्ध्यति।

नन्वेवम् अज्ञानस्य अनादिभावपदार्थत्वे तस्य नित्यत्वान्नाशो न संभवतीति न शंकनीयम्। अनादिरनन्तस्य च भावस्य नित्यत्वमिति सिद्धान्तात्। अन्यथा मोक्षोपदेशक-शास्त्राणां वैयर्थ्य-प्रसंगः स्यात्। तस्मान् न नित्यम् अज्ञानम्। अपि तु अनादि सान्तम्। न चेदमज्ञानं ज्ञानाभावरूपकम् अपि तु यथा ज्ञानम् आत्मनो गुणविशेषस्तथैव तत्प्रतिस्पर्धिभतम् अज्ञानमपि आत्मनो गुणविशेषः। तथा चेदमज्ञानं नियमेनात्म-समवायि। न चेदं विषयेषु विद्यते। न चापि सर्वेषु आत्मसु एकम्। एकस्य मुक्तौ सर्वेषां मुक्ति- प्रसंगः स्यात्। अतो ज्ञानमिव अज्ञानमपि आत्मनो विशेषगुण इत्येव वस्तुस्थितिः। एतस्यैवाज्ञानस्य तत्त्वज्ञानाद्विनाशान्निःश्रेयसाधिगमो जायते।

अत्रेदं विचिन्तनीयम्--

तत्त्वज्ञानमिदं प्रत्यक्षात्मकम् अनुमित्यात्मकं वेति विचारे श्रवण-मनन निदिध्यासन-जन्यत्वात् तत्त्वज्ञानस्य प्रत्यक्षात्मकत्वमेव। तथा हि जिज्ञासु-शिष्यः श्रोत्रियं ब्रह्मनिष्ठं गुरुं शरणीकरोति। "श्रोतव्यो मन्तव्यः निदिध्यासितव्यः साक्षात्कर्तव्यः" इति गुरुस्तमुपदिशति। "आत्माऽखण्डोऽमर" इति श्रवणादवगत्य पश्चात् तन्मननेन तादृशमेवार्थमवगत्य पश्चाद्धि योगेन निदिध्यासनेन तमर्थं साक्षात्कुरुते। एवं साक्षात्कारात्मकतत्त्वज्ञानेन विनिर्धूताज्ञाननिवहः निर्दुःखो जायते जीवात्मा। तत्वज्ञानाज्ञायमानः आत्यन्तिकः दुःखाभावरूपो हि मोक्षः नित्यः प्रध्वंसरूपस्याभावस्य नित्यत्वात्। न्यायनये भाराद्यपगमे सुखी अहं संवृत्त इति वत् सुखस्य भानं भवति। वस्तुतो न्यायनये आत्यन्तिकदुःख-निवृत्तिरूपस्य मोक्षस्य पुरुषार्थत्वम्। एतन्मोक्षरूपस्य पुरुषार्थस्य प्राप्तिः न्यायशास्त्र-प्रतिपादितसरण्या जायते इति न्यायशास्त्रोपयोगिता विद्यतेतमामितिशम्।

गीताया ज्ञान - विज्ञाने

[भगवद्गीतोक्त - ज्ञान - विज्ञान - विमर्शः]

श्रीमद्भगवद्गीतायां ज्ञान-विज्ञान-शब्दयोः विभिन्नप्रसङ्गेषु बहुशः पृथक् प्रयोगा दृश्यन्ते। अधोलिखितेषु चतुर्षु स्थलेषु तु उभयोः सहप्रयोगाः प्राप्यन्ते। तथा हि--

(१) तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।

पाप्मानं प्रजहि ह्येनं **ज्ञानविज्ञाननाशनम्**[1]।।

अत्र इन्द्रियनियमनपूर्वक-पाप-परित्यागोपदेशः विधीयते। यतो हि पापः ज्ञान-विज्ञान-विनाशकोऽस्ति, अतः पापस्य परित्यागः परमावश्यकः। अत्र ज्ञानशब्दार्थः शास्त्रतः आचार्यतश्च आत्मादीनामवबोधः तथा विज्ञानशब्दस्य विशेषतस्तदनुभव इत्यर्थः। अत्र ज्ञानस्य "सत्यं ज्ञानमनन्तं ब्रह्म", विज्ञानस्य "विज्ञानमानन्दं ब्रह्म" इत्यादि रूपोऽर्थः कर्तुं नैव शक्यते, पापद्वारा तादृशोर्ज्ञानविज्ञानयोर्नाशासम्भवात्।

(२) **ज्ञानविज्ञानतृप्तात्मा** कूटस्थो विजितेन्द्रियः।

युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः[2]।।

इत्यत्र ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानम्, विज्ञानम् शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणम्, ताभ्यां तृप्त आत्मा अन्तःकरणं यस्य स ज्ञान-विज्ञानतृप्तात्मा इत्यर्थो भवति।

(३) **ज्ञानं तेऽहं सविज्ञानमिदं** वक्ष्याम्यशेषतः।

यज्ज्ञात्वा नेह भूयोऽन्यज् ज्ञातव्यमवशिष्यते।।[3]

अत्र ज्ञानं परमात्मविषयकं ज्ञानम्, सविज्ञानं विज्ञानसहितम्, स्वानुभवसंयुक्तम्, कात्स्न्र्येन एतत्कथनमपेक्षितम्, यतः तज् ज्ञानं परिज्ञाय पुनः किमपि ज्ञातव्यम् पुरुषार्थ- साधनं नावशिष्यते। यो हि परमात्मतत्त्वज्ञो भवति स सर्वज्ञो भवतीति तात्पर्यम्।

---

१. गीता ३। ४१।।
२. तत्रैव ६।८।।
३. तत्रैव ७।२।।

(४) इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।

ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्।।[१]

अत्र ''वासुदेवः सर्वमिति'', ''आत्मैवेदं सर्वमि''त्यादिरूपमेव विज्ञानसहितम् अनुभवयुक्तम् ज्ञानम् गुह्यतमं सम्यगूज्ञानं विवक्षितम्। यज् ज्ञानं विज्ञाय मानवः अशुभात् संसार-बन्धनाद् विमुक्तो भवति।

ज्ञान-विज्ञानयोगात्मके सप्तमेऽध्याये, राजविद्याराजगुह्ययोगात्मके च नवमेऽध्याये उपर्युक्तस्थलयोः भगवान् 'ज्ञानविज्ञानस्वरूपं कथयिष्यामीति, समुद्घोषयन् तत्र त्रयोदशाध्याये--

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।

एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा।।[२]

इति प्रत्यपादयत्। अयं भावः--

आत्मानम् अधिकृत्य प्रवृत्तम् - आत्मानात्म - विवेकज्ञानम् - अध्यात्मज्ञानम्, तत्र नित्यत्वम् = तस्मिन्नेव निष्ठावत्त्वम्। तत्त्वज्ञानस्य – 'सर्वं खलु इदं ब्रह्म' तस्य नाम 'तत्' तस्य ब्रह्मणो भावो याथात्म्यं, तस्य ज्ञानम् तत्त्वज्ञानम्, 'सत्यं ज्ञानमनन्तं ब्रह्म' 'एकमेवाद्वितीयं ब्रह्म' इत्यादिरूपम्। तस्य तत्त्वज्ञानस्य अर्थ, प्रयोजनं – मोक्षः, तस्य दर्शनम् आलोचनम् इत्येतद्रूपं ज्ञानं स्पष्टं प्रतिपादितमस्ति। तत्रैव – अमानित्वम्, अदम्भित्वम्, अहिंसा, क्षान्तिः, आर्जवम्, आचार्योपासनम्, शौचम्, स्थैर्यम्, आत्मविनिग्रहः, इन्द्रियार्थेषु वैराग्यम्, अनहंकारः, जन्म-मृत्यु-जरा-व्याधि-दुःख-दोषानुदर्शनम्, असक्तिः, पुत्रदारगृहादिषु अनभिष्वङ्गः, इष्टानिष्टोपपत्तिषु नित्यं समचित्तत्वम्, परमात्मनि अनन्ययोगेन अव्यभिचारिणी भक्तिः, विविक्तदेशसेवित्वम्, जनसंसदि अरतिः[३] इत्यादि सम्यग्ज्ञानसाधनान्यपि ज्ञानपदेन विवक्षितानि। एवमेव श्रीमद्भागवतमहापुराणेऽपि प्रतिपादितम्-- ''तद्विजानीहि यज् ज्ञानमात्मतत्त्वं निदर्शनम्'' इति।

एवं हि भगवान् यथा कण्ठरवेण ज्ञानस्वरूपं प्रतिपादयामास न तथा विज्ञानस्वरूपम्। अतो विज्ञानविषयकजिज्ञासा जागर्तितराम्।

---

१. तत्रैव ६।१।।
२. तत्रैव १३।११।
३. तत्रैव १३। ७-१०।।

'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम्'

इति रीत्या व्याख्यानतो गीताया विज्ञानं विज्ञायते।

'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः'

इति व्याचक्षाणैराचार्यैः ज्ञानम्=आत्मज्ञानम्, अव्यक्तस्वरूपज्ञानम्, तथा विज्ञानम्=विविधसृष्टिज्ञानम्, व्यक्तस्वरूपज्ञानमिति प्रतिपाद्यते। आत्मतत्त्वस्य अव्यक्तस्य ज्ञानार्थम् व्यक्तस्य ज्ञानमावश्यकम् भवति, अत एवं भगवता सविज्ञानं ज्ञानं प्रतिपाद्यते। अयमाशयः भगवतो निर्गुणनिराकारतत्त्वस्य प्रभावमाहात्म्यादेर्यथार्थज्ञानम् – 'ज्ञानम्' तथा सगुणसाकारतत्त्वस्य प्रभावमाहात्म्यादेर्यथार्थज्ञानम्[1] 'विज्ञानम्'।

अक्षरस्य तस्मादप्युत्तमस्य पुरुषोत्तमस्य[2] यज् ज्ञानम् तज् 'ज्ञानम्' तथा क्षरस्य यज् ज्ञानम् तद् 'विज्ञान'मित्यर्थः। पुरुषोत्तमस्य समग्ररूपस्य[3] परिज्ञानाय उभयोः ज्ञानविज्ञानयोर्ज्ञानमावश्यकमिति तत्र द्वयोः प्रतिपादनम्। अत एव एतत्प्रसङ्गे सप्तमाध्याये "भूमिरापोऽनलो वायु"[4]रित्यादिना विज्ञानसाधनीभूतानां प्रकृति-स्वरूपाणां प्रतिपादनं कृतं भगवता।

अयमेव विषयः मुण्डकोपनिषदि प्रकारान्तरेण प्रतिपादितोऽस्ति। महाशाल शौनकः महर्षिम् अङ्गिरसं पप्रच्छ–"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञानं भवतीति"[5]।। महर्षिरङ्गिरा उवाच–"द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति। परा चैवापरा चेति[6]। तत्र अपरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते।[7] अत्रत्या 'परा' विद्या एव गीताया 'ज्ञानम्' तथा 'अपरा' विद्या 'विज्ञानम्'। अपरारूपेण विज्ञानेन क्षरस्य परारूपेण ज्ञानेन च अक्षरस्याधिगम इत्युपनिषदो[8] रहस्यम्।

---

१. श्रीमद्भाग० २।५।१।।

२. यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।। गीता १५। १८।।

३. असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु।। तत्रैव ७।१।।

४. तत्रै व ७।४–६।

५. मुण्डकोप० १।३।।

६. तत्रैव १।४।।

७. तत्रैव १।५।।

८. मुण्डक - गीतारूपयोः।

इदमेव तत्त्वं श्वेताश्वतरोपनिषदि 'क्षरन्त्वविद्या ह्यमृतं तु विद्येत्यादि[1]' रूपेण प्रतिपादितम्।

इदमेव रहस्यम् ईशावास्योपनिषदि समुद्घाट्यते ज्ञानस्य – यथार्थज्ञानस्य – सर्वोत्तमं फलं विद्यया प्राप्यते तथा कर्मणः – सत्कर्मणः सर्वोत्तमं फलम् अविद्यया लभ्यते। अतो विद्यया अमृतत्व-पानाय अविद्यया च मृत्युतरणाय[2] सहैव उभयोर्ज्ञानमावश्यकम्।

एतावता – मुण्डकोपनिषदः पराविद्या अपराविद्या ईशावास्योपनिषदः विद्या अविद्या श्वेताश्वतरोपनिषदः अमृतन्तु विद्या क्षरन्तु अविद्या एव गीतायाः ज्ञानम् विज्ञानञ्च।

एनयोरुभयोर्ज्ञानादेव ज्ञाने परिपूर्णत्वं जायते।

विज्ञानस्य कार्यं महत्त्वञ्च तैत्तिरीयोपनिषदि प्रतिपादितं वर्तते। तद्यथा – विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च अर्थात् विज्ञानमेव यज्ञं शुभकर्मरूपं पुण्यं तनुते विस्तारयति। विज्ञानमेव च लौकिककर्माणि तनुते। विज्ञानेनैव शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुते जीवः।[3]

श्रीमद्भागवतेऽपि यत्र तत्र ज्ञान-विज्ञानयोरेतस्मिन्नेवार्थे प्रयोगो दरीदृश्यते। अयमेवार्थः प्रकारान्तरेण अमरकोशे प्रतिपाद्यते--

मोक्षेधीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः[4]।

अयमत्र निष्कर्षः–गीतायाम् – परमात्मपुरुषोत्तमविषयकं सम्यग्ज्ञानम् - 'ज्ञानम्' प्रकृत्यात्मकं विशिष्टं ज्ञानम् 'विज्ञानम्'। उभयोर्ज्ञानविज्ञानयोर्ज्ञानादेव परमपुरुषार्थ-सिद्धिर्भवतीति शम्।

---

१. द्वे अक्षरे ब्रह्मपरे त्वनन्ते विद्याविद्ये निहिते यत्र गूढे।
क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः।। श्वेताश्व० ५।१।।

२. विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।। ईशावास्य० ११।।

३. तैत्तिरीयो० ५।

४. अमरकोशे १, ५, ६।

श्रीमद्भागवततात्पर्यनिर्णयः

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः।

गायत्रीभाष्यभूतोऽसौ श्रीमद्भागवताभिधः।।

इति गरुडपुराणे भगवान् बादरायणः।

भगवद्भक्तिरससुधासागरस्य श्रीमद्भागवतस्य तात्पर्यनिर्णयात् पूर्वमस्य महत्त्वप्रामाण्यादेर्विचारो नासमीचीन इति तदेव पूर्वं विविच्यते।

वेदान्तप्रस्थानेषु श्रीमद्भागवतस्य स्थानम्

श्रुतिप्रस्थानोपनिषद्भ्यः, स्मृतिप्रस्थानश्रीमद्भगवद्गीतायाः, तथा सूत्रप्रस्थानश्रीबादरायणसूत्रेभ्योऽनन्तरं श्रीमद्भागवतस्यैव स्थानं वर्तत इति प्रमाणैर्निश्चीयते। तत्रोपनिषद्गीताब्रह्मसूत्ररूपां प्रस्थानत्रयीं निखिलवेदान्ताचार्याः प्रस्थानरूपेणाङ्गीकुर्वतेतराम्। सकलवेदान्ताचार्याणां निखिलविचारधारा अस्या एव प्रस्थानत्रयीरूपाया गिरित्रय्याः समुद्भूताः सत्यो ब्रह्मसागरं प्रविशन्ति। तत्र प्रस्थानत्रयीविषये तु न कस्यापि विमतिः, परन्तु श्रीमद्भागवतस्य चतुर्थप्रस्थानत्वे न सर्व आचार्या एकमताः। श्रीवल्लभाचार्यचरणाः, पूज्यपादाः श्रीचैतन्यमहाप्रभवः, अन्ये च गौडीयवैष्णवाचार्या भागवतं चतुर्थप्रस्थानरूपत्वेनाङ्गीकृत्य प्रस्थानचतुष्टयीं मन्यन्ते।

महाभारत-योगवासिष्ठ-पुराणान्तरेषु बहुषु सत्स्वपि श्रीमद्भागवतस्यैव प्रास्थानिकत्वमिति पूर्वोक्ताचार्याणां सिद्धान्तः। यथा वेदान्तैकप्रवणसर्वाधिकाध्यात्म -प्रधानतया, पक्षपातशून्यप्रतिपादनतया, साक्षाद्भगवदुक्ततया, श्रीव्यासदेवस्याधिकाधिक-प्रीतिविषयतया च भगवद्गीतैव वेदान्तप्रस्थानेषु गृह्यते नान्या, तथैव पूर्वोक्तहेतुचतुष्टयेन श्रीभागवतस्यैव प्रास्थानिकत्वं नान्येषाम्।

श्रीबादरायणस्याप्यत्यन्तप्रियस्य पक्षपातरहितस्य श्रीमद्भागवतस्य पक्षपातशून्यसूक्ष्म-विचारेण निर्विवादमेतद् यदुपनिषद्गीताब्रह्मसूत्रेषु ये ये विषया येन रूपेण परिगृहीता ये च हेयतया परित्यक्तास्ते सर्वेऽत्रापि श्रीमद्भागवते तेनैव रूपेण परिगृहीताः, परित्यक्ताश्च। अतोऽस्य प्रास्थानिकत्वे न शङ्कावकाशः। श्रीमद्भागवतस्यानुबन्धश्लोक एव पूर्वोक्तविषयं प्रमाणीकर्तुमलम्। तथा हि--

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्

तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः।

तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा।
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि।।

[भाग० १।१।१]

अर्थाद् अस्य विलक्षणाकारस्य जडजीवात्मकप्रपञ्चस्य यतः कारणभूतात् परमात्मनो जन्मादि जन्मस्थितिलयादि भवति। एतेन--"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्मेति" [तैत्ति० ३।१] इति श्रुतिरपि परिचिन्तिता भवति, "जन्माद्यस्य यतः" [ब्र० सू० १।१।२] इति ब्रह्मसूत्रस्य जन्माद्यधिकरणमपि च विचिन्तितं भवति।

ननु वेदेष्वपि--"सदेव सौम्येदमग्र आसीत्" [छा० ६।२१], "असद्वा इदमग्र आसीत्" [तैत्ति० २।७] "आनन्दाध्द्येव खल्विमानि भूतानि जायन्ते" [तैत्ति० ३।६], "आकाशादेव खल्विमानि भूतानि जायन्ते" [नृ० पू० ३।१] इत्यादिषु क्वचित् सतः, क्वचिदसतः, क्वचिदानन्दस्य, क्वचिदाकाशादेः कारणत्वकथनेन, जैमिनीयैर्वेदान्त- वाक्यानामपि कर्मशेषत्वाभ्युपगमेन कर्मण एव जगत्कारणत्वस्वीकारेण, कपिलेन प्रधानस्य कणादादिभिः परमाण्वादीनां च कारणत्वाङ्गीकारेण नैकान्ततः परमसत्यस्य ब्रह्मणो जगत्कारणत्वमिति चेत्; न, इतरेषामपि कारणवाक्यानां तत्रैव समन्वयात् इत्येवाशङ्क्योक्तम् – अन्वयादितरत इति। एतेन "तत्तु समन्वयात्" [ब्र० सू० १।१।४] इति ब्रह्मसूत्रोक्तं समन्वयाधिकरणं चिन्तितं भवति। यतश्च सर्वेषां कारणवाक्यानां तत्रैव ब्रह्मणि समन्वयः, अतस्तत्र कश्चिद् विरोधो नास्ति। एवं चानेनैवाविरोधाध्यायस्यापि सङ्केतो भवति।

'अर्थेष्वभिज्ञः' इत्यंशेन च सांख्योक्तत्रिगुणात्मकप्रधानस्य जगत्कारणत्वखण्डनं भवति। न ह्येतस्य सुव्यवस्थितस्य जगतः कारणमचेतनं प्रधानं भवितुमर्हति, अपि तु – "यः सर्वज्ञः सर्ववित्" [मुण्डको० १।१।६] इति श्रुतिप्रतिपाद्यः परमात्मैवैतस्य कारणम्।

यथा लोके कर्ता कुलालादिरुपादानादिकारणकलापेन कार्यमारभते, तथैवायमपि स्वभिन्नेनैव कारणेन जगतो निर्माता स्यादित्याशङ्क्याह स्वराडिति। अर्थात् स्वेनैव निजस्वरूपमहिम्नैव राजते, स्वरूपतः कार्यतश्च द्योतत इति स्वराट्। तस्य ब्रह्मणः कारणत्वे नास्ति कारणान्तरापेक्षेति भावः। अत एव श्वेताश्वतरोपनिषत् प्रतिपादयति--"न तस्य कार्यं करणं च विद्यते न तत् समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च।।" [६।८] इति। एतेन

ब्रह्म स्वात्मकसर्वशक्त्युपेतमिति प्रतिपादितं भवति। एवं च 'स्वराट्' इति पदेन "सर्वोपेता च तद्दर्शनात्" [ब्र० सू० २।१।३०] इति ब्रह्मसूत्रोक्तं विचारितं भवति।

'यश्च आदिकवये ब्रह्मणे ब्रह्म वेदमुपदिदेश' इति कथनेन 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।।" [श्वेताश्वतरोपनिषत्, ६।१८], "यो ब्रह्माणं विदधाति पूर्वं यो वै विद्यास्तस्मै गापयति स्म कृष्णः। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणममुं व्रजेत्।।" [गोपालपूर्वतापिनी, ५] इत्याद्युक्तविषयस्य प्रतिपादनं भवति।

यत्र यस्मिन् ब्रह्मणि, त्रिसर्गः सृष्ट्यादिः, अमृषा सत्यम्। यतो हि जगत्तु ब्रह्मात्मना सत्यमेव, "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" [छा० ६।१।४] इति श्रुतेः। अत एव- "इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसम्भवाः" [भा० १।५।२०] इति संगच्छते। तत्र यथा लोके तेजोवारिमृदां विनिमयः = अन्यत्रान्यावभासो भवति, अर्थाद् मार्तण्डतेजसि जलभ्रमः, करकादौ पृथिव्यंशशिलादिभ्रमः, तथा स्थलविशेषे जलभ्रमः। वस्तुतस्तु पदार्थः स्वरूपेण भिन्न एव, तथैव ब्रह्मस्वरूपतो जगत् सर्वथा नित्यमेव। अथवा 'अमृषा' इति स्थाने 'मृषा' इति। ततश्च यथा तेजोवारिमृदां विनिनयो मृषा, तथैव परमेश्वरे त्रिसर्गो भौतिकत्वादिबुद्धिर्मिथ्या। एतेन च "संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्" [ब्र० सू० २।४।२०] इति, "तदनन्यत्वमारम्भणशब्दादिभ्यः" [ब्र० सू० २।१।१४] इत्यादि च व्याख्यातं भवति।

एवं च पूर्वोक्तप्रकारं स्वेन धाम्ना सदा निरस्तकुहकं परं सत्यं धीमहि। अर्थात् स्वेनैव स्वरूपेण न तु जीववद् उपासनादिना निरस्तं दूरीकृतं कुहकं तमःपटलमविद्यास्मितारागद्वेषादिमलं येन तादृशं यत् परं सत्यज्ञानानन्दलक्षणं ब्रह्म तद् वयं मुमुक्षवो ध्यायेम सर्गविसर्गादिभिर्नवभिर्लक्षणैर्वक्ष्यमाणैर्विचारयेम। अत्र 'परम्' इत्यनेन तस्य ब्रह्मणः सर्वातिशायित्वं स्वसमानाधिकशून्यत्वं च प्रतिपाद्यते। एतेन "न तत्समश्चाभ्यधिकश्च दृश्यते" [श्वेता० ६।८] इति श्रुत्युक्तविषयः संसूच्यते। अत एव च वक्ष्यते-"निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः" [भा० २।४।१४] इति। त्रिकालाबाध्यत्वबोधकेन सत्यशब्देन च "सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्" [बृ० २।१।२०] इति श्रुतिप्रतिपादितार्थोऽपि सूचितो भवति। एतस्यैव सत्यशब्दस्य व्याख्यानभूताः "सत्यात्मकं त्वां शरणं प्रपद्ये" [भा० १०।२।२६] इत्यादिवक्ष्यमाणश्लोकाः।

'सत्यं परं धीमहि' इत्यंशेन च "अथातो ब्रह्मजिज्ञासा" [ब्र० सू० १।१।१] इति जिज्ञासाधिकरणं व्याख्यातं भवति। अत्र जिज्ञासापदस्थाने 'धीमहि' इति कथनेन भागवतस्य गायत्रीभाष्यभूतत्वमभिव्यक्तं भवति। एवं च ब्रह्मसूत्रकृता स्वयमेव बादरायणेन मङ्गलश्लोकेऽस्मिन् समग्रवेदान्तार्थो ब्रह्मसूत्रार्थश्च सूच्यते। अत एवाग्र उच्यते--

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां

वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।

श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः

सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्।। [भा० १।१।२]

अर्थाद् अस्मिन् श्रीमद्भागवतेऽर्थवादादिशून्यो भगवत्साक्षात्कारलक्षणो धर्मः प्रतिपादितोऽस्ति। अयमेव च धर्मः परमो धर्मः, "अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्" [१।८] इति याज्ञवल्क्यस्मृतेः। आत्मनि ईश्वरे दृष्ट एव तु लोकस्य हृदयग्रन्थिर्भिद्यते, सर्वसंशयाश्छिद्यन्ते, कर्माणि च सर्वाणि क्षीयन्ते [भा० १।२।२१]।

निर्मत्सराणां साधूनां यद् वास्तविकं ज्ञेयं वस्तु वर्तते, यच्चानन्दप्रदं तथाध्यात्मिकाधिदैविकाधिभौतिकरूपतापत्रयस्य समूलविनाशकं तस्यैव प्रतिपादनमत्राभूत्। महामुनिश्रीव्यासरचितेऽस्मिन् भागवते भक्त्या श्रुते सत्येव भगवान् सद्यस्तत्क्षण एव कृतिनां शुश्रूषूणां हृदयेऽवरुद्धो भवति। अत्र 'वास्तवम्' इत्यनेन सत्, 'वेद्यम्' इत्यनेन चित्, तथा 'शिवदम्' इत्यनेन आनन्द इत्युच्यते। तेन सच्चिदानन्दघनरूपं वस्त्वत्र प्रतिपादितमित्यपि सूचितं भवति।

अत एवेदं भागवतं वेदरूपकल्पवृक्षस्य सुन्दरं सुपक्वममृतमयं फलं, यत् साक्षात् परमहंसश्रीशुकदेवमुनेर्मुखाद् विगलितमस्ति। एतच्च रसालयं भागवतं भावुकरसिकैर्निरन्तरं पातव्यम्--

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।

पिबत भागवतं रसमालयं मुहरहो रसिका भुवि भावुकाः।।

[भा० १।१।३]

एवं च श्रीमद्भागवतं मुख्यतयाऽर्थवादादिविवर्जितं साक्षाद् भगवत्स्वरूपप्रतिपादकं परममोक्षैकफलमुपनिषद्ब्रह्मसूत्रसारभूतं वर्तते। यद्यपि

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः।। [भा० २।१०।१]

इत्यादिना सर्गविसर्गादीनामपि वर्णनं वर्तते, तदपि

दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणम्।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा।। [भा० २।१०।२]

इत्युक्त्या दशमस्य आश्रयतत्त्वस्य परब्रह्मण एव प्रतिपादनाय। अत एवात्र सर्गादीनां न बृहद्रूपेण वर्णनम्। आश्रयस्य स्वरूपं प्रतिपादयता श्रीवेदव्यासेनोक्तम्--

आभासश्च निरोधश्च यतश्चाभ्युपपद्यते।
स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते।। [भा० २।१०।७]

अर्थाद् यतो यस्मात्, अस्य जगतः, उत्पत्तिः प्रलयादिश्च भवति स एवाश्रयः। स एव परब्रह्म परमात्मेत्यादिनोच्यते। तमेवाभिलक्ष्योक्तम् -

वदन्ति यत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।। [भा० १।२।११]

एवं च--

अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः।
गायत्रीभाष्यभूतोऽसौ श्रीमद्भागवताभिधः।।
तद(वेदा)र्थानां निर्णयाय ब्रह्मसूत्रमकल्पयत्।
तद्भाष्यभूतं पुराणं भागवतं वै विदुर्बुधाः।।

इति गरुडपुराणे श्रीव्यासोक्ते न कश्चित् शङ्कावसरः।

एवं च भक्तिद्वारा तस्य परमेश्वरस्य भगवतः[1] श्रीकृष्णस्य साक्षात्करण एव भागवतस्य तात्पर्यम्। अत एव महर्षिनारदोपदेशद्वारा प्रतिपादितं श्रीव्यासदेवेन--

---

१. एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्।। [भाग० १।३।२८]।

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद् भ्रमतामुपर्यधः।
तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा।।

[भा० १।५।१८]

अर्थात् तस्यैव प्रेमवशीकृतपरमेश्वरसाक्षात्काररूपमोक्षस्य हेतोर्मनीषिभिः प्रयतनीयम्, यत् तादृशं वस्तु चतुर्दशसु भुवनेषु भ्रमतां जनानां न लभ्यते। ''कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः'' [स्वप्न० १।४] इति नियमेन लौकिकसुखं त्वनभिलषितदुःखवत् प्राप्यत एव। अतो लौकिकसुखार्थं जनानां प्रयत्नस्तु व्यर्थ एव।

एवं च ब्रह्मसूत्रभाष्यभूतस्य सर्वेष्वपि पुराणेषु श्रेष्ठस्य श्रीमद्भागवतस्य तात्पर्यं तु परात्परस्य परमेश्वरस्य साक्षात्कार एव वर्तते। स च साक्षात्कारस्तस्यैवानन्यभक्तितो जायते। यतः--

न साधयति मां योगो न सांख्यं धर्म उद्धव।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता।।

''भक्त्याहमेकया ग्राह्यः''

इत्यादिकथनेन तस्यैवार्थस्य पुनः पुनः प्रतिपादनं भवति। एवं च--

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।।

इति तात्पर्यनिर्णायकैरपि स एव पूर्वोक्तार्थो निर्णीयते। अत एव श्रीवल्लभाचार्यैरुक्तं स्वकीये निबन्धे--

वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्।।
उत्तरं पूर्वसन्देहवारकं परिकीर्तितम्।।७-८।।
अविरुद्धं तु यत्त्वस्य प्रमाणं तच्च नान्यथा।
एतद्विरुद्धं यत् सर्वं न तन्मानं कथञ्चन।।६।। इति।

एतेन वेदगीताब्रह्मसूत्रश्रीमद्भागवतानामेव चतुर्णां प्रामाण्यं नान्यस्येति प्रतिपादितम्। अत्रापि च पूर्वपूर्वपिक्षयोत्तरोत्तरस्य सन्देहवारकत्वेनाधिकमुपयोगित्वम्। एवं चास्य प्रामाण्यं प्रतिपाद्य प्रयोजनं प्रतिपादयद्भिस्तैरुक्तम्--

प्रेम्णोऽन्यत् साधनं लोके नास्ति मुख्यं परं महत्।
श्रीभागवतमेवात्र परं तस्य हि साधनम्।।३२०।।

अधिकारमभिप्रायं ज्ञात्वा भक्तमुखेन हि।
सकृच्छ्रवणमात्रेण कृष्णे प्रेम भवेद् ध्रुवम्।।३२१।।

विरक्तो विपरीतादिभावनारहितः सुहृत्।
लीलामात्रश्रुतौ तस्य भवेत् प्रेमाखिले किमु।।३२२।।

श्रीभागवततत्त्वार्थमतो वक्ष्ये सुनिश्चितम्।
यज्ज्ञानात् परमा प्रीतिः कृष्णे शीघ्रं फलिष्यति।।३२३।।

गौडीयवैष्णवसम्प्रदायेऽप्येवमेवोक्तम् –

आराध्यो भगवान् व्रजेन्द्रतनयस्तद्धाम वृन्दावनं
रम्या काचिदुपासना व्रजवधूवर्गेण या कल्पिता।
श्रीमद्भागवतं प्रमाणममलं प्रेमा पुमर्थो महान्
श्रीचैतन्यमहाप्रभोर्मतमिदं तत्राग्रहो नः परः।। इति।

एवं च संक्षिप्तेनापि पूर्वोक्तविचारेण स्थालीपुलाकन्यायादिदं निश्चितं भवति यदुपनिषद्गीताब्रह्मसूत्रभाष्यभूतस्य पुराणेषु श्रेष्ठस्य श्रीमद्भागवतस्य तात्पर्यं प्रेमभक्तिद्वारा परात्परस्य भगवतः श्रीकृष्णस्य साक्षात्कार एव वर्तते। स एव साक्षात्कारः परमः पुरुषार्थ इति निश्चप्रचमिति शम्।

कलिसंवत् प्रारम्भकाल - विमर्शः

भारतवर्षे विक्रमसंवत्सरारम्भात् पूर्वं श्रीकृष्ण-संवत्, युधिष्ठिर-संवत्, कलि-संवत् इत्येवमादयोऽनेकसंवत्सराः प्रचलिता आसन्। तत्र श्रीकृष्ण-संवत् - अनादिनिधनस्य श्रीपुरुषोत्तमस्य पूर्णषोडश-कलस्य लीलामानुषविग्रहस्य वासुदेवश्रीकृष्णचन्द्रस्य ख्रिष्टपूर्वे ३२२८तमे श्रीमुखवत्सरे भाद्रकृष्णाष्टम्यां रजन्यां पुण्ये काले अस्मिन् धराधाम्नि प्राकट्य-समयात् प्रारभत।

सार्द्धाष्टदिवसोत्तर-सप्तमासाधिक-पञ्चविंशत्युत्तरशततमे वर्षे ख्रिष्टपूर्वे ३१०२/३तमे हायने प्रमाथिनामके वत्सरे चैत्रशुक्लप्रतिपदि भगवान् श्रीकृष्णचन्द्रः स्वावतारप्रयोजनं सम्पाद्य लीलामानुषदेहं प्रभासक्षेत्रे परित्यज्य स्वधाम जगाम। भारतधराधाम्नि भगवान् वासुदेवः पञ्चविंशत्यधिकशतवर्षाणि यावत् विविधलीलाञ्चकारेति विष्णु- भागवतादिमहापुराणानि प्रमाणयन्ति।[१]

भगवतो वासुदेवस्य प्रयाणवर्षात् ख्रिष्टपूर्वात् ३१०२/३तमवत्सरात् पूर्वस्मिन् षट्त्रिंशे (३६) वर्षे महाभारतयुद्धमभूत् – इत्यपि महाभारत-पुराणादिभिः प्रमाणितं वर्तते। इदं हि महाभारतयुद्धं द्वापरस्य कलेश्च सन्धिकाले[२] ३१३८/९तमे वर्षे, ८९तमे श्रीकृष्ण-संवत्सरेऽभवत्। तत्पश्चात् षट्त्रिंशे वर्षे प्रभासक्षेत्रे यादवानां परस्परकलहे निधनम्[३], भगवतः श्रीकृष्णस्य

---

१. यदुवंशेऽवतीर्णस्य भवतः पुरुषोत्तम।
शरच्छतं व्यतीयाय पञ्चविंशाधिकं प्रभो।।भागवते ११।६।२५
वस्वग्निमरुदादित्य-रुद्र साध्यादिभिः सह।
विज्ञापयति शक्रस्त्वां तदिदं श्रूयतां प्रभो।।
दुर्वृत्ता निहता दैत्या भुवो भारोऽवतारितः।
त्वया सनाथास्त्रिदशा भवन्तु त्रिदिवे पुनः।।
पञ्चविंशत्युत्तरकं शतं तु शरदां गतम्।
इदानीं गम्यतां स्वर्गो भवते यदि रोचते।। विष्णुपुराणे ५।३७।१८७

२. अन्तरे चैव संप्राप्ते कलिद्वापरयोरभूत्।
स्यमन्तपञ्चके युद्धं कुरु-पाण्डव-सेनयोः।। महाभा० आदिपर्वणि २।१३।
भविष्याख्ये महाकाले प्राप्ते वैवस्वतेऽन्तरे।
अष्टाविंशद्द्वापरान्ते कुरुक्षेत्रे रणोऽभवत्।। भविष्ये प्रतिसर्गे ३।३।४।
ततो द्वापर-सन्ध्यायां प्रवर्तति कलौयुगे। स्कन्द पु० १।४०।२११।
साम्प्रतं महीतलेऽष्टाविंशतितममनोश्चतुर्युगमतीतप्रायं वर्तते।
आसन्नो हि कलिः। विष्णुपु० ४।१।७६-७७।

३. षट्त्रिंशेऽथ गते वर्षे कौरवाणां क्षयात् पुनः।
प्रभासे यादवाः सर्वे विप्रशापात् क्षयंगताः।। देवी भा० १।८।३।
षट्त्रिंशे त्वथसंप्राप्ते वर्षे कौरवनन्दनः।
ददर्श विपरीतानि निमित्तानि युधिष्ठिरः।। महाभा० मौसलपर्वणि १।१।
षट्त्रिंशेऽथ ततो वर्षे वृष्णीनामनयो महान्।
अन्योन्यं मुसलैस्ते तु निजघ्नुः कालचोदिताः।। तत्रैव १।१३।

स्वधाम-गमनम्[1], परीक्षितस्य राज्याधिरोहणम्[2], पाण्डवानां महाप्रस्थानञ्च[3] अभूवन्। एतत्सर्वं तस्मिन्नेव ख्रिष्टपूर्वे ३१०२/३ तमे वर्षे समभवत्।

एवं हि श्रीकृष्णावतारस्य, महाभारतयुद्धस्य, श्रीकृष्णचन्द्र-स्वधामगमनस्य, परीक्षित-राज्याभिषेकस्य, पाण्डवानां स्वर्गारोहणस्य च काले निर्णीते कलि-संवत् प्रारम्भकाल-निर्णयः सुकरः।

पञ्चविंशत्यधिक शतवर्षाणि यावत् भारतभुवि विविधांलीलां विधाय भगवान् वासुदेवश्रीकृष्णः यस्मिन्दिने स्वधाम समगमत् तस्मिन्नेव दिने ख्रिष्टपूर्वे ३१०२/३ तमे वर्षे कलिरत्र प्राविशत् तथा तत्संवत्सरारम्भश्चाभवत्। यावत् पर्यन्तं भगवान् वासुदेवः इमां वसुन्धरां स्वपादपद्माभ्यां स्पृशन्नासीत् तावत्कलिः इमां स्प्रष्टुं नाशकत् इति प्रमाणयन्ति महापुराणानि। तथाहि--

यदा मुकुन्दो भगवान् क्ष्मां त्यक्त्वा स्वपदं गतः।
तद्दिनात् कलिरायातः सर्व-साधन-बाधकः।। पद्मपु० उ० खण्डे १।६६।

श्रीकृष्णेन परित्यक्ते भूतले बलवान् कलिः।
करिष्यति परं विघ्नं सत्कार्ये समुपस्थिते।। स्कन्द पु० द्वितीये वैष्णव खण्डे ३।५४।

यदैव भगवान् विष्णोरंशो यातो दिवं द्विज।
वसुदेव-कुलोद्भूतस्तदैवात्रागतः कलिः।। विष्णु पु० ४।२४।१०८।।
यावत् स पादपद्माभ्यां पस्पर्शेमां वसुन्धराम्।
तावत् पृथ्वी-परिष्वङ्गे समर्थो नाभवत् कलिः।। तत्रैव ४।२४।१०९।
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि।
प्रतिपन्नं कलियुगं तस्य संख्यां निबोध मे।। तत्रैव ४।२४।११३।
यस्मिन् दिने हरिर्यातो दिवं सन्त्यज्य मेदिनीम्।
तस्मिन्नेवावतीर्णोऽयं कालकायो बली कलिः।। तत्रैव ५।३८।८।

---

१. त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन।
कुत्सितेनाभ्युपायेन निधनं समवाप्स्यसि।। महाभा० स्त्रीपर्वणि २५।४४।
विमृशन्नेव कालं तं परिचिन्त्य जनार्दनः।
मेने प्राप्तं स षट्त्रिंशं वर्षं वै केशिसूदनः।। तत्रैव २।२०।

२. गते सनातनास्यांशे विष्णोस्तत्र भुवो दिवम्।
तत्याज सानुजो राज्यं धर्मपुत्रो युधिष्ठिरः।। विष्णु पु० ४।२४।११०।
विपरीतानि दृष्ट्वा च निमित्तानि हि पाण्डवः।
याते कृष्णे चकाराथ सोऽभिषेकं परीक्षितः।। तत्रैव ४।२४।१११।
अभिषिच्य स्वराज्ये च राजानं च परीक्षितम्।। महाभा० महाप्रस्थानिकपर्वणि १।८।
श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः।
त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथम्।। भागवते ११।३१।२६।

३. भागवते ११।३१।२६।

यदा मुकुन्दो भगवानिमां महीं
जहौ स्वतन्वा श्रवणीय-सत्कथः।
तदाहरेवाप्रतिबुद्धचेतसा –
मधर्महेतुः कलिरन्ववर्तत।।भागवते १।१५।३६।
विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवंगतः।
तदाविशत्कलिर्लोकं पापे यद्रमते जनः।।
यावत् स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः।
तावत् कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत्।।
भागवते १२।२।२६-३० वायु ६६।४२८।
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि।
प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः।। भाग० १२।२।३३।
यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गाम्।
तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः।। तत्रैव १।१८।६।
यर्ह्येवायं मयात्यक्तो लोकोऽयं नष्टमङ्गलः।
भविष्यत्यचिरात् साधो कालेनापि निराकृतः।। तत्रैव ११।७।४।

एवञ्च उपर्युक्त प्रमाणैर्निश्चीयते यत् कलिप्रवेशः अर्थात् कलिसंवत्प्रारम्भः तस्मिन्नेव दिनेऽभवत् यस्मिन् दिने भगवान् श्रीकृष्णचन्द्रः इमां वसुधामुत्ससर्ज। गणनया च ख्रिष्टपूर्वम् ३१०२ इति तद्दिनमायाति। अत इदानीम् ५०९५ इति कलि-संवत् वर्तते।

द्वितीयपुलकेशिनः शिलालेखे[१] कलिसंवत्सरस्य शकसंवत्सरस्य च उल्लेखो वर्तते। ५५६ इति शक संवत्सरे (६३४ इति ख्रिष्टीये) ३७३५ इति कलि-संवत्सर आसीत्। एतेन तदेव कलि-संवत् प्रारम्भदिनमायाति। एवमेव नेपाले काष्ठमण्डपे (काठमाण्डू) नगरे विविधेषु शिलालेखेषु[२] निर्दिष्टानां कलि-संवत्सराणां विक्रम संवत्सरेण ख्रिष्ट-संवत्सरेण च सह सर्वथा एकरूपता भवति। अतो भगवतो वासुदेवस्य स्वधाम गमनदिवसादेव कलि-संवत्सरः प्रारभतेति निर्णीयते। एवं सति ये केचन दुर्योधन-जनन-दिवसात् कलिसंवत्सरारम्भं कथयन्ति न ते तत्त्वविद इतिशम्।

---

१. त्रिंशत्सुत्रिसहस्त्रेषु भारतादाहवादितः।
सप्ताब्दशतयुक्तेषु गतेष्वब्देषु पञ्चसु।।
पञ्चाशत्सु कलौ काले षट्सु पञ्चशतासु च।
समासु समतीतासु शकानामपि भूभुजाम्।।
– द्वितीय पुलकेशिनः शिलालेखे।

२. नेपाले भक्तपुरे जितामित्रमल्लस्य शिलालेखे समयोल्लेखः– नेपाल सं० ७९८, शकाब्द १६००, कलिगत ४७७९, विक्रमाब्द १७३५ (ख्रिष्टाब्द १६७८) आषाढ शुक्ल दशमी बुधे। तत्रैव भक्तपुरे जितामित्र मल्लस्यान्यशिलालेखेषु मास-पक्ष-तिथिदिन-नक्षत्राणि विहाय संवत्सराणामुल्लेखः पूर्ववदेव।

काव्यशास्त्रीय - सम्प्रदाय - रहस्यम्

काव्यशास्त्रीय-सम्प्रदाय-रहस्य-समुद्घाटनात् पूर्वं किं तावत् काव्य-शास्त्रमिति विवेचनं परमावश्यकम् –

काव्य-शास्त्रम्

काव्यस्य शास्त्रम् काव्यशास्त्रमिति काव्यं शास्त्रञ्चेत्यनयोर्ज्ञानं समपेक्षितम्।

(क) तत्र शास्त्रम्-

यद् विधौ च निषेधे च व्युत्पत्तेरेव कारणम्।
तदध्येयं विदुस्तेन लोकयात्रा प्रवर्तते।।[1]

अर्थात् विधिनिषेधयोर्व्यावहारिकं ज्ञानं येन समवाप्यते तदेव शास्त्रं तच्चाध्येयं भवति। तच्च

काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्।।[2]

इति रीत्या १-काव्यम्, २-शास्त्रम्, ३-इतिहासः, ४-काव्यशास्त्रम, ५- काव्येतिहासः, ६-शास्त्रेतिहासश्चेति षड्विधम्।

एवञ्च काव्यविषयकविधिनिषेधयोर्ज्ञानं शासनं च येन अवाप्यते तत् काव्यशास्त्रम्।

(ख) काव्यम्

तत्र काव्यं किमिति जिज्ञासायां समासत इदं कथयितुं शक्यते - कवेः लोकोत्तर-वर्णना-निपुण-कर्म-काव्यम्। एतच्च काव्यं साहित्य-समन्वित-शब्दार्थयुगल स्वरूपम्।

---

१. सरस्वती कण्ठाभरणे २, १३८
२. तत्रैव २, १३६।

(ग) कविः

यस्य लोकोत्तर-वर्णना -निपुण-कर्म काव्यं भवति स कविः क इति जिज्ञासाप्यत्र समीचीनं समुदेति –

(१) यास्कीयनिरुक्ते मेधावि-नामसु पठितः कवि-शब्दः क्रान्तदर्शनार्थकः[1]। अतीतानागत-विप्रकृष्ट-विषयकं युगपज्-ज्ञानं यस्य स क्रान्तदर्शन इत्युवटाचार्यो निर्वक्ति। क्रमधातोरौणादिके इन् प्रत्यये बाहुलकान्मस्य वत्वे रेफस्य लोपे च कविरिति निष्पद्यते।

(२) अथवा गत्यर्थकात् कवतेरिनि प्रत्यये कविः सिद्ध्यति। विश्वारूपाणि प्रतिमुंचते कविः इति प्रतिपाद्यते। कविः सर्वाणि रूपाणि प्रज्ञानानि रूपवत् शोभनार्थेषु आबध्नातीत्यर्थः। अतएव मेधावी कविः क्रान्तदर्शनो भवति। कवतेर्वा इति[2] यास्काचार्यो निरूपयति।

अथवा कवयति वर्णयति इति कविः। कवृ वर्णने इत्यस्माद् धातोः इनि प्रत्यये णिज्लोपे च कविः सिद्ध्यति। एतेन यो हि अपूर्व-चमत्कारि-वस्तु-वर्णने-क्षम; स एव कविः न तु इतिवृत्तमात्र-वर्णनकारकः। अत एव भट्टतौतेन 'काव्यकौतुके' उक्तम् –

नानृषिः कविरित्युक्तम् ऋषिश्च किलदर्शनात्।
विचित्रभावधर्मांश-तत्त्व-प्रख्या च दर्शनम्।।
स तत्त्वदर्शनादेव शास्त्रेषु पठितः कविः।
दर्शनाद् वर्णनाच्चाथ रूढालोके [3]कविश्रुतिः।। इति।

ऋषि शब्द निवर्चनं कुर्वता महर्षि यास्केन 'ऋषिर्दर्शनात्'[4] इत्युक्तम्। ब्राह्मणमपि चैतस्मिन्नर्थे प्रमाणम्-

तद्यदेनां स्तपस्यमानान् ब्रह्म स्वयम्भवभ्यानर्षत्
त ऋषयोऽभवंस्तदृऋषीणामृषित्वमिति विज्ञायते[5]।।

---

१. निरुक्ते १२।२।१४।
२. तत्रैव १२।२।१४।
३. हेमचन्द्रस्य काव्यानुशासने।
४. तत्रैव २, ३, १२।
५. तत्रैव २, ३, १२।

एतेन वस्तुनो विचित्रभावस्य - अन्तर्निहितधर्मस्य यो हि तत्त्वतो दर्शनं करोति स एव ऋषिः। एवं च ऋषिरूपे कवौ दर्शन-वर्णनयोरपूर्वसमन्वयो भवति। अतः पदार्थान् आन्तरदृष्ट्या तत्त्वतो विलोक्य यस्तान् रमणीयशब्दार्थैर्वर्णयति स एव कविः।

अत एव भट्टतौतेन प्रतिपादितम्-

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।
तदनु प्राणनाज्जीवेद् वर्णनानिपुणः कविः।।
तस्य कर्म स्मृतं[1] काव्यम् इति।

एतावता नवनवोन्मेषशालिन्या प्रतिभया अनुप्राणितं यत् सजीववर्णनं तत्र यो हि निपुणः स एव वस्तुतः कविः।

भट्टनायकमते यः सहृदयपाठकान् अर्थं ग्राहयति भावनं कारयति तथा आनन्दमनुभावयति स एव कविः।

अभिनवगुप्ताचार्यमते अपूर्व-वस्तु-निर्माण-क्षमा प्रज्ञा प्रतिभा तस्या विशेषः रसावेश-वैशद्य-सौन्दर्य-काव्यनिर्माण-क्षमत्वम्। एवं प्रतिभा-सम्पन्नः अपूर्व-वस्तु-निर्माण-कुशल एव कविः नान्यः।

अत एव मम्मटेनाप्युक्तम्-लोकोत्तर-वर्णनानिपुण-कवि-कर्म काव्यम् इति। अपूर्व काव्य-सृष्टि-करणादेव कविः प्रजापतिरित्युच्यते –

अपारे काव्यसंसारे कविरेव प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।
न कवेर्वर्णनं मिथ्या कविः सृष्टिकरः परः[2]।।

यतः कविः कर्ता, निर्माता, स्रष्टा, दर्शयिता, वर्णयिता, भावयिता, व्यञ्जयिता अतस्तस्य काव्यम्-निर्माणम्, निर्मितिः सृष्टिरित्यादिभिः शब्दैर्व्यवह्रियते।

अत एव ध्वनिप्रस्थापनपरमाचार्येण मम्मटेन--

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारतीकवेर्जयति।।

इति काव्यप्रकाशमङ्गलश्लोके काव्यनिर्मितिरिति प्रकटयांचक्रे।

---

१. हेमचन्द्रस्य काव्यानुशासने।
२. अग्निपुराणे ३३८, १०।

पाश्चात्त्य-काव्यशास्त्रे अरस्तूमहोदयेन –

'Art is an Imitation' कलानुकरणं विद्यते इति यदुक्तं तत् प्लेटो महोदयेन खण्डितम् –

यदि नाम कला अनुकरणम् तर्हि अनुकरणस्य अनुकरणत्वेन सत्यादतिदूरवर्तित्वात् कला नोपादेया -'It is a copy of the copy twice removed from the truth. अतो विदुषां तत्त्वज्ञानां मते काव्यं करणम् निर्माणम्, न चानुकरणमेव। काव्यानुकरणं कवि प्रतिभा कौशलवशाद् वैशिष्ट्याधानं जायते। विकलाङ्गस्यानुकरणे द्रष्टुरान्दानुभव एवात्र प्रमाणम्। विकलाङ्गस्यानुकर्तापि पुरस्क्रियते।

अत एव भामहेनोक्तम् –

गतोऽस्तमर्को भातीन्दुर्यान्ति वासायपक्षिणः।
इत्येवमादि किं काव्यं वार्तामेनां प्रचक्षते[१]।। इति

अतएव आनन्दवर्धनाचार्येण प्रतिपादितम् –

नहि कवेरितिवृत्तमात्र-निर्वहणे किंचित् प्रयोजनम्, इतिहासादेव तत् सिद्धेः[२] इति।

अतः –

वाच्यानां वाचकानां च यदौचित्येन योजनम्।
रसादि विषयेणैतत् कर्म मुख्यं महाकवेः[३]।।

तथा चेदमुच्यते –

अपारे काव्य-संसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।
शृंगारी चेत् कविः काव्ये जातं रसमयं जगत्।
स एव वीतरागश्चेन् नीरसं व्यक्तमेव तत्[४]।।
भावानचेतनानपि चेतनवच्चेतनानचेतनवत्।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया।। इति।

---

१. भामहालंकारे २, ८६।
२. ध्वन्यालोके ३, १४ कारिकायाम्।
३. तत्रैव ३, ३२
४. अग्निपुराणे ३३८, ११।

अवलोक्यताम् सुकवेः नवनिर्माणात्मकं सूक्ष्मदर्शनम् –

दुग्धस्य उद्वालनम् अस्माभिरपि अवलोक्यते सुकविना भर्तृहरिणापि अवलोकितम् रमणीयशब्दार्थैर्गुम्फितं च –

क्षीरेणात्मगतोदकाय हि गुणादत्ता पुरा तेऽखिलाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः।
गन्तुं पावकमुन्मनास्तदभवद् दृष्ट्वा तु मित्रापदम्
युक्तं तेन जलेन शाम्यति सतां मैत्रीपुनस्त्वीदृशी[१]।।

एवं विधा विशिष्टा द्वित्राः पञ्चषा वा एव महाकवयः।

विज्ञकामते तु त्रय एव महाकवयः –

एको भून्नलिनात् ततश्च पुलिनाद् वल्मीकतश्चापरे
ते सर्वे कवयो भवन्ति गुरवस्तेभ्यो नमस्कुर्महे।
अर्वाञ्चो यदि गद्यपद्य-रचनैश्चेतश्चमत्कुर्वते
तेषां मूर्ध्दिन ददामि वामचरणं कर्णाटराजप्रिया।।

पण्डितराज जगन्नाथस्तु स्वसमये स्वमेव एकाकिनं कविं मनुते-

कवयति पण्डितराजे कवयन्त्यन्येऽपि विद्वांसः।
नृत्यति पिनाकपाणौ नृत्यन्त्यन्येऽपि भूतवेतालाः।।

एवं विधः कविः तस्य कर्म काव्यम्, तस्य शास्त्रम् काव्यशास्त्रम्। काव्यशास्त्रस्य अपरं नाम अलंकारशास्त्रं विद्यते।

भामह-दण्डि-वामनादि मते अलंकारस्य काव्ये प्राधान्यात् प्रधानत्वेन व्यपदेशा-भवन्तीति न्यायेन अलंकारेति शास्त्रनाम्ना व्यवहारः प्रचलितोऽभूत्।

'न कान्तमपि निर्भूषं विभाति वनिताननम्'[२] इति मन्वानो भामहाचार्यः अलंकारेणैव काव्यस्य सौन्दर्यं स्वीकरोति। तत्र च अलंकारसामान्यरूपाया अतिशयोक्त्यभिधानाया अलंकारान्तरप्राणस्वरूपाया वक्रोक्तेरेव साम्राज्येन काव्योत्कर्षं मनुते।

---

१. भर्तृहरिनीतिशतके।
२. भामहालंकारे १, १३।

तथा हि –

सेषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना[1]।।
निमित्ततो वचो यत्तु लोकातिक्रान्त-गोचरम्।
मन्यन्तेऽतिशयोक्तिं तामलंकारतया यथा।।[2]

अस्या उपर्युक्ताया अतिशयोक्तेर्महत्त्वं स्वीकुर्वाणेन आनन्दवर्द्धनेनापि उच्यते प्रथमं तावदतिशयोक्तिगर्भता सर्वालंकारेषु शक्यक्रिया। कृतैव च सा महाकविभिः कामपि काव्यच्छविं पुष्यतीति कथं ह्यतिशययोगिता स्वविषयौचित्येन क्रियमाणा सती काव्ये नोत्कर्षमावहेत्[3]।

"अथ सा काव्यजीवितत्वेन तु विवक्षिता" इत्येवं प्रतिपादयता आचार्याभिनवगुप्तेन अस्या अतिशयोक्तेः काव्यजीवितत्वं स्वीचक्रे।

आचार्यवामनेन काव्यं ग्राह्यमलंकारात्। सौन्दर्यमलंकारः। अलंकृतिरलंकारः। इत्येवं कथयता सौन्दर्यरूपालंकारेणैव काव्यस्य ग्राह्यत्वमङ्गीचक्रे। आचार्य-दण्डिना--

काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्येन वक्ष्यति[4]।।
यच्च सन्ध्यङ्ग वृत्त्यङ्ग लक्षणाद्यागमान्तरे।
व्यावर्णितमिदं चेष्टमलंकारतयैव नः[5]।।

इत्येवं प्रतिपादयता अलंकारस्यैव महत्त्वं साम्राज्यं च स्वीचक्रे।

रुद्रटाचार्यस्य –

'काव्यालंकारोऽयं ग्रन्थः क्रियते यथायुक्ति'[6]

---

१. भामहालंकारे २, ८५।
२. तत्रैव २, ८१।
३. ध्वन्यालोके ३, ३७ का० वृत्तिः।
४. काव्यादर्श २, १।
५. तत्रैव २, ६७।
६. रुद्रटालंकारे १, २।

इति कारिकां व्याचक्षाणेन नमिसाधुना स्पष्टमुक्तम् –

'तत्र काव्यालंकारा वक्रोक्ति-वास्तवादयोऽस्य ग्रन्थस्य प्राधान्यतोऽभिधेयाः। अभिधेय-व्यपदेशेन हि शास्त्रं व्यवदिशन्तिस्म पूर्वकवयः। दोषरसाश्चेह प्रासङ्गिकाः न तु प्रधानाः' इति।

आचार्यकुन्तकेन –

'अलंकृतिरलंकार्यमपोद्धृत्य विवेच्यते।
तदुपायतया तत्त्वं सालंकारस्य काव्यता[1]।।'

इति स्वकीयां कारिकां व्याख्यायता प्रतिपादयांचक्रे –

'अयमत्र परमार्थः- सालंकारस्य अलंकरणसहितस्य सकलस्य निरस्तावयवस्य सतः काव्यता कवि-कर्मत्वम्। तेन अलंकृतस्य काव्यत्वमिति स्थितिः। न पुनः काव्यस्य अलंकारयोग इति।

अत्रायमाशयः कुन्तकस्य –

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न हि।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन[2]।।
उपायाः शिक्ष्यमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते[3]।।

इति व्याकरणसिद्धान्ते पद-वर्णन्यायेन यथा व्यवहारो भवति तथैव काव्येऽपि काव्यस्य अलंकार इति व्यवहारः। एवं हि अलंकारस्य प्राधान्यात् ग्रन्थस्यास्य अलंकार इत्यभिधानम्। एतस्य च अलंकारस्य शास्त्रम् – अलंकार-शास्त्रम्।

साहित्यशास्त्रम् –

काव्यशास्त्रस्य अलंकारशास्त्रस्य च अस्मिन्नेवार्थे साहित्य-शास्त्रस्यापि व्यवहारो भवति।

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वती-परमेश्वरौ।।[4]

---

१. वक्रोक्तिजीविते १, ६।
२. वैयाकरणभूषणसारे ६६
३. वाक्यपदीये - ब्रह्मकाण्डे।
४. रघुवंशे १, १।

इत्यत्र शब्दार्थयोः यादृशः सहभावः समपेक्षितोऽस्ति तादृशमेव सह भावरूपं साहित्यं शब्दार्थयुगलरूपे काव्ये समपेक्षितं भवति।

भामहाचार्यस्य 'शब्दार्थौ सहितौ काव्य'मित्यत्र शब्दार्थयोरपूर्वसहभावस्य कृते एव साहित्य-शब्दस्य प्रयोगो विधीयते।

एतच्च साहित्यं सुस्पष्टयता आचार्यकुन्तकेन प्रत्यपादि –

समसर्वगुणौ सन्तौ सुहृदाविव संगतौ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा।।
साहित्यमनयोः शोभा-शालितां प्रति काप्यसौ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः [1]।। इति।

एवं हि शब्दार्थयोः साहित्यम् अन्यूनानतिरिक्तत्व-मनोहारि स्वरूपम् अवस्थानम्। एतेनैव च साहित्येन काव्यं शोभाशालितां प्राप्नोति।

एतस्यैव साहित्यशास्त्रस्य कृते 'साहित्य-विद्या' शब्दस्य प्रयोगः राजशेखरेण क्रियते- 'पञ्चमी साहित्यविद्या' इति यायावरीयः इति।

साहित्यशब्दस्य व्युत्पत्ति-लभ्येनाप्यर्थेन इदमवबुध्यते। सम्यक् आधीयते इत्यर्थे सम् पूर्वकात् दधातेः कर्मणि क्तप्रत्यये 'दधातेर्हिः' इति ह्यादेशे 'समो वाहिततयोः' इति वार्त्तिकेन समो मकारस्य लोपे प्रथमा द्विवचने सहितौ इति। तयोर्भावः साहित्यम् इति। अत एव शब्दार्थौ सहितौ काव्यमिति भामहकाव्यलक्षणं संगच्छते।

(क) रस-सम्प्रदायः-

रसालंकार-रीति-ध्वनि-वक्रोक्त्यौचित्यात्मकेषु षट्सु सम्प्रदायेषु भरतमुनिसमुद्भावितः रस-सम्प्रदायः प्रथमः। एतत् सम्प्रदायरहस्यन्तु इत्थम् प्रतिपाद्यते –

नाट्यशास्त्रे भरतमुनिना 'तत्र रसानेव तावदादौ अभिव्याख्यास्यामः। नहि रसादृते कश्चिदर्थः प्रवर्तते'[2] इत्येवं प्रतिष्ठापयांचक्रे। एतत् प्रसङ्गे आचार्याभिनवगुप्तेन तद्रहस्यं समुद्घाटितम् –

---

१. वक्रोक्तिजीविते १, ६-१०।
२. नाट्यशास्त्रे ६, ३१ का० वृत्तिः ।

'तदेवं मूलं बीजस्थानीयात् कविगतो रसः। ततो वृक्षस्थानीयं काव्यम्। तत्र पुष्पादिस्थानीयोऽभिनयादि नटव्यापारः। फल-स्थानीयः सामाजिकरसास्वादः। तेन रसमयमेव विश्वम्'[1] इति।

अतः काव्ये मूलभूतत्वात् प्राधान्याच्च रसस्य आत्मस्थानीयत्वम्। एवं हि भरतादारभ्य रस-सम्प्रदायः प्रचलितः। परवर्ति-कालेऽपि विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिरिति रस-सूत्रमाधारीकृत्य रसविवेचनस्य रसानुभूतिप्रक्रिया-विचारस्य च प्रामुख्यमभूत्। 'रस-आत्मा'[2] इति काव्यमीमांसाकारः 'वाग्वैदग्ध्य-प्रधानेऽपि रस एवात्र जीवितम्[3] इति अग्निपुराणकारः।

न खलु काव्यस्य रसानां च अलंकार्यालंकार-भावः किन्तु आत्म-शरीर-भावः। रसादिः काव्यस्य आत्मत्वेन अवस्थितः शब्दार्थौ च शरीररूपतया।

यथा हि आत्माधिष्ठितं शरीरं जीवतीति व्यपदिश्यते, तथा रसाधिष्ठितस्य काव्यस्य जीवद्रूपतया व्यपदेशः क्रियते। तदाहुः –

'रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः।
कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम्'[4]।

इति इन्दुराजः।

काव्यस्यात्मनि सङ्गिनि रसादिरूपे न कस्यचिद् विमतिः इति ध्वनिविरोधी व्यक्तिविवेककारः महिमभट्टश्चापि स्वीचकार। अतो रससम्प्रदायस्य महत्ता समीचीनता च सुस्पष्टा।

(ख) अलंकार-सम्प्रदायः

अलंकार-सम्प्रदायस्य आचार्याणां मते भरतमुनि-प्रतिपादितरसस्य महत्त्वम् अनिवार्यत्वं च नाट्ये एव। काव्ये तु अलंकारेणैव सौन्दर्यं जायते इत्येवं मन्यमानेन अलंकार-सम्प्रदायप्रतिष्ठापकेनआचार्यभामहेन –

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति।

---

१. यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पफलं यथा। तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः। तत्रैव ६, ३८।

२. काव्यमीमांसा १४ शे पृष्ठे।

३. अग्निपुराणे ३३६ अ०।

४. काव्यालंकारसारसंग्रहे लघुवृत्तौ पृ० ८३।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी

किमिव हि मधुराणां मण्डनं नाकृतीनाम्[१]।।

इतिकालिदासस्यसिद्धान्तविपरीतम् –

न कान्तमपि निर्भूषं विभाति वनिताननम्[२]।।

इति स्वमतं प्रतिष्ठापयाञ्चक्रे।

तत्र भामहेन अलंकारसामान्यरूपा अतिशयोक्त्यभिधाना अलंकारान्तरप्राणस्वरूपा वक्रोक्तिरेव काव्ये काव्यत्व-सम्पादिका। यतो हि एतद् द्वारैव अर्थस्य विभावनं भवति, अतः अस्याः वक्रोक्तेः काव्ये सद्भावाय प्रयत्नो विधेयः। एतस्या असद्भावे काव्यं नैव काव्यमपि तु वार्तामात्रम्। लोचनकारेणापि आनन्दाभिमतायाः भामहातिशयोक्तेः काव्यजीवितत्वं कथयांचक्रे।

आचार्यवामनेन सौन्दर्यरूपालंकारेणैव काव्यस्य ग्राह्यत्वमङ्गीकुर्वत अलंकारस्य महत्त्वं स्वीचक्रे।

[३]काव्यशोभाकरं धर्मम् अलंकारं मन्यमानेन दण्डिना काव्य-सौन्दर्य-सम्पादकत्वरूपेण अलंकारस्य काव्ये सर्वातिशायिमहत्त्वं प्रतिष्ठापयांचक्रे।

प्रथमवाग्भटेनापि –

'दोषैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः।

स्त्रीरूपमिव नो भाति तं ब्रुवेऽलंक्रियोच्चयम्[४]।

इत्येवं कथयता भामहमतं सर्वथा समर्थितम्।

एवं हि अलंकारस्य महत्त्वेन काव्ये प्राधान्येन च अलंकार-सम्प्रदायः प्रचलितः। एतत् सम्प्रदायस्य आचार्यैः भामह-दण्डि-भट्टोद्भट-रुद्रट-भट्टेन्दुराजप्रभृतिभिः रसवदाद्यलंकारेषु रसादीनामन्तर्भावश्च कृतः।

(ग) रीति-सम्प्रदायः

'काव्यं ग्राह्यमलंकारात्। सौन्दर्यमलंकारः' इत्येवं मन्वानेनापि वामनेन 'रीतिरात्मा काव्यस्य'[५] इत्येवं सिद्धान्तयता रीतिसम्प्रदायः प्रतिष्ठपयांबभूव। 'विशिष्ट-पदरचना

---

१. अभिज्ञानशाकुन्तले।

२. भामहालंकारे १, १३।

३. काव्य शोभा वक्ष्यति। काव्यादर्श २, १।
यच्च सन्ध्यऽलङ्कारतयैव नः। तत्रैव २, २६७।

४. वाग्भटालंकारे ४, १।

५. काव्यालंकारसूत्रवृत्ती १, २, ६।

रीतिः। विशेषो गुणात्मा'[१]इत्येवं प्रतिपादयता तेन गुणविशिष्ट- पदरचनात्मिकाया रीतेरात्मत्वं स्वीचक्रे।

काव्य-शोभायाः कर्तारो धर्मा गुणाः। तदतिशयहेतवस्त्वलंकाराः[२]। इत्येवं सिद्धान्तयताआचार्यवामनेन –

काव्य-शोभाकरान् धर्मानलंकारान् प्रचक्षते इति दण्डिमतं खण्डयता पूर्वे (गुणाः) नित्याः[३] इति प्रतिपादयता गुणस्य नित्यत्वं महत्त्वं च प्रतिपादयांचक्रे।

एतत्प्रसङ्गे वामनाचार्येण स्पष्टं प्रतिपाद्यते–

युवतेरिव रूपमङ्गकाव्यं स्वदते शुद्धगुणं तदप्यतीव।

विहितप्रणयं निरन्तराभिः सदलंकार-विकल्प-कल्पनाभिः।।

यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनबन्ध्यमङ्गनायाः।

अपि जनदयितानि दुर्भगत्वं नियतमलंकरणानि संश्रयन्ते[४]।।

इन्दुराजेनापि काव्यालंकारसारसंग्रहलघुवृत्तौ एवं प्रतिपाद्यते – यथा हि लौकिकानामलंकाराणां गुणसंस्कृते युवति-वपुषि निबध्यमानानामलंकारता, एवं काव्यालंकाराणामपि द्रष्टव्यम्। जरद्योषिति अलङ्कारा निबध्यमाना न तस्याः शोभां कुर्वन्ति प्रत्युत तस्यां निबध्यमानानां तेषामात्मीयमेव सौभाग्यं हीयते। तथा काव्यालंकाराणामपि निर्गुणे काव्ये निबध्यमानानां काव्यशोभाहेतुत्वाभावः शोभाहानिश्च भवति इति[५]।

एवं हि गुणविशिष्टपदरचनात्मिकासु तिसृषु रीतिषु काव्यं प्रतिष्ठितं भवति। यदवोचद् भट्टवामनः –

एतासु तिसृषु रीतिषु रेखास्विव चित्रं काव्यं प्रतिष्ठितम्[६] इति एवं च रीतिद्वारैव काव्यत्वसम्पादनात् आत्मस्वरूपरीतेः सद्भावे एव काव्यस्य महत्त्वाच्च रीतिसम्प्रदायः प्रचलितः।

---

१. तत्रैव १, २, ७-८।

२. तत्रैव ३, १, १-२।

३. तत्रैव ३, १, ४।

४. तत्रैव।

५. काव्यालंकारसारसंग्रहे ७४ कारिकायाम् लघुवृत्तिः।

६. काव्यालंकारसूत्रवृत्ती १, २, १३।

(घ) ध्वनिसम्प्रदायः-

काव्यस्यात्मा ध्वनिरितिबुधैर्यः समाम्नातपूर्वः

तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।

केचिद् वाचां स्थितमविषये तत्त्वमूचुस्तदीयं

तेन ब्रूमः सहृदयमनःप्रीतये तत् स्वरूपम्[१]।।

इति प्रतिपादयता काव्यस्यात्मा ध्वनिरिति स्वीकुर्वणेन आनन्दवर्धनेन पूर्वतः समाम्नातस्य ध्वनेः काव्यात्मरूपेण प्रतिष्ठापनं चक्रे। ततश्च ध्वनि-सम्प्रदायः प्रवर्तितः।

तत्र ध्वनतीति ध्वनिः व्यञ्जकः शब्दः व्यञ्जकः अर्थश्च ध्वनिः, ध्वन्यते इति ध्वनिः-वस्त्वलंकाररसादिरूपोऽर्थो ध्वनिः, ध्वन्यते अनेनेति ध्वनिः-व्यञ्जना व्यापाररूपो ध्वनिः, ध्वन्यते अस्मिन्निति ध्वनिः- व्यंग्यार्थप्रधानं काव्यं ध्वनिः। एवं पञ्चविधेष्वर्थेषु ध्वनिशब्दः प्रयुज्यते। तत्र वस्त्वलंकार-रस-भेदेन त्रिविधो ध्वनिः आनन्दवर्धनाचार्यमते काव्यस्य आत्मा। लोचनकारस्य अभिनवगुप्ताचार्यस्य मते तु-रस-ध्वनिरेव वस्तुतः काव्यस्यात्मा, वस्त्वलंकारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तौ इत्यभिप्रायेण ध्वनिः काव्यस्यात्मा इति सामान्येनोक्तमिति प्रतिपादनात् रस-ध्वनिरेव काव्यस्यात्मा। अभिनवस्य कथनमिदं सर्वथा समीचीनम्। भ्रमधार्मिक[२] इत्यादौ मा भ्रमेति निषेधरूप-वस्तु-ध्वनेः पर्यवसानम् शृङ्गारे एव। एवमेव भद्रात्मनो दुरधिरोहतनोः इत्यादौ व्यंग्यस्य गजरूपार्थस्य तेन सह ध्वन्यमानस्य उपमालंकारस्य च राजविषयकरतिभावे एव पर्यवसानं भवति।

इदं हि प्रतीयमानं वस्तु अङ्गनासु लावण्यमिव महाकवीनां वाणीषु अन्यदेव चकास्ति। तथाहि –

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।

यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।[३]

अत्र वस्तु पदेन त्रिविधस्यापि ध्वनेर्ग्रहणम्। अयमेव हि प्रतीयमानरूपोऽर्थः काव्यस्यात्मा। अत एव च ध्वनि-सम्प्रदायः।

---

१. ध्वन्यालोके १,१।

२. तत्रैव १, ४ कारिकायाम् उद्धृतम्।

३. ध्वन्यालोके १, ४।

काव्यात्मसिंहासने ध्वनेः प्रतिष्ठापनानन्तरम् गुणालंकाररीतीनां स्वस्वस्थानं सुनिश्चितमभूत्।

तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।
अङ्गाश्रितास्त्वलंकाराः मन्तव्याः कटकादिवत्[1]।।
गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा[2]।

रसान् .... ततः प्रभृति प्रायेण अयमेव सिद्धान्तः स्वीकृतः आचार्यैः।

(ङ) वक्रोक्ति-सम्प्रदायः

'वक्रोक्तिः काव्यजीवितम्' इति स्वीकुर्वाणेन कुन्तकेन भामहादि-प्रतिपादितायाः वक्रोक्तेः स्वरूपं सुस्पष्टयता वक्रोक्तिसम्प्रदायः प्रतिष्ठापितः।

उभावेतावलंकार्यौ तयोः पुनरलंकृतिः।
वक्रोक्तिरेव-वैदग्ध्यभङ्गीभणितिरुच्यते[3]।।

इति कारिकां व्याख्यायता कुन्तकेन –

वैदग्ध्यं विदग्धभावः, कविकर्मकौशलम्, तस्य भङ्गी विच्छितिः तया भणितिः वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा। विचित्रैवाभिधा वक्रोक्तिरित्युच्यते। शास्त्रादि-प्रसिद्धशब्दार्थोपनिबन्ध-व्यतिरेकि प्रसिद्ध प्रस्थानव्यतिरेकि वैचित्र्यम् इत्येवं प्रकारेण वक्रोक्तेः स्वरूपं प्रत्यपादि।

व्यक्तिविवेककारेणमहिमभट्टेनापि –

प्रसिद्धं मार्गमुत्सृज्य यत्र वैचित्र्यसिद्धये।
अन्यथैवोच्यते योऽर्थः सा वक्रोक्तिरुदाहृता[4]।।

इत्येवं समुद्घोषितम्।

वक्रोक्तिः काव्य-विच्छितिं जनयतीत्यत्र सहृदयहृदयमेव प्रमाणम्। हर्षचरिते दधीचेर्नाम विज्ञातुम् सावित्री विकुक्षिं पृच्छति – कानि वा अस्य पुण्यभाञ्जि भजन्ति अभिख्याक्षराणि ?

---

१. तत्रैव २, ७।
२. तत्रैव ३, ६।
३. वक्रोक्तिजीविते १, १०।
४. व्यक्ति विवेक १, ६६।

निरन्तररसोद्‌गार-गर्भ-सन्दर्भ-निर्भराः।
गिरः कवीनां जीवन्ति न कथामात्रमाश्रिताः[1]।।

इत्येवं प्रकारेण रसस्य महत्त्वं स्वीकुर्वाणेनापि कुन्तकेन वक्रोक्तेरेव काव्यजीवितत्वमङ्गीकृतम्। वक्रोक्तिद्वारैव काव्यजीवन-सम्पादनात् वक्रोक्ति-सम्प्रदायः ततः प्रचलितः।

(च)औचित्यसम्प्रदायः –

औचित्य-सम्प्रदायप्रर्वतकेनआचार्यक्षेमेन्द्रेण –

उचितं प्राहुराचार्याः सदृशं खलु यस्य यत्।
उचितस्य च यो भावस्तदौचित्यं प्रचक्षते[2]।।
काव्यस्यालमलंकारैः किं मिथ्या जनितैर्गुणैः।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते[3]।।
अलंकारास्त्वलंकारा गुणा एव गुणाः सदा।
औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्[4]।।

इत्येवंमन्यमानेन क्षेमेन्द्रेण औचित्यमेव काव्यजीवितं स्वीकुर्वता औचित्य-सम्प्रदायः प्रतिष्ठापितः।

मुनिचन्द्रेणापि धर्मबिन्दुटीकायां स्पष्टं समुद्‌घोषितम् –

औचित्यमेकमेकत्र गुणानां राशिरेकतः।
विषायते गुणग्राम औचित्य-परिवर्जितः[5]।। इति।

इत्येवम् औचित्यस्य महत्त्वं काव्ये तस्यानिवार्यत्वं च स्वीकुर्वता क्षेमेन्द्रेण प्रतिपादितम् –

उचितस्थानविन्यासादलंकृतिरलंकृतिः।
औचित्यादच्युता एव भवन्त्येव गुणा गुणाः[6]।।

---

१. वक्रोक्तिजीविते ४, ११।
२. औचित्यविचारचर्चायाम् ७।
३. तत्रैव ४।
४. तत्रैव ५।
५. धर्मबिन्दु टीकायाम् २६ पृष्ठे।
६. औ० वि० च० ६।

यतो हि –

कण्ठे मेखलया नितम्बफलके तारेण हारेण वा
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।
शौर्येण प्रणते रिपौ करुणया नायान्ति के हास्यताम्
औचित्येन विना रुचिं प्रतनुते नालंकृतिर्नो गुणाः।।

एतच्च सुस्पष्टयता तेन कथितम् –

परस्परोपकारक रुचिर-शब्दार्थरूपस्य काव्यस्य उपमोत्प्रेक्षादयो ये प्रचुरालंकारास्ते कटक कुण्डलकेयूरादिवदलंकारा एव, बाह्य-शोभा-हेतुत्वात्। येऽपि काव्यगुणाः केचन तल्लक्षणविचक्षणैः समाम्नातास्तेऽपि श्रुतसत्य-शीलादिवद् गुणा एव, आहार्यत्वात्। औचित्यन्तु अग्रे वक्ष्यमाणलक्षणं स्थिरमविनश्वरं जीवितं काव्यस्य, तेन विना अस्य गुणालंकारयुक्तस्यापि निर्जीवत्वात्। रसेन शृङ्गारादिना सिद्धस्य प्रसिद्धस्य काव्यस्य धातुवादरस-सिद्धस्येव तज्जीवितं स्थिरमित्यर्थः[१]।

अत एवोच्यते - औचित्यमेकमेवात्र – औचित्यपरिवर्जितः।। इति।

आनन्दवर्धनेनापि-

'अनौचित्यादृते नान्यद् रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा[२]।।

इत्येवं कथयता औचित्यस्य महत्त्वं प्रकटितम्।

जयमंगलाचार्येण-

औचित्यं श्लाघ्यते तत्र कविता जीवितोपमम्।
कवयस्तदजानन्तः कथं स्युः कीर्तिभाजनम्[३]।।

इत्येवं प्रतिपादयता औचित्य-महिमा प्रदर्शितः।

अतश्च औचित्यैनैव काव्य-जीवनात् - औचित्य सम्प्रदायः प्रचलितः।

---

१. औचित्यविचारचर्चायाम् ११५ पृष्ठे।
२. ध्वन्यालोक ३, १४।
३. कविशिक्षायाम्।

अयमत्र निष्कर्षः –

शब्दानां सुप्रयोगे पक्षद्वयं वर्तते। प्रयोगस्य शुद्धता प्रयोगस्य चमत्कारिता च। व्याकरणेन शुद्धिज्ञानं क्रियते अलंकारशास्त्रेण च चमत्कार-ज्ञानम्। 'शुष्कं काष्ठं तिष्ठत्यग्रे' 'नीरसतरुरिह विलसति पुरतः' इत्युभे अपि वाक्ये व्याकरणनयेन शुद्धे अपि चमत्कार-दृष्ट्या भेदं भजतः इति विजानते विपश्चितः। प्रथमापेक्षया द्वितीये लालित्यं चमत्कारश्च विद्यते।

कविकर्म-कौशलं केवल-निर्दुष्ट-प्रयोगेणैव सफलं न भवति अपि तु आह्लादकविच्छित्तिजनक-प्रयोगेण सफलं भवति। एतादृशसफलप्रयोग-ज्ञानाय काव्यशास्त्रम्। तत्र यस्य मते यद्वस्तु काव्ये प्राधान्येन चमत्कारजनकं तन्मूलकमेव सम्प्रदाय-प्रवर्तनं भवति।

भरतमते रसस्य प्राधान्येन चमत्कारजनकत्वात् – रससम्प्रदायः।

भामहमते अलंकारस्य तद् रूपत्वात् – अलंकार-सम्प्रदायः।

वामनमते रीतेरात्मत्वात् – रीतिसम्प्रदायः।

आनन्दवर्धनमते ध्वनेः काव्यात्मत्वात् – ध्वनि-सम्प्रदायः।

कुन्तकमते वक्रोक्तेः काव्यजीवितत्वात् – वक्रोक्ति-सम्प्रदायः।

क्षेमेन्द्रमते च औचित्यस्य तथा रूपत्वात् – औचित्य-सम्प्रदायः इतिशम्।

अलंकारः काव्यजीवितमित्येतत् समीक्षणम्

अलंकार-सम्प्रदाय-प्रतिष्ठापकेन आचार्यभामहेन लोकातिक्रान्तगोचररूपां वक्रोक्तिस्वरूपाम् अतिशयोक्तिमेव अलंकारतया मन्वानेन तामेव काव्य- जीवनाधारभूतां स्वीकृत्य तत्स्वरूपं प्रतिपाद्यते--

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यन्तेऽतिशयोक्तिं तामलंकारतया यथा[1]।।इति।

अर्थात् कवेर्यद्वचः केनापि निमित्तेन यत्र लोकातिक्रान्तगोचरतामादधाति तत्र अतिशयार्थस्य विद्यमानतया तामेव अतिशयोक्तिरूपामलंकृतिम् मन्यन्ते मनीषिणः। सा एषा वक्रोक्तिरूपा अतिशयोक्तिरेव काव्ये सर्वत्र अभिप्रेता भवति, यतः अनयैव वक्रोक्त्या काव्ये अर्थस्य विभावनं रसमयीकरणं जायते, अतः काव्ये वक्रोक्ति-सम्पादनाय कविना प्रयत्नो विधेयः। वक्रोक्तिं विना अलंकारत्वमेव न संभाव्यते--

सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना[2]।। इति।

अस्या वक्रोक्तिरूपाया अतिशयोक्तेरभावे काव्यं काव्यं न भवति, अपि तु वार्तामात्रम्। तथा हि--

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।
इत्येवमादि किं काव्यं वार्तमेनां प्रचक्षते[3]।।

आचार्यदण्डी इमामेव वागीशमहितामतिशयोक्तिम् अलंकारान्तराणामपि कारणरूपां मन्यमानः अस्या महत्त्वं प्रतिपादयति[4]।

ध्वनि-सम्प्रदाय-प्रतिष्ठापकेन आनन्दवर्धनेनापि भामहेन निरूपिताया अतिशयोक्तेर्महत्त्वं स्वीकुर्वाणेन प्रतिपाद्यते--

"तत्रातिशयोक्तिः यमलंकारमधितिष्ठति कवि- प्रतिभावशात् तस्य चारुत्वातिशय-योगः अन्यस्य तु अलंकारमात्रतैवेति सर्वालंकार-शरीर-स्वीकरण-योग्यत्वेन

---

१. भामहालंकारे २।८१।

२. तत्रैव २।८५।

३. तत्रैव २।८६।

४. अलंकारान्तराणामप्येकमाहुः परायणम्।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम्।। काव्याद० २।२०।

अभेदोपचारात् सैव सर्वालंकाररूपेत्ययमेवार्थोऽवगन्तव्यः[१]। इयं च अतिशयोक्ति-गर्भता सर्वालंकारेषु कर्तुं शक्या। महाकविभिः कृता चेयं कामपि काव्यच्छविं पुष्यतीति"।

अभिनवगुप्तपादेन "अथ सा (अतिशयोक्तिः) काव्यजीवितत्वेन तु विवक्षिता[२]" इत्येवं कथयता भामहादिगते अस्या अतिशयोक्तेर्जीवितत्वं सूचितम्। तथा अतिशयोक्तिः सर्वालंकार-सामान्यरूपा अर्थस्य विभावने-रसमयीकरणे कारणीभूता चेत्यपि प्रतिपादितम्[३]। भामहेन निरूपिता इयं हि वक्रोक्तिरूपातिशयोक्तिः अलंकारसामान्यस्वरूपा काव्यस्य जीवितभूता।

अलंकारसम्प्रदायाचार्येषु दण्डी काव्यशोभाकरधर्मत्वेन अलंकारस्य प्राधान्यं मनुते। वामनाचार्यः सौन्दर्यरूपालंकारेणैव काव्यस्य ग्राह्यत्वं स्वीकरोति। भट्टोद्भटः रुद्रटश्च रसवदाद्यलंकारेषु रसभावादीनामन्तर्भावेन अलंकारस्य प्रधानत्वमङ्गीकुरुतः।[४]

एवं हि उपर्युक्तप्रकारेण वक्रोक्त्यपरपर्यायातिशयोक्तिरूपस्य सौन्दर्यरूपस्य वालंकारस्य सत्त्वादेव काव्यत्व-सम्पादनात्, काव्यशोभाकर-धर्मस्य अलंकारत्वस्वीकारात्, रसवदाद्यलंकारेषु रसभावादीनामन्तर्भावात्, रुद्रटाभिमतभावालंकारे प्रतीयमानार्थ ग्रहणाच्च अलंकारस्य काव्ये प्राधान्येन काव्यजीवितत्वमिति अलंकार-सम्प्रदायाचार्याणां मतम्।

भामहादिभिः प्रतिपादितम् उपर्युक्तं यदलंकारस्य स्वरूपं महत्त्वञ्च तद्भिन्नम् –

"किमिव हि मधुराणां मण्डनं नाकृतीनाम्"[५] इति महाकविकालिदासीय सिद्धान्तमनुसरता वामनाचार्येण--

"यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनबन्ध्यमङ्गनायाः।
अपि जनदयितानि दुर्भगत्वं नियतमलंकरणानि संश्रयन्ते।"[६]

इत्येव मन्यमानेन "काव्यशोभायाः कर्तारो धर्मा गुणाः। तददतिशय हेतवस्त्वलंकाराः[७]" इत्येवं सिद्धान्तयाञ्चक्रे। अमुमेव राद्धान्तमाधारीकृत्य –

---

१. ध्वन्यालोके ३।३७ कारिका वृत्ती।

२. तत्रैव ध्वन्यालोकलोचने।

३. तेनातिशयोक्तिः सर्वालंकारसामान्यम्। तथाह्यनयातिशयोक्त्यार्थः सकलजनोपभोग-पुराणीकृतोऽपि विचित्रतया भाव्यते। तथा प्रमदोद्यानादिभिर्विभावतां नीयते विशेषेण च भाव्यते रसमयी क्रियते। लोचने तत्रैव।

४. द्रष्टव्या 'काव्यात्म-मीमांसा' पृ० १२०-१२६।

५. अभिज्ञानशकुन्तले १, १६।

६. काव्यालंकार सूत्रवृत्ती ३, १, २।

७. तत्रैव ३, १, १-२।

"तमर्थवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।

अङ्गाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत[1]।।"

इति आनन्दवर्धनाचार्येण –

"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।

हारादिवदलंकारास्तेऽनुप्रासोपमादयः[2]।। इति।

मम्मटाचार्येण च अलंकारस्य वास्तविकस्वरूपं निरूपयाञ्चक्रे। पश्चाद्वर्तिभिः प्रायेण सर्वैरपि अलंकारशास्त्राचार्यैः तथैवानुसृतम्।

अत्रेदं विभावनीयम् –

व्यावहारिकजगति यथा कटक-कुण्डलाद्यलंकारः अङ्गाद्युत्कर्षं जनयन् शरीरे विद्यमान-शोभाया अतिशयाधायकतया अङ्गिनमुत्कर्षयति तथैव काव्येऽपि शब्दालङ्कारः शब्दम् अर्थालंकारश्च अर्थमुत्कर्षयन् विद्यमानं रसाद्यङ्गिनं समुत्कर्षयति। अङ्गिनोरसद्भावे तु वस्तुतः अलंकारस्य तथा चारुत्वं नैव भवति। अत एवोक्तम्--

"रस-ध्वनिर्न यत्रास्ति तत्र बन्ध्यं विभूषणम्।

मृताया मृगशावाक्ष्याः किं फलं हारसम्पदा[3]।।"

रस-भावादि-विषय-विवक्षा-विरहे सति।

अलंकार-निबन्धो यः स कविभ्यो न रोचते[4]।

रसभावादि-विषय-विवक्षा-विरहे सति।

अलंकार-निबन्धोयः स चित्र-विषयो मतः[5]।। इति।

अतः अलंकारः नास्ति काव्ये शोभाकर-धर्मः, अपि तु विद्यमानशोभाया अतिशयाधायको धर्मः। एतावता निश्चीयते यत् अलंकारे शोभा-कर्तृत्वं नास्ति, अपि तु शोभातिशयहेतुत्वमेव।

---

१. ध्वन्यालोके २, ७।

२. काव्यप्रकाशे ८, २।

३. द्रष्टव्या काव्यात्ममीमांसा पृ० ३०१!

४. सरस्वती कण्ठाभरणे पृ० ७६१।

५. ध्वन्यालोके ३, ४३ कारिकायामान्तरश्लोकः।

अत एव भट्टोद्भटस्य काव्यालंकारसारसंग्रहस्य लघुवृत्तिटीकाकारेण प्रतीहारेन्दुराजेन स्पष्टमुदलेखि--''यथा हि लौकिकानामलंकाराणां गुण-संस्कृते युवतिवपुषि निबध्यमानानामलंकारता एवं काव्यालंकाराणामपि द्रष्टव्यम्। जरद्योषिति अलंकारा निबध्यमाना न तस्याः शोभां कुर्वन्ति प्रत्युत तस्यां निबध्यमानानां तेषामात्मीयमेव सौभाग्यं हीयते। तथा काव्यालंकाराणामपि निर्गुणे काव्ये निबध्यमानानां काव्य-शोभा-हेतुत्वाभावः शोभाहानिश्च भवति।[1]

भामहस्य लोकातिक्रान्तगोचररूपा वक्रोक्तिरतिशयोक्तिर्वा न स्वयं साध्यरूपा, अपि तु कस्यापि तत्त्व-विशेषस्य सिद्धौ साधनरूपैव। अतः सा स्वयं काव्य-जीवितं भवितुं नार्हति।

अपरञ्च आनन्दवर्धनाचार्यस्य कथनमिदं सर्वथा समीचीनं यत् ''अलंकारो हि चारुत्वहेतुः प्रसिद्धः। न त्वसौ आत्मा एव आत्मनश्चारुत्वहेतुः[2]।

अपरञ्च भामहप्रतिपादिताया अलंकारसामान्यरूपाया[3] अतिशयोक्तेः तन्मते सर्वत्र काम्यत्वेन विद्यमानत्वात् अतिशयोक्ति-सहितैरुपमाद्यलंकारैः सह सांकर्यापत्तिः स्यात्।

अतः भामहोक्तातिशयोक्तिरूपस्याप्यलंकारस्य काव्य-जीवितत्वं नैव स्वीकर्तुं शक्यते इतिशम्।

---

१. काव्यालंकारसारसंग्रह लघुवृत्ति टीकायाम् पृ० ८१-८२।

२. ध्वन्यालोके २, ५ कारिकावृत्तौ।

३. तेनातिशयोक्तिः सर्वालंकार-सामान्यम्। ध्वन्यालोकलोचने पृ० २६०।

अलङ्कार - शास्त्रमेव
सौन्दर्य - शास्त्र - समुद्गम - स्थानम्

अलंकार-शास्त्रमेव सौन्दर्य-शास्त्र-समुद्गम-स्थानमिति विवेचनात् पूर्वं किन्तावत् शास्त्रमिति प्रतिपादनमावश्यकम्। शास्यते अनेनेति व्युत्पत्त्या विधि-निषेधात्मकमनुशासनं येन सम्पाद्यते तच्छास्त्रम्। अत एव भोजराजेन प्रतिपादितम्–

"यद् विधौ च निषेधे च व्युत्पत्तेरेव कारणम्।
तदध्येयं विदुस्तेन लोकयात्रा प्रवर्तते[1]।।"

अर्थात् विधि-निषेधयोर्व्यावहारिकं ज्ञानं येन समवाप्यते तदेव शास्त्रं तच्चाध्येयं भवति।

तच्च–

"काव्यं शास्त्रेतिहासौ च काव्य-शास्त्रं तथैव च।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्।।[2]

इति रीत्या १. काव्यम्, २. शास्त्रम्, ३. इतिहासः, ४. काव्यशास्त्रम्, ५. काव्येतिहासः, ६. शास्त्रेतिहासश्चेति षड्विधम्। काव्यशास्त्रस्यैव अपरं नाम अलंकारशास्त्रम्, साहित्यशास्त्रञ्च[3]। एवञ्च अलंकार-विषयक-विधि-निषेधयोर्ज्ञानं शासनञ्च येन अवाप्यते तदलंकार-शास्त्रम् तथा सौन्दर्यविषयक-विधि-निषेधयोर्ज्ञानं येन प्राप्यते तत् सौन्दर्यशास्त्रम्।

एतच्छास्त्रस्य अलंकारशास्त्रेति नामकरणे कारणं निर्दिशता रुय्यकेण "अलंकारसर्वस्वे" प्रतिपादयांचक्रे "इह हि तावद् भामहोद्भट-प्रभृतयश्चिरन्तनालंकारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतयालंकार-पक्ष-निक्षिप्तं मन्यन्ते[4] इत्यतो-भामह-दण्डि-वामनादीनां मते काव्ये अलंकारस्य प्राधान्यात् प्रधानत्वेन व्यपदेशा भवन्तीति न्यायेन अलंकारशास्त्रेति नाम प्रचलितमभूत्।

---

१. सरस्वतीकण्ठाभरणे २, १३८।

२. तत्रैव २, १३९।

३. क्रियाविधिः क्रियाकल्पश्चेति नामद्वयमपि प्राचीन ग्रन्थे उल्लिखितं वर्तते। द्र० 'काव्यशास्त्र का इतिहास पी० वी० काणे।

४. अलंकार सर्वस्वे पृ० ३।

काव्ये अलंकारस्य प्राधान्यं प्रतिपादयता भामहाचार्येण--

"न कान्तमपि निर्भूषं विभाति वनिताननम्[१]" इति मन्वानेन अलंकारेणैव काव्यस्य सौन्दर्यं स्वीचक्रे।

"वक्रत्वमेव काव्यानां परा भूषेति भामहः[२]।"

इत्याचार्यैः प्रख्यापनात् काव्य-सौन्दर्य-जनकः स चालंकारस्तन्मते वक्रोक्तिरतिशयोक्तिर्वा।

आचार्यभामहेन काव्यत्व-सम्पादिकाया वक्रोक्तिरूपाया-अतिशयोक्तेर्महत्त्वं स्वरूपञ्च प्रतिपादयता निरूपयांचक्रे--

"निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यन्तेऽतिशयोक्तिं तामलंकारतया यथा।।"[३] इति।

अयमाशयः—किमपि निमित्तीकृत्य लोकातिक्रान्त-गोचरं यद् वचनं काव्ये कविना प्रयुज्यते तदेव तत्र अतिशयाधानं कर्तुं क्षमते। अतस्तामेव अतिशयोक्तिम् अलंकारतया मन्यन्ते मनीषिणः। इयमेव अतिशयोक्तिरूपा वक्रोक्तिः काव्ये सर्वत्र काम्यते, यतः अनयैव वक्रोक्त्या अर्थस्य विभावनं रसमयीकरणं जायते, अतः कविना अस्या आधानाय प्रयत्नो विधेयः। अनया विना काव्ये अलंकारस्य अस्तित्वमेव नैव शक्यते सम्पादयितुम्। तथा हि--

"सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना[४]।।"

अतो भामहमते अलंकार-सामान्य[५]रूपाया अतिशयोक्त्यभिधानाया अलंकारान्तरप्राणस्वरूपाया-वक्रोक्तेरेव साम्राज्येन काव्य-समुत्कर्षः[६]।

दण्डिनापि--

"अलंकारान्तराणामप्येकमाहुः परायणम्।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम्[७]।।"

---

१. भामहालंकारे १, १३।

२. राघवन् भोज, शृ० प्रकाश० पृ० ४१०।

३. भामहालंकारे २, ८१।

४. तत्रैव २, ८५।

५. तेनातिशयोक्तिः सर्वालंकार सामान्यम्। लोचने पृ० २६०।

६. तत्रातिशयोक्तिर्यमलंकारमधितिष्ठति कवि प्रतिभावशात् तस्य चारुत्वातिशययोगोऽन्यस्य त्वलंकारमात्रतैवेति सर्वालङ्कार- शरीर - स्वीकरण-योग्यत्वेनाभेदोपचारात् सैव सर्वालंकाररूपेत्ययमेवार्थोऽवगन्तव्यः। ध्वन्यालोके ३, ३७ कारिकायाम्।

७. काव्यादर्शे २, २०।

इत्येवं प्रतिपादयता वागीश-महिताया अस्या अतिशयोक्तेः अलंकारान्तर-प्राणप्रदत्वं स्वीचक्रे।

"काव्यशोभाकरान् धर्मानलंकारान् - प्रचक्षते।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति[1]।।"

इत्येवं रूपेण काव्ये अलंकारस्यैव साम्राज्यञ्चाङ्गीचक्रे।

काव्य-सौन्दर्य-सम्पादकः अलंकार-सामान्यरूपः अलंकारान्तर-प्राणप्रदः अयमतिशयोक्त्यलंकारः भामहमते काव्य-जीवितम्[2] अतस्तद्ग्रन्थस्य नाम "काव्यालंकार" इति। वामन-भट्टोद्भटरुद्रट-प्रथमवाग्भटादिभिः, भामहाचार्यमनुसरद्भिः स्वस्वग्रन्थस्य 'काव्यालंकार' इति नामकरणं प्रचक्रे।

"रीतिरात्मा काव्यस्ये[3]" ति मन्वानेनापि वामनेन

"काव्यं ग्राह्यमलंकारात्[4]" इति प्रतिपादयता अलंकारादेव काव्यस्य ग्राह्यत्वं स्वीचक्रे। "सौन्दर्यमलंकारः[5]" इत्येवं निरूपयतस्तस्य मते सौन्दर्यमेवालंकारः। अत्रालंकारशब्दः अलंकृतिरलंकार इति व्युत्पत्या भावसाधनान्तः। भावघञन्तः अलंकरण-व्यापाररूपार्थकोऽपि अलंकारशब्दः "कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति नियमेन तद्व्यापारजन्यं सौन्दर्यरूपार्थं प्रकाशयति। एतच्च अलंकाररूपं सौन्दर्यं काव्ये सर्वथा काम्यम् अत्र नास्ति काचिद् विचिकित्सा।

अत्रेदं विभावनीयम्--

भामहस्य अतिशयोक्तिरूपालंकारः लोकातिक्रान्तगोचररूपेण जायमानः काव्ये शोभां जनयति अर्थस्य विभावनं च करोति।

दण्डिनः शोभाकरधर्मरूपालंकारः सन्धि[6]-सन्ध्यङ्ग वृत्ति-वृत्यङ्ग-लक्षणादि-विविधरूपाणि धारयन् काव्ये शोभां समुत्पादयति। वामनाचार्यस्य अयमलंकारस्तु स्वयं सौन्दर्यरूप एवेति वैशिष्ट्यम्। यद्यपि वामनाचार्यः अस्मात् सौन्दर्यरूपालंकाराद्भिन्नं

---

१. तत्रैव २, १।

२. अथ सा (अतिशयोक्तिः) काव्यजीवितत्वेन तु विवक्षिता। ध्वन्यालोक लोचने पृ० २६०।

३. काव्यालंकार सूत्रवृत्ती १, २, ६।

४. तत्रैव १, १, १।

५. तत्रैव १, १, २।

६. काव्यादर्शे २, २६७।

काव्यशोभा-सम्पादकधर्मगुणस्य अतिशयाधानहेतुमपि अलंकारमङ्गीचकार, किन्तु काव्यस्य उपादेयत्वं तु सौन्दर्यरूपालंकारेणैव स्वीचकार।

अलंकारशास्त्रे काव्य-सौन्दर्यरूपार्थे प्रायः प्रथमोऽयं सौन्दर्यशब्द-प्रयोगः। इदमेव हि सौन्दर्य-रत्नम् अलंकाररत्नाकरात् समुत्पन्नं सत् सौन्दर्यशास्त्रस्य मूलाधार इति आलंकारिका मन्यन्ते। अतः अलंकारशास्त्रमेव सौन्दर्यशास्त्रस्य समुद्गमस्थानमिति सिद्धान्तः समीचीनतामादधाति।

एतत्प्रसङ्गे ये केचन कथयन्ति–प्राचीनेषु सौन्दर्यभावना (Aesthetic Sense) एव नासीत्, यतो हि सुन्दररूपं ते वर्णयन्ति–"खर्वं स्थूलतरं गजेन्द्रवदनं लम्बोदरं सुन्दरम्" वस्तुस्थित्यनभिज्ञा एव इमे आलोचका एवं जल्पन्ति, यतो हि लम्बोदरगजाननगणपतेरस्मिन् वर्णने ते स्वभावोक्त्यलंकार-चमत्कारं चकासतं न पश्यन्ति। न वावलोकयन्ति वाल्मीकि-व्यास- कालिदासादीनां मधुर-रचना-सौन्दर्यम्।

"नहि रसादृते कश्चिदप्यर्थः [1]प्रवर्तते" इति भरतमुनि- मतमनुसरताम् आनन्दाभिनवगुप्त -भोजराज-मम्मट-रुय्यक-हेमचन्द्रानन्दयोगि-जयदेव-विद्याधर-विद्यानाथ-वाग्भट-विश्वनाथ-भानुनाथ-जगन्नाथप्रभृतीनामाचार्याणां सिद्धान्ते काव्ये नाट्ये वा रसावेशवैशद्येनैव सौन्दर्यमनुभवन्ति हृदयसंवादभाजः सहृदयाः।

भामहोद्भट-रुद्रट-प्रभृतयः अलंकारेणैव सौन्दर्यं स्वीकुर्वन्ति। कुन्तकः वक्रोक्तिम् क्षेमेन्द्रश्च औचित्यम् सौन्दर्यस्य मुख्यं बीजं मन्वाते।

एवं हि काव्ये रसालंकारादि-सम्पादनाय अलंकारशास्त्रेण यद्विधि-निषेधात्मकं शासनं कृतम् तदेव तत्र सौन्दर्य-सम्पादनायापि समभिप्रेतम्। अतः अलंकारशास्त्रमेव सौन्दर्यशास्त्रस्य समुद्गम-स्थानमिति निश्चितम्।

---

१. नाट्यशास्त्रे षष्ठाध्याये।

अलंकारशास्त्रे शास्त्रान्तर-प्रक्रियोपयोगः

(१) अलंकारशास्त्रम्

शब्दार्थ-वृत्ति-गुण-दोष-रीति-रसालङ्कारादिस्वरूपनिरूपणमुखेन काव्यस्वरूप-प्रतिपादकं शास्त्रम् अलंकारशास्त्रम्। तत्र भामह-दण्डि-भट्टोद्भट-रुद्रट-प्रभृतिभिश्चिरन्तनालंकारकारैः ध्वन्यमानस्याप्यर्थस्य वाच्योपस्कारकत्वेन अलंकार-पक्ष-निक्षिप्ततया "अलंकारा एव काव्ये प्रधानम्" इति सिद्धान्तित्वात् 'प्राधान्येन व्यपदेशा भवन्तीति न्यायात्, दण्डिमते समस्तकाव्यशोभाकरधर्मस्य अलंकार[१]रूपत्वात्, वामनमते सौन्दर्यरूपालंकारेणैव काव्यस्य ग्राह्यत्वात्[२], भामहमते वक्रोक्तिरूपस्य काव्यजीवितभूतस्य अतिशयोक्त्यलंकारस्य प्रभावमहत्त्वातिशयाच्च[३] गुण-दोष-रसादीनां प्रतिपादकस्यापि एतच्छास्त्रस्य अलंकारशास्त्रत्वेनैव व्यपदेशोऽभूत्। इदमेव शास्त्रं काव्यशास्त्रं साहित्यशास्त्रञ्चाभिधीयते।

भरतमुनेर्नाट्यशास्त्रे--

"न तज् ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते[४]।।"

इति कथनेन नाट्ये यथा समस्तानि वस्तूनि अपेक्षितानि भवन्ति, तथैव तत्र बहुधा काव्य[५]-नाट्ययोरभेदेन व्यवहारात् काव्येऽपि एतानि अपेक्षितानि। अत एव भामहेन कथ्यते--

"न स शब्दो न तद्वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः[६]"।। इति।

अतः नाट्य-काव्ययोः सकलानां कलानां विविधानाञ्च विद्यानामुपयोगो जायते।

---

१. काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते। काव्यादर्शः २। १। २, ३६७।
२. काव्यंग्राह्यमलंकारात्। सौन्दर्यमलंकारः। काव्यालंकारसूत्रवृत्तिः १, १, १-२।
३. सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना।। भामहालंकार २, ८५।
अथ सा अतिशयोक्तिः काव्यजीवितत्वेन उक्ता। ध्वन्यालोकलोचने पृ० २६।
४. ना० शा० १, ११६।
५. नाट्यशास्त्रे १६, ८६-८८, ६१, ६२, ६६, ११४, १२१।
६. भामहालंकारे ५, ४। १८, ६ इत्यादिषु।

अत एव अलंकारशास्त्र-प्रणेतारः आरम्भादेव काव्य-निर्माणे असाधारणतया सकलाः कलाः निखिलाश्च विद्याः साधनीभूताः सन्तीति प्रतिपादयन्ति, कविभिश्च ताः सर्वा अवश्यमेव ज्ञातव्या इति कथयन्ति। तथा हि--

''शब्दाश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।
लोको युक्तिः कलाश्चेति मन्तव्याः काव्ययैरमी[१]।।''

इति प्रतिपादयति भामहाचार्यः। एवमेव कथयति आचार्यो दण्डी--

''नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्य-सम्पदः[२]।। इति।

''लोको विद्या प्रकीर्णं च काव्याङ्गनि''[३] इत्येवं - वामनाचार्यस्तथा परमाचार्यमम्मटः-

''शक्तिर्निपुणता-लोक-काव्यशास्त्राद्यवेक्षणात्।
काव्यज्ञ-शिक्षयाभ्यास इति हेतुस्तदुद्भवे।।[४] इति

प्रतिपादयति। एवमेव प्राचीनार्वाचीनैरलंकारशास्त्रप्रणेतृभिः प्रतिपाद्यते। एवं हि यथा काव्य-निर्माणे सकलशास्त्रकलादिज्ञानमपेक्षितम्, तथैव काव्यशास्त्रप्रणयने शास्त्रान्तरज्ञानमपेक्षितम्।' अत एव काव्यशास्त्रप्रणेतारः आवश्यकतानुसारं शास्त्रान्तरप्रक्रियाया उपयोगं कुर्वन्ति। स एवोपयोगः प्रकृते विवेचनीयः।

''सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि च।
यस्मान्नाट्ये समेतानि तस्मादेतन्मया कृतम्।।[५]

''जग्राह पाठ्यम् ऋग्वेदात् सामभ्यो गीतमेव च।
यजुर्वेदादभिनयान् रसानाथर्वणादपि''[६]।।

इत्यादि – कथनात् नाट्यशास्त्रे तु वेदादिसहितानां सकलशिल्पकलादि-शास्त्राणामुपयोगोऽभूदिति विदन्त्येव विपश्चितः।

---

१. भामहालङ्कारे - १, ९।
२. काव्यादर्शे- १, १०३।
३. काव्यालंकारसूत्रे- १, ३, १।
४. काव्यप्रकाशे- १, ३।
५. नाट्यशास्त्रे १, १७।
६. तत्रैव १, ११४।

१. अलंकारशास्त्रे निरुक्तशास्त्रीयप्रक्रिया

निरुक्ते "अथात उपमाः" इत्युपक्रम्य "यदतत् तत्सदृशमिति गार्ग्यः" इत्युपमा लक्षणस्य, "ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वाऽप्रख्यातमेनोपमिमीते[१] अथापि कनीयसा ज्यायासम्" इत्युपमा-प्रक्रियाया, उपमायाः 'कर्मोपमा, भूतोपमा, रूपोपमा, लुप्तोपमा' इति चतुर्णाम् भेदानाम् तथा "अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते[२]" इत्यादिना लुप्तोपमा एव आर्थी उपमा इति स्पष्टनिर्देशस्य च उपयोगः अलंकारशास्त्रे उपमाप्रकरणे दृश्यते। दण्डिनः 'काव्यादर्शे' निरुक्ते प्रतिपादिता उपमा-प्रभेदाः सर्वे तथैव परिगृहीताः। 'काव्यप्रकाशः' 'साधर्म्यमुपमाभेदे'[३] इति लक्षणे, उपमाप्रभेदनिरूपणे च निरुक्तमनुसरति।

एवमेव उपसर्ग-निपातानां वाचकत्व-द्योतकत्व-विषये यथा निरुक्ते प्रतिपाद्यते सिद्धान्तः "वाक्यपदीये"च समर्थ्यते तथैव अलंकारशास्त्रे तस्य अनुसरणं क्रियते। तथा हि--"तद्य एषु पदार्थः प्राहुरिमे तम्" अर्थात् एषु उपसर्गेषु वाचकता सम्बन्धेन विद्यमानः पदार्थः- स्वकीयः अनेकप्रकारकोऽर्थः – तम् इमे उपसर्गाः पृथगपि सन्तः प्रतिपादयन्ति। एतेन उपसर्गाणां वाचकत्वम् तथा "न निर्बद्धा उपसर्गा अर्थान् निराहुरिति शाकटायनः" अर्थात् नामाख्यातमध्यात् निष्कृष्य बद्धा उपसर्गा अर्थान् निश्चयेन न प्रतिपादयन्ति इति शाकटायनमते तेषां द्योतकत्वम्।

भर्तृहरिणा च –

"निपाता द्योतकाः केचित् पृथगर्थाभिधायिनः।
आगमा इव केऽपि स्युः सम्भूयार्थस्य वाचकाः।।

इत्यनेन उपसर्ग-निपातानां द्योतकत्वं वाचकत्वं च समर्थ्यते।

एवमेव भोजराजेन –

"वाचकत्वं निपातानां द्योतकत्वं च दर्शितम्"

इत्यनेन शृङ्गारप्रकाशस्य पञ्चमे प्रकाशे स्वीक्रियते। दण्डिनापि तथैव काव्यादर्शे द्वितीयपरिच्छेदे अङ्गीक्रियते।

---

१. निरुक्ते ३।३।१४।
२. तत्रैव ३।४।१८।
३. काव्य प्रकाशे दशमोल्लासे।

२. व्याकरणशास्त्रीय प्रक्रिया

अलंकारशास्त्रे उपमालंकार-निरूपणे उपमानोपमेयसामान्यधर्माणां यो हि प्रयोगो भवति तत्र पाणिनीयव्याकरणे शब्दतोऽर्थतश्च प्रसिद्धानाम् उपमानोपमित - सामान्यवचनानामेव उपयोगो दृश्यते। तथा हि--

"उपमानानि सामान्यवचनैः[१]", "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे[२]", "तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्"[३], "उपमानादाचारे[४]", "उपमाने कर्मणि[५]च" इत्यादि-सूत्रोक्तानामुपमादिशब्दानां यथावद् ग्रहणं क्रियते आलंकारिकैः।

"तेन तुल्यं क्रिया चेद् वतिः[६]" इति तुल्यार्थे विहिते वति प्रत्यये आर्थी उपमा तथा "तत्र तस्येव[७]" इति इवार्थे विहिते वतिप्रत्यये शाब्दी उपमा भवति इति व्याकरणशास्त्रस्यैव प्रक्रिया अलंकारशास्त्रे यथावद् दृश्यते।

"धातोः कर्मणः समानकर्तृकादिच्छायां वा" इतिपाणिनिसूत्रे महाभाष्ये "नैव तिङन्तेनोपमानमस्ति" इति सिद्धान्तस्य तदनुसारिणश्च –

"सिद्धमेव समानार्थमुपमानं विधीयते।
तिङन्तार्थस्तु साध्यत्वादुपमानं न जायते।।"

इत्यभियुक्तोक्तस्य स्पष्टमनुसरणम् दण्डिनः काव्यादर्शे--

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।

★ ★ ★

केषाञ्चिदुपमाभ्रान्तिरिव श्रुत्येह जायते।
नोपमानं तिङन्तेनेत्यतिक्रम्य भाषितम्[८]।।"

इत्यादौ दृश्यते। तत्र अन्योऽपि व्याकरण-सिद्धान्तः दण्डिनाऽनुसृतः, यो हि (व्याकरणसिद्धान्तस्तत्र) जिज्ञासूनां चेतः समाकर्षति।

---

१. पा० सू० २।१।५५।
२. तत्रैव २।१।५६।
३. तत्रैव २।३।७२।
४. तत्रैव ३। १। १०।
५. तत्रैव ३।४।४५।
६. तत्रैव ५।१।११५।
७. तत्रैव ५। १। ११६।
८. काव्यादर्शे २, २२६-२७।

अलंकारशास्त्रे मूर्द्धन्यायमानस्य ध्वनिसम्प्रदायस्य प्रतिष्ठापकेन आनन्दवर्धनेन मुक्तकण्ठमुद्घोषितम्--

"प्रथमे हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात् सर्वविद्यानाम्[१]" इति। एवमेव ध्वनि-प्रस्थापन-परमाचार्येण मम्मटेन–"बुधैर्वैयाकरणैः प्रधानभूत-स्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भावित-वाच्य-व्यङ्ग्य-व्यञ्जन-क्षमस्य शब्दार्थयुगलस्य[२] इति डिण्डिमनादः कृतः।

व्याकरणशास्त्रे यथा स्फोटः स्फोटाभिव्यञ्जकः वर्णश्च ध्वनिरित्युच्यते। तथा हि भर्तृहरिः –

"यः संयोग-वियोगाभ्यां करणैरुपजन्यते।
स स्फोटः शब्दजः शब्दो ध्वनिरित्युच्यते बुधैः[३]"।।

तथैव तन्मतानुसारिभिः काव्यतत्त्वार्थदर्शिभिः वाच्य-वाचक-संमिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्व-साम्याद् ध्वनिरित्युच्यते। ध्वनतीति ध्वनिरिति व्युत्पत्त्या वाच्योऽर्थः वाचकश्च शब्दः ध्वनिः। ध्वन्यते इति ध्वनिरिति व्युत्पत्या संमिश्र्यते विभावानुभावसंवलनच्छाययेति संमिश्रः व्यङ्ग्यार्थः ध्वनिः। ध्वननं ध्वनिरिति व्युत्पत्त्या-शब्दनं शब्दः तदात्मा व्यञ्जनरूपो व्यापारो ध्वनिः। ध्वन्यतेऽस्मिन् इति व्युत्पत्त्या काव्यमपि ध्वनिरित्युच्यते[४] एवं हि काव्यशास्त्रे ध्वनिशब्दव्यवहारस्य व्याकरणशास्त्रीयध्वनि-शब्द एव मूलम्।

"चतुष्टयी शब्दानां प्रवृत्तिः-जातिशब्दा गुणशब्दाः क्रियाशब्दा यदृच्छाशब्दाश्चतुर्थाः" इति पातञ्जलमहाभाष्यसरण्याः--

"संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा[५]"।।

कारिकाव्याख्याने मम्मटभट्टेन अनुसरणं कृतम्। तत्रैव- "नहि गौः स्वरूपेण गौः नाप्य गौः गोत्वाभिसम्बन्धात्तुगौः" इति वाक्यपदीयसिद्धान्तः अनुसृतः।

---

१. ध्वन्यालोके।
२. काव्यप्रकाशे १, ४।
३. वाक्यपदीये १।
४. ध्वन्यालोक-लोचने १।१६ कारिकायाम्।
५. काव्यप्रकाशे।

भामहेनापि--

"द्रव्य-क्रिया-जाति-गुण-भेदात् ते च चतुर्विधाः।
यदृच्छाशब्दमप्यन्ये डित्थादि प्रतिजानते।।[१]

इत्यादिना तथैवानुसृतम्।

रुद्रटेन--

"अर्थः पुनरभिधावान् प्रवर्तते यस्य वाचकः शब्दः।
तस्य भवन्ति द्रव्यं गुण-क्रिया जातिरिति भेदाः[२]।।"

इत्यनेन व्याकरण-सिद्धान्त एवानुसृतः।

अनेकार्थकशब्दानां संयोगादिभिः वाचकता-नियन्त्रणे--

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गशब्दस्यान्यस्य सन्निधिः।।
सामर्थ्यमौचितीदेशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।।"

इति हरिणोक्ता वाक्यपदीय-प्रक्रिया मम्मटादिभिः काव्यशास्त्रे तथैवाङ्गीकृता।

"क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना[३]।"

इति काव्यप्रकाशे विभावनालंकारे क्रियाशब्दस्य हेतुरूपोऽर्थः "क्रियते अनया इति क्रिया-कारणम्" इति व्याकरणमूलक एव।

भोजराजस्य शृङ्गारप्रकाशस्य आरम्भिको भागः व्याकरणशास्त्रमेवानुवदति। तथा हि--

प्रकृति-प्रत्ययावेवमुपस्कारश्च दर्शितः।
क्रमादुपपदस्यापि स्वरूपमुपवर्णितम्।।
अव्ययानि निपाताश्च गतयश्च निरूपिताः।
कर्म प्रवचनीयाश्च सोपसर्गाः प्रकाशिताः।।

---

१. भामहालंकारे ६। २१।
२. भामहालंकारे ६, २१।
३. काव्यप्रकाशे दशमोल्लासे।

न केवलेह प्रकृतिः प्रयुज्यते न केवलाः सुप्तिङ्ङणूक्यजादयः।
भवत्युपस्कार इहापृथगृद्वयोर्द्वयार्थमेवोपपदं प्रयुज्यते।।[1]

एवमेव--

प्रकृति-प्रत्ययौ त्रेधा त्रिधोपस्कारशक्तयः।
त्रिधैवोपपद-प्रातिपदिकानां विभक्तयः।।
त्रिधोपसर्जनं त्रेधा समास इति कीर्तितः।
प्रातिपदिक शब्दोऽयमथान्वारव्येयमुच्यते।।[2]

चतुर्थप्रकाशेऽपि क्रिया-कारक--काल-पुरुषरूपाः चत्वारः पदार्थाः व्याकरण विषयका निरूपिताः सन्ति।[3]

पञ्चमप्रकाशे तु निपातानां द्योतकत्वं वाचकत्वं वेति विवेचनं व्याकरणशास्त्रमेव अनुसरति।[4]

तत्र विभक्त्यर्थादिचतुष्टयप्रकाशनामकः षष्ठः प्रकाशस्तु नाम्नैव व्याकरण विषयतां बोधयति।[5]

''तत्राभिधा-विवक्षा-तात्पर्य-प्रविभाग-व्यपेक्षा - सामर्थ्यान्वयैकार्थीभाव-दोषहान - गुणोपादानालंकारयोग - रसावियोगरूपाः शब्दार्थयोः द्वादशसम्बन्धाः साहित्यमुच्यते'' इति सप्तमप्रकाशोपक्रमवाक्येन सिद्ध्यति यदत्र प्रकाशे व्याकरण-सहित-विभिन्न-शास्त्राणां सिद्धान्ताः परिगृहीताः सन्ति।[6]

एवमेव वाक्यपदीये प्रातिपदिकस्य अखण्डवाक्य-वाक्यार्थरूप-शब्दब्रह्म-विषयक-व्याकरणसिद्धान्तस्य तथैवानुसरणं क्रियते भोजराजेन अष्टमप्रकाशे।[7]।

---

१. शृङ्गारप्रकाशे प्रथम प्रकृत्यादिप्रकाशे।

२. तत्रैव द्वितीये प्रातिपदिकादिप्रकाशे।

३. तेऽमी क्रिया च कालश्च कारकं पुरुषस्तथा।
उक्ताः पदार्थाश्चत्वारः स्वैस्वैर्भेदैः समन्विताः।। तत्रैव चतुर्थप्रकाशे।

४. वाचकत्वं निपातानां द्योतकत्वं च निश्चितम्।
कर्मप्रवचनीयानामुक्ता सम्बन्ध-संगतिः।। तत्रैव पञ्चम-प्रकाशे।

५. अथो विभक्त्यर्थविधिस्त्रिधोच्यते त्रिधैव वृत्त्यर्थपदार्थनिर्णयः।
क्रियादि-वाक्यार्थनिवर्तनात्ततः त्रिधैव वाक्यार्थगतिः प्रपञ्च्यते।।
तत्रैव षष्ठ प्रकाशे।

६. तत्रैव सप्तम प्रकाशे।

७. अखण्डः सैष वाक्यार्थः शब्दब्रह्मेति गीयते। शब्द-ब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।।
वाक्य प० ब्रह्म का० १६।
यस्तु तद्रूपरामायणादिप्रबन्धार्थानामवधारणेन उपहितसंस्कारस्य 'रामवद्वर्तितव्यं, न रावणवत्' इत्यादि विधिनिषेधप्रतिभाविशेष उपजायते, समस्त-विश्वव्यापी चतुर्वर्गैकहेतुः परो महावाक्यार्थः अर्थमूर्त्या विपरिणमत् अनादि निधनमखण्डं शब्द ब्रह्मेत्युच्यते।। शृ० प्र० अष्टमप्रकाशे।

"काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते, भक्त्या तु शब्दार्थमात्रवचनः[1]"

इत्येवं कथयता काव्यालंकार-सूत्रवृत्तिकृता वामनाचार्येण –

"पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन[2]।।"

इति वाक्यपदीय प्रतिपादित-व्याकरण-सिद्धान्त एवानुसृतः। एवमेव--

"अलंकृतिरलंकार्यमपोद्धृत्य विवेच्यते।
तदुपायतया तत्त्वं सालंकारस्य काव्यता[3]।।

इति प्रतिपादयता आचार्यकुन्तकेन व्याकरणशास्त्रस्य वर्णपदन्यायः वाक्यपदन्यायश्च अङ्गीकृते। अयमाशयः-- व्याकरणशास्त्रे यथा अखण्ड-वाक्य-सिद्धान्तः स्वीक्रियते तथैव सालंकारस्य अलंकार-सहितस्य सकलनिरस्तावयवस्य सतः काव्यत्वम्- कविकर्मत्वम्, न तु पारमार्थिकदृष्ट्या काव्यस्य अलंकारयोग इति। यथैव च सत्यसमीहनार्थम् असत्ये वर्त्मनि स्थित्वा बालानामुपलालनाय व्याकरणेऽपि प्रकृति-प्रत्ययादिकल्पना क्रियते तथैव काव्यशास्त्रेऽपि अखण्डभूतोऽपि अपोद्धार-बुद्धिविहितो वर्णपदन्यायेन वाक्य-पदन्यायेन च अलंकारादि-विभागः क्रियते एव। वस्तुतस्तु अखण्डवाक्यमिव अखण्डमेव सालंकारम् शब्दार्थ-युगलं काव्यम्।

पातञ्जलमहाभाष्ये[4] यथा "चतुर्भिः प्रकारैः अतस्मिन् 'सः' इत्येतद्भवति-तात्स्थ्यात्, ताद्धर्म्यात् तत्सामीप्यात्, तत्साहचर्यादिति प्रतिपादितम्' तथैव काव्यप्रकाशे लक्षणाप्रसङ्गे- 'क्वचित् तादर्थ्यादुपचारः, क्वचित् तात्कर्म्यादित्यादिना मम्मटाचार्येण परिगृहीतम्।

एवञ्च अलंकारशास्त्रे व्याकरणशास्त्रस्य प्रक्रियाया बहुधोपयोगः उपलभ्यते।

किं बहुना एतद्विषये भामहाचार्येण यन्निगदितम् तत् सर्वथा समीचीनम्--

सूत्राम्भसं पदावर्तं पारायण-रसातलम्।
नापारयित्वा दुर्गाधममुं व्याकरणार्णवम्।।
तस्य चाधिगमे यत्नः कार्यः काव्यं विधित्सता।।[5]

---

१. काव्यालंकार सूत्रवृत्ती १, १।
२. वाक्यप० १, ७३।
३. वक्रोक्तिजीविते १, ६।
४. पुंयोगादाख्यायाम् ४।१।४८। इतिसूत्रभाष्ये।
५. भामहालंकारे ६, १-४।

सालातुरीयमतमेतदनुक्रमेण को वक्ष्यतीति विरतोऽहमतो विचारात्।

शब्दार्णवस्य यदि कश्चिदुपैति पारं भीमाम्भसश्च जलधेरिति विस्मयोऽसौ।।[1]

"श्रद्धेयं जगति मतं हि पाणिनीयम्" इति मत्वैव वामनाचार्य-प्रभृतिभिः स्वीयग्रन्थेषु प्रायोगाधिकरणं न्यरूपि। काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकमित्यत्र नास्ति कस्यापि वैमत्यम्।

३. वात्स्यायन-कामशास्त्रीय-प्रक्रिया

अलंकारशास्त्रे नाट्यशास्त्रे च वात्स्यायन--कामशास्त्रीय-विषयाणां समुपयोगः आचार्यैर्बहुधा कृतः। भरतमुनिना "वैशिकशास्त्रकारैश्च दशावस्थोऽभिहितः शृङ्गाररसः। ताश्च सामान्याभिनये वक्ष्यामः[2]' इति स्पष्टमुक्तम्। तत्रैव च अभिनवभारत्याम् अभिनवगुप्तपादैः "वामो हि कामः[3] इति वात्स्यायनादिभिरभिहितम्। मुनिनापि वक्ष्यते--'यद्वामाभिनिवेशित्वम्'[4] इति। कामशास्त्रानुसारिण्य एव स्मरस्य दशावस्थाः काव्यशास्त्रे प्रतिपाद्यन्ते।

तत्रैव आचार्यचरणैः--"अत्र च विज्ञानवादो, द्विधाभिधानं स्फोटतत्त्वं, सत्कार्यवादः, एकत्वदर्शनम् इत्यादि च द्रष्टव्यम्[5]" इत्यादिना विविधशास्त्रप्रक्रियोपयोगोऽत्र विधीयते इति निर्दिश्यते।

४. न्यायशास्त्रीय प्रक्रिया

न्यायदर्शने- "सहचरण-स्थान-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्यो-ब्राह्मण-बाल-कट-राज-सक्तु-चन्दन-गङ्गा-शकटान्न-पुरुषेष्वतद्भावेऽपि तदुपचारः[6]" इति सूत्रेण लक्षणा-विषये या प्रक्रिया निर्दिश्यते अलंकारशास्त्रे सा प्रक्रिया तथैव उपयुज्यते। मम्मटेन न्यायदर्शनोक्तानि उपचारनिमित्तानि स्वकीये काव्यप्रकाशे लक्षणाप्रकरणे तथैव परिगृहीतानि।

---

१. तत्रैव ६, ६२।
२. नाट्यशास्त्रे षष्ठाध्याये पृ० ७३।
३. कामशास्त्रे २।७।१।
४. नाट्यशास्त्रे तत्रैव।
५. अभिनव भारत्याम् पृ० २६४।
६. न्यायसूत्रम् २।२।६३।

गौतमीये न्यायशास्त्रे यथैव अनृत-व्याघातपुनरुक्तादयो दोषा वर्णिताः सन्ति तथैव ते अलंकारशास्त्रेऽपि परिगृहीताः। तत्र गौतमस्य व्याघातः भामहस्य व्यर्थ-दोषः, दण्डिनश्च पूर्वापर-विरुद्धः।

गौतमस्य पुनरुक्त-दोषः भरत-भामहदण्डिनाम् एकार्थदोषः।

गौतमसूत्रे वात्स्यायनभाष्ये च व्याघातपुनरुक्तयोः यथा अनित्यदोषत्वम् प्रतिपादितं तथैव काव्यशास्त्रेऽपि तयोरनित्य-दोषत्वम्। इदमेव च वैशेषिक-गुणस्य गुणीभूत-दोषस्य च बीजम्।

न्यायशास्त्रे निग्रहस्थाने प्रतिपादितानां कतिपयानां दोषाणाम् अलंकारशास्त्रेऽपि तथैवानुसरणम्। तथाहि--

अर्थान्तरमिति षष्ठं निग्रहस्थानम्।[1]

यथा तत्र प्रकृतादर्थादप्रतिसंबद्धार्थमर्थान्तरम् भवति तथैव भरतमुनेश्चापि अर्थान्तरममिप्रेतम्। न्यायदर्शनस्य निग्रहस्थानरूपं निरर्थकम्[2] काव्यशास्त्रेऽपि निरर्थकरूपेणैव परिगृहीतम्। तत्रत्यम् अविज्ञातार्थम् अलंकारशास्त्रे अप्रतीतशब्दत्वम्। भामहस्य इदमेव गूढशब्दाभिधानम्[3] वामनस्य च अप्रतीतम्।

न्यायदर्शने अपार्थकं नवमं निग्रहस्थानम्[4]। पौर्वापर्ययोगात् अप्रतिसम्बद्धार्थमपार्थकम्। निरर्थके दोषे पदस्य निरर्थकत्वं भवति। अपार्थके च वाक्यस्यैव। यथाह–वात्स्यायनः-

'तत् समुदायार्थस्य अपायात् अपार्थकम्' यथा दश दाडिमानि षडपूपाः इत्यादि। अयमेव हि भामह– दण्डिनोरपि अपार्थदोषः। तथा हि –

समुदायार्थशून्यं यत् तदपार्थकमिष्यते।
दाडिमानि दशापूपाः षडित्यादि यथोदितम्[5]।।

समुदायार्थशून्यं यत् तदपार्थमितीष्यते।
उन्मत्त-मत्त-बालानामुक्तेरन्यत्र दुष्यति।।[6]

---

१. न्यायदर्शने ५। २। ७।
२. तत्रैव ५।२।८।
३. भामहालङ्कारे १, ४५।
४. न्यायदर्शने ५। २। १०।
५. भामहा० ४।८।
६. काव्यादर्शे ३।१२८।

..मत्त-मत्त-बालानामुक्तेरदोषताबीजन्तु "वाक्यादेरामन्त्रितस्यासूयासंमति-कोपकुत्सनभर्त्सनेषु[1]" इति पाणिनिसूत्रेण द्वित्वविधानम्। अत एव विष्णुधर्मोत्तरे –

विस्मयेनाभ्यसूयायां भयशोकत्वरासु च।
हर्षेण वीप्सा कर्तव्या पुनरुक्तं न तद्विदुः।।

तथा रुद्रटालंकारे--

वक्ता हर्षभयादिभिराक्षिप्तमनास्तथा स्तुवन् निन्दन्।
यत्पदमसकृद्-ब्रूयात् तत्पुनरुक्तं न दोषाय।।[2]

इत्यादि प्रतिपाद्यते।

न्यायशास्त्रे यत् शब्दार्थविषयकं पुनरुक्तम्[3] तदलंकारशास्त्रेऽपि सर्वत्र तद्दोष-विचारे परिदृश्यते। इदमेव मम्मटाचार्यस्य अनवीकृतत्वम्।

न्यायदर्शनस्य न्यूनताधिकतादोषौ अलंकारशास्त्रे न्यूनपदत्वम् अधिकपदत्वं दोषः।

रुद्रटस्य काव्यालंकारे उपमादोषे, भामहस्य काव्यालंकारे उपमादोष-विचारे च सप्तसु दोषेषु इमौ न्यूनताधिकतादोषौ परिगृहीतौ। तथा हि –

हीनतासम्भवो लिङ्गवचोभेदो विपर्ययः।
उपमानाधिकत्वं च तेनासदृशतापि च।।
त एव उपमादोषाः सप्त मेधाविनोदिताः[4]।।

एवमेव दण्डिनापि काव्यादर्शे--

"देश-काल-कला-लोक-न्यायागम-विरोधिता।"

तथा

"प्रतिज्ञा-हेतु-दृष्टान्त-हानिर्दोषो न वेत्यसौ।[5]
विचारः कर्कशः प्रायस्तेनालीढेन किं फलम्[6]।।"

---

१. तृतीयखण्डे १७।११।
२. रुद्रटालंकारे ६।२६।
३. न्यायदर्शने २।१।५७।
४. भामहालंकारे २।३६।
५. काव्यादर्शे ३।१२५।
६. तत्रैव ३।१२८।

इत्यादिदोष-विचारे न्यायदर्शनप्रक्रियाऽनुसृता। एतत्प्रसङ्गे प्राचीनालङ्कारिकैरप्युक्तम्--

"हीनाधिकत्वं वचन-लिङ्ग-भेदो विपर्ययः।
असादृश्यासम्भवौ च दोषाः सप्तोपमागताः[1]।।"

एवं हि काव्यशास्त्रीय-दोषविचारे न्यायदर्शनसिद्धान्तस्य अनुसरणं स्पष्टमेव दृश्यते।

काव्यप्रकाशे शब्दस्य संकेतितार्थविवेचने 'तद्वान्' अर्थात् जातिमान् संकेतितोऽर्थः इति कथनं न्यायशास्त्रप्रक्रियामनुसरति तथा 'अपोहो-वा'[2] शब्दार्थः[3]' इति बौद्धदर्शन प्रक्रियां निगदति।

"द्रव्यात्मा चापि कालो यः प्रसङ्गात् सोऽपि कीर्तितः।[4]" इति भोजराजीये शृङ्गारप्रकाशे कालस्य द्रव्यात्मत्व-प्रतिपादनम् कालं द्रव्यं मन्वानस्य वैशेषिक-दर्शनस्य पन्थानमनुसरति।

रसादिध्वनेर्व्यङ्ग्यत्वं खण्डयता महिमभट्टेन 'व्यक्ति-विवेके' न्यायवैशेषिकयोरेव प्रक्रिया आत्मसात्कृता।

अलंकारसर्वस्व-विमर्शिन्यां टीकायाम् जयरथेन याः--

"तात्पर्यशक्तिरभिधा लक्षणानुमिती द्विधा।
अर्थापत्तिः क्वचित् तन्त्रं समासोक्त्याद्यलंकृतिः।।
रसस्य कार्यता भोगो व्यापारान्तर-बाधनम्।
द्वादशेत्थं ध्वनेरस्य स्थिता विप्रतिपत्तयः।।"[5]

संगृहीताः तासु विभिन्नाः ध्वनेः विप्रतिपत्तयः शास्त्रान्तरेषु प्रतिपादिताः सन्ति।

५. मीमांसादर्शन-प्रक्रिया

आचार्य मम्मटेन काव्यप्रकाश-द्वितीयोल्लासे "तात्पर्यार्थोऽपि केषुचित्" इत्यत्र अभिहितान्वयवादिनां भट्टमीमांसकानाम् तथा "वाच्य एव वाक्यार्थः" इत्यनेन

---

१. काव्यदर्शे टीकायाम्।
२. अतद्व्यावृत्तिरपोहः इतिक्षण-भङ्गवादिनः।
३. काव्यप्रकाशे दशमसूत्रवृत्तौ।
४. शृङ्गारप्रकाशे चतुर्थप्रकाशे।
५. विमर्शिनीटीका पृ० ६।

अन्विताभिधानवादिनां गुरुमतानुयायिनां मीमांसकानां सरणिरनुसृता। तत्रैव संकेतितार्थविवेचने 'जातिरेव वा' संकेतितार्थः इत्यत्र मीमांसक-सिद्धान्तो निरूपितः।

अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।
लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता।।[१]

इति कुमारिलभट्टमतानुसारेणैव 'गौर्वाहीकः' इत्यादौ गौणलक्षणाप्रसङ्गे "साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यते इत्यपरे" इति मम्मटाचार्येण प्रतिपादितम्।

अग्निपुराणस्य काव्यशास्त्रीय[२]भागे, शृङ्गारप्रकाशे च[३] इयं मीमांसाशास्त्रीयप्रक्रिया परिगृहीता वर्तते।

"ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्[४]"

इति कारिकाया वृत्तौ "प्रत्यक्षादेर्नीलादिर्विषयः फलं तु प्रकटता संवित्तिर्वा" इति मम्मटोक्तौ-- 'ज्ञातो घटः' इति प्रत्ययात् तज्ज्ञानेन तस्मिन् घटे ज्ञातातापरनाम्नी प्रकटता जायते इति अध्वरमीमांसकमतम् तथा घटज्ञाने सति 'घटमहं जानामि' इति प्रत्ययरूपा अनुव्यवसायापरपर्याया संवित्तिर्घटज्ञानात् जायते इति तार्किकमतमेव अनुरणति।

अलंकारशास्त्रे अर्थापत्ति-परिसंख्यालंकारयोः बीजन्तु मीमांसादर्शनस्य अर्थापत्ति-परिसंख्या-स्वरूपमेव। एवमेव अनुमानस्य हेतोश्चालंकारत्वे न्यायदर्शनं बीजम्।

"विभावानुभाव-व्यभिचारि-संयोगाद्रसनिष्पत्तिः"[५] इति रससूत्रस्य प्रसिद्धाः भट्टलोल्लट-शङ्कुकभट्टनायकाभिनवगुप्तपादा व्याख्यातारः क्रमशः मीमांसा-न्याय-सांख्य-वेदान्तदर्शनानि समनुसरन्ति इति विजानते विपश्चितः।

६. वेदान्त-शास्त्रीय-प्रक्रिया--

काव्यशास्त्रे रस-स्वरूप-निरूपणन्तु मुख्यतः वेदान्तदर्शनप्रक्रिययैव क्रियते। तथा हि--

अक्षरं परमं ब्रह्म सनातनमजं विभुम्।
वेदान्तेषु वदन्त्येकं चैतन्यं ज्योतिरीश्वरम्।।

---

१ कुमारिल भट्टवार्तिकम्। काव्यप्रकाशे १६ सूत्रे उद्धृतम्।

२. अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते। अभिधेयेन सम्बन्धात् सामीप्यात् समवायतः।। वैपरीत्यात् क्रिया योगाल्लक्षणा पञ्चधामता।। ३४५।११-१२।

३. शब्दशक्तिप्रकरणे।

४. काव्यप्रकाशे सू० २६।

५. नाट्यशास्त्रे षष्ठाध्याये।

आनन्दः सहजस्तस्य व्यज्यते स कदाचन।

व्यक्तिः सा तस्य चैतन्य-चमत्कार-रसाह्वया।।

आद्यस्तस्य विकारो यः सोऽहंकार इति स्मृतः।

ततोऽभिमानस्तत्रेदं समाप्तं भुवनत्रयम्।।

अभिमाना द्रुतिः सा च परिपोषमुपेयुषी।

व्यभिचार्यादिसामान्यात् शृङ्गार इति गीयते।।[१]

इति अग्निपुराणीय-रस-निरूपणे, भोजराजीये सरस्वती-कण्ठाभरणे रस-स्वरूपवर्णने, अभिनवगुप्तस्य रससूत्र- व्याख्याने[२], विश्वनाथस्य

''सत्त्वोद्रेकादखण्ड-स्वप्रकाशानन्द-चिन्मयः।

वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वाद-सहोदरः।।[३]''

इत्यादि रसस्वरूपवर्णने तथा ''ज्ञानस्य स्वप्रकाशत्वमनङ्गीकुर्वतामुपरि वेदान्तिभिरेव पातनीयो दण्डः।...... परमार्थतस्तु अखण्ड एवायं वेदान्त-प्रसिद्ध-ब्रह्मतत्त्ववद् वेदितव्यः[४]'' इत्यादि प्रतिपादने च वेदान्तदर्शन-सिद्धान्तस्यैव अनुसरणं क्रियते। एवमेव पण्डितराजजगन्नाथेन ''वस्तुतस्तु 'रसो वै सः' इति श्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः। ...... इयं च रसचर्वणा परब्रह्मास्वादात् समाधेर्विलक्षणा विभावादिविषयसंवलित-चिदानन्दालम्बनत्वात् भाव्या च'' इत्यादि यत् 'रसगङ्गाधरे' रस-प्रकरणे प्रतिपादितम् तत् वेदान्तदर्शनमेवानुसरति।

एवमेव अन्यान्यपि बहूनि शास्त्रान्तरप्रक्रियानुसारीणि प्रकरणानि काव्यशास्त्रस्य विशालक्षेत्रे विलसन्ति। प्रबन्धेऽस्मिन् संकेतमात्रं कृतम्। गवेषक-विचक्षणैस्तदन्वेष्टव्यमिति शम्।

---

१. अग्निपुराणे ३३६।१-४।

२. काव्यप्रकाशे, ४, २८ कारिकाव्याख्याने।

३. साहित्यदर्पणे ३, २।

४. तत्रैव वृत्तौ।

आचार्याभिनवगुप्तपादानां शान्तरस - विषयक - विचारः

राजशेखरस्य "काव्यमीमांसा"नुसारेण[1] भरतमुनिना नाट्यविषये नन्दिकेश्वरेण च रस-विषये स्व-स्वग्रन्थो व्यरचीति विज्ञायते। परन्तु नन्दिकेश्वरस्य रस-विषय-रचनाया अद्याप्यनुपलब्धेः राजशेखरस्य साक्ष्ये विद्यमानेऽपि अलंकारशास्त्रस्य पर्यालोचका रससम्प्रदायस्याप्याद्यप्रवर्तकतया भरतमुनिमेव मन्यन्ते। भरतमुनेर्नाट्यशास्त्रात् पूर्वं कदाचिद् वृद्धभरतस्य बृहत्तरनाट्यशास्त्रं प्रत्यक्षगोचरमासीद् यच्च शारदातनयस्य "भावप्रकाशने"[2] "यथोक्तं वृद्धभरतेने"त्यादि वाक्येन तथा "नाट्यशास्त्रे" उल्लिखितैरानुवंश्यश्लोकैर्विज्ञायते। परमधुनोपलब्धग्रन्थेषु भरतमुने"र्नाट्यशास्त्र"मेव निर्भ्रान्तरूपेण नाट्यशास्त्रस्य अलंकारशास्त्रस्य वा प्रथमं रचनमिति निश्चीयते।

"नाट्यशास्त्रस्य" अभिनवगुप्तपादाचार्यस्याभिनवभारत्याख्यव्याख्यासमन्विते गायकवाडसंस्करणे तथा दिल्लीविश्वविद्यालयात् प्रकाशिते अभिनवभारती सञ्जीवन-भाष्य-समन्विते नवीनसंस्करणे च षष्ठाध्याये शान्तरस-प्रकरणं साङ्गोपाङ्गमुपलभ्यते। वाराणसीतः प्रकाशिते चौखम्बासंस्कृतग्रन्थमालायाः संस्करणे प्रकरणमिदं न प्राप्यते। अतो भरतमुनिना स्व"नाट्यशास्त्रे" शान्तरसस्यापि निरूपणं कृतमिति विषयः समालोचकविद्वत्समाजेषु प्राचीनादेव कालाद् विवादास्पदतां भजते।

अत्र "नाट्यशास्त्रे" शान्तरस-निरूपणमनङ्गीकुर्वतामालोचकानामियं वाचोयुक्तिः— यदि नाम भरतमुने"र्नाट्यशास्त्रे" शान्तरसोऽपि प्रतिपादितोऽभविष्यत् तर्हि —

"शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।।
एते ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना[3]।।"

इत्यादिस्थलेषु अष्टानामेव रसानां केवलमुल्लेखो नाभविष्यत्। नैव च मुनिरष्टानामेव रसानां वर्ण-देवताप्रतिपादनमकरिष्यत्। नापि च —

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः[4]।।"

---

१. रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः। काव्यमीमांसा-प्रथमाध्याये।
२. भावप्रकाशने ३६-तमे पृष्ठे।
३. नाट्यशास्त्रे ६, १५-१६, ६, ८३।
४. तत्रैव ६, १७।,

इत्यत्राष्टानामेव स्थायिभावानां नामान्युदलिखिष्यत्। न केवलमेतावदेव महाकविः कालिदासोऽपि स्वीये "विक्रमोर्वशीये" –

"मुनिना भरतेन यः प्रयोगो भवतीष्वष्टरसाश्रयो नियुक्तः।"

इत्यत्र भरतमुनिप्रतिपादितानष्टावेव रसान् प्रयोज्यतया नाकथयिष्यत् नापि च दण्डी स्वकीये "काव्यादर्शे" –

"इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम्[1]"

इत्येवं प्रतिपादयन् अष्टावेव रसानुदाहरिष्यत्।

"नाट्यशास्त्रे" भरतमुनिना शान्तस्यापि निरूपणं कृतमिति द्वितीय पक्षावलम्बिनामाचार्याभिनवगुप्तपादादीनां सुदृढं मतम्। अभिनवभारत्यामभिनवगुप्तपादेन च शान्तरसविषयं सविस्तरं विवेच्य उपसंहरता स्पष्टमुदलेखि--"तस्मादस्ति शान्तो रसः। तथा च चिरन्तनपुस्तकेषु 'स्थायिभावान् रसत्वमुपनेष्यामः' इत्यनन्तरं 'शान्तो नाम शम-स्थायिभावात्मकः' इत्यादि शान्तलक्षणं पठ्यते[2]।" "रसाः ते च नव। शान्तापलापिनस्तु अष्टाविति तत्र पठन्ति[3]।" अतोऽभिनवगुप्तपादानां मतेन--

"शृङ्गार........ बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः",

"एवं नवरसाः प्रोक्ताः" "एवमेते रसा ज्ञेया नवलक्षणलक्षिताः",

"रतिर्हासश्च.......... जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः",

इत्येव तत्र तत्र मूलपाठ आसीत्। वर्ण-देवतानिरूपणप्रकरणे च "स्वच्छपीतौ शमाद्भुतौ" "बुद्धः शान्तेऽब्जजोऽद्भुते" इति शान्तवादिनां पाठः[4]।

अभिनवभारतीमण्डिते "नाट्यशास्त्रे" शान्तरसस्वरूपन्त्वेवमुपलभ्यते--

"अथ शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः। स तु तत्त्वज्ञान-वैराग्याशयशुद्ध्यादिभिर्विभावैः समुत्पद्यते। तस्य यम-नियमाध्यात्मध्यान-धारणोपासन-सर्वभूतदयालिङ्गग्रहणादिभिःनुभावैरभिनयः प्रयोक्तव्यः। व्यभिचारिणश्चास्य निर्वेद-स्मृति-धृति-शौच-स्तम्भ-रोमाञ्चादयः। अत्रार्याः श्लोकाश्च भवन्ति –

---

१. काव्यादर्शे २, २९२।

२. अभिनवभारत्याम् ६३५-तमे पृष्ठे।

३. तत्रैव ४१६-तमे पृष्ठे।

४. तत्रैव ४३३, ५३०, ५३१, ६४१ इति पृष्ठेषु।

मोक्षाध्यात्मसमुत्थस्तत्त्वज्ञानार्थहेतुसंयुक्तः।
नैःश्रेयसोपदिष्टः शान्तरसो नाम संभवति।।
बुद्धीन्द्रिय-कर्मेन्द्रिय-संरोधाध्यात्म-संस्थितोपेतः।
सर्वप्राणिसुखहितः शान्तरसो नाम विज्ञेयः।।
यत्र न दुःखं न सुखं न द्वेषो नापि मत्सरः।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः।।
भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते।।
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।
पुनर्निमित्तापाये च शान्त एवोपलीयते।।
एवं नवरसा दृष्टा नाट्यज्ञैर्लक्षणान्विता[१]।।'' इति।

''नाट्यशास्त्रे'' शान्तरसमनङ्गीकुर्वतां मतेन यद्येतस्यांशस्य प्रक्षिप्तत्वं तर्हि प्रथमाध्याये मुनिना प्रतिपादिते--

''क्वचिद्धर्मः क्वचित्क्रीडा क्वचिदर्थः क्वचिच्छमः[२]''

इति पुरुषार्थचतुष्टयरूपे नाट्यप्रयोजने परमप्रयोजनस्य मोक्षस्यैव प्रयोजकीभूतस्य शान्तरसस्यप्रतिपादनात् तदंशे विकलतया पुरुषार्थचतुष्टयप्रतिपादनमसंगतं स्यात्।

शान्तरस-विरोधिनां मतं पूर्वपक्षतया प्रतिपादयताऽभिनवगुप्तपादेन तत्र प्रकरणे प्रोक्तम्--

''एतदपरे न सहन्ते। (१) शम-शान्तयोः पर्यायत्वात्। (२) एकोनपञ्चाशद्भावा इति संख्यात्यागाच्च। (३) किञ्च विभावा ऋतुमाल्यादयस्ततूसमनन्तरभाविनि शृङ्गारादावनुसन्धीयते इति युक्तम्। तपोऽध्ययनादयस्तु न शान्तस्य शमस्य हेतवः। तत्त्वज्ञानस्याप्यनन्तरहेतव इति चेत्, पूर्वोदिततत्त्वज्ञानेऽपि तर्हि प्रयोज्यतेति तपोऽध्ययनादीनां शमविभावता परित्यक्ता स्यात्। कामाद्यभावोऽपि नानुभावः, शान्तविपक्षादव्यावृत्तेः, अगमकत्वात्। (४) प्रयोगासमवायित्वाच्च। न हि चेष्टाव्युपरमः

---

१. तत्रैव षष्ठाध्याये ६०६-६१० इति पृष्ठे।
२. तत्रैव प्रथमाध्याये १०८।

प्रयोगयोग्यः। सुप्तमोहादयोऽपि निःश्वासोच्छ्वास-पतन-भूशयनादिभिश्चेष्टाभिरेवानुभाव्यन्ते। (५) धृतिप्रभृतिरपि प्राप्तविषयोपभोगः कथं शान्ते स्यात्। (६) न चाकिञ्चित्करत्वमात्रेण तत्त्वज्ञानोपायो व्युत्पाद्यते। (७) विनेयाश्चैते परदुःखदुःखितमनसो दृश्यन्ते सम्यग्दर्शनसमावस्थां प्राप्ताः अपि तु संसारे। तत्र न शान्तो रस इति[1]।'' इति।

अयमाशयोऽत्र पूर्वपक्षिणाम्--

(१) शान्तस्य शमस्थायिभावत्वे शम-शान्तयोर्भेदेन तयोः समानार्थकतया पर्यायत्वकथनमसंगतं स्यात्।

(२) मुनिना (अष्टौ स्थायिनः + अष्टौ सात्त्विकाः + त्रयस्त्रिंशद् व्यभिचारिण इति) एकोनपञ्चाशद्भावाः प्रतिपादिताः। शमस्थायिभावस्य शान्तस्य स्वीकारे पञ्चाशद्भावाः स्युः। एवञ्च संख्या-नियम-त्यागान्नास्ति शमः तत्स्थायि शान्तश्च।

(३) अपरं च ऋतुमाल्यादयो विभावास्तत्समनन्तरभाविनि शृङ्गारादिरसे कारणतया प्रतीयन्ते, परन्तु तपःस्वाध्यायादयस्तत्समनन्तरभाविनि शमे शान्ते वा कारणत्वेन न प्रतीयन्ते। अतस्तपःस्वाध्यायादयो न शान्तस्य विभावाः। एवमेव च कामाद्यभावोऽपि न शान्तस्यानुभावः, शान्ताद् भिन्ने वीरादावपि कामाद्यभावस्य विद्यमानत्वात् शान्ते विपक्षाद् वीरादेरव्यावृत्ततया कामाद्यभावस्य च शान्तस्यानुभावत्वम्। यदि कामाद्यभावः शान्तस्यानुभावः स्यात् तर्हि कामाद्यभावस्य शान्तस्य कार्यतया यत्र यत्र शान्तस्तत्र तत्रैव कामाद्यभाव इत्यन्वयव्यतिरेकनियमो भवेत्। किन्तु शान्तस्थले कामाद्यभावस्य विद्यमानत्वेन अन्वयसत्त्वेऽपि शान्त-भिन्ने वीरादावपि तस्य सत्त्वाद् व्यतिरेकाभावः। अतः कामाद्यभावस्य शान्तानुभावत्वं न घटते।

(४) समस्तव्यापार-प्रविलयरूपस्य शमस्याभिनयायोग्यत्वान्न नाट्ये शान्तरसः शक्यते प्रयोक्तुम्। सुप्तमोहादयोऽपि निःश्वासादिचेष्टाभिरनुभाव्यन्ते। किन्तु चेष्टा-व्युपरमरूपस्य शान्तस्याभिनयासंभवात् नास्ति शान्तो रसः।

(५) विषयोपभोगानन्तरं जायमानस्य धृत्यादेर्व्यभिचारित्वमपि शान्ते न स्यात्।

(६) चेष्टारहितेनाकिञ्चित्करेण शमप्रधानपुरुषेण तत्त्वज्ञानोपायस्यानुष्ठानमपि न शक्यते कर्तुम्।

---

१. तत्रैव ६११-६१२ इति पृष्ठे।

(७) शान्तस्य साधकाः सत्त्वज्ञानस्थितिं प्राप्ता अपि संसारे परदुःख-दुखितमनसो दृश्यन्ते। अतो नास्ति शान्तो रस इति पूर्वपक्षाभिप्रायः। एवं पूर्वपक्षं समुपस्थाप्य शान्तरसं प्रस्थापयतयाऽभिनवगुप्तपादेन प्रतिपादितम्– इह लोके यथा धर्मार्थकामाः पुरुषार्थास्तथैव मोक्षोऽपि पुरुषार्थः शास्त्रादौ प्राधान्येनोपायतः प्रतिपाद्यते। यथा च कामादिषु रत्यादयः समुचिताश्चित्तवृत्तयः कविनटद्वारेण सहृदयसामाजिकान् प्रति शृङ्गारादिरूपत्वेन रसत्वं नीयन्ते तथैव मोक्षरूपपरमपुरुषार्थोचिता चित्तवृत्तिः सहृदयान् प्रति शान्तरूपतया कथं रसत्वं नानीयेत ? ततश्च मोक्षरूपपुमर्थसाधक-चित्तवृत्तिरूपस्थायिभावः शान्तरसत्वेन आस्वाद्यत एव नाट्ये इति।

शान्तस्थायि-निरूपणम् :

शान्तस्य किन्नामासौ चित्तवृत्तिरूपस्थायिभाव इति जिज्ञासायामभिनवगुप्तपादेन प्रतिपाद्यते–

(क) तत्र प्रथमं निर्वेद-स्थायित्वोपपादनम् :

तत्खण्डनञ्च यत्तु केचित् तत्त्वज्ञानजनित-निर्वेदस्य शान्ते स्थायित्वम्, एतदर्थमेव माङ्गलिकेन मुनिना उभयधर्मोपजीवित्वख्यापनाय अमङ्गलभूतोऽप्यसौ निर्वेदः स्थायिसंचारिमध्ये पठितः। अष्टावेव स्थायिनो भवन्तीति संख्यानियमाभावादेव स्थायिषु संख्या च तेन नोक्ता। "व्यभिचारिणश्चास्य आलस्यौग्र्य -जुगुप्सावर्ज्याः[१]" इत्यत्र शृङ्गारे जुगुप्सां व्यभिचारित्वेन निषेधयता मुनिना सर्वेषामेव भावानां स्थायित्वं व्यभिचारित्वं चानुज्ञातम्। तत्त्वज्ञानजन्यनिर्वेदश्च रत्यादि-स्थाय्यन्तरोपमर्दकोऽपि भवति। अतस्तत्त्वज्ञानजन्यनिर्वेद एव शान्तस्य स्थायीति कथयन्ति तन्न, तत्त्वज्ञानजन्यनिर्वेदस्य शान्तस्थायित्वे तत्त्वज्ञानस्य तद्विभावत्वं (कारणत्वं) कथनीयं स्यात्। तत्त्वज्ञानं च वस्तुतो मोक्षकारणवैराग्यस्य कारणम्। यदि नाम वैराग्यबीजस्य तत्त्वज्ञानस्य परम्परया शान्तकारणत्वं स्वीक्रियेत तर्हि कारण-कारणे विभावत्वव्यवहारादतिव्याप्तिदोषः। अतो न तत्त्वज्ञानजन्यनिर्वेदः शान्तस्य स्थायी। अपरं च सांसारिकविषयेष्वनुपादेयताप्रत्ययरूप- निर्वेदो वैराग्यस्वरूप एव। स च तत्त्वज्ञानस्य विलोमरूपेणोपयोगी नानुलोमरूपेण। अर्थात् विरक्त-पुरुषप्रयत्नेन तत्त्वज्ञानमुत्पद्यते। तत्त्वज्ञानाच्च निःश्रेयससिद्धिः न तु तत्त्वज्ञानान्निर्वेदो निर्वेदाच्च मोक्षः। अतो निर्वेद एव तत्त्वज्ञाने कारणम् न तु तत्त्वज्ञानस्य कार्यम्। अतश्च न

---

१. तत्रैव ५५२ - तमे पृष्ठे।

तत्त्वज्ञान-जन्य-निर्वेदः शान्तस्य स्थायीति। न च "तत्परं पुरुषख्यातेर्गुण-वैतृष्ण्यम्[1]" इति योगसूत्रानुसारेण आत्मज्ञानानन्तरं गुणं--प्राकृतिकपदार्थं-प्रति वैतृष्ण्यमेव परं वैराग्यम्। ततश्च तत्त्वज्ञान-जन्य-वैराग्यरूपो निर्वेदः शान्तस्य स्थायी भवितुमर्हत्येवेति वाच्यम्, तादृशवैराग्यस्य ज्ञानस्यैव पराकाष्ठात्वमिति भगवता पतञ्जलिनैव प्रतिपादितत्वात्। अतो न निर्वेदः स्थायी अपि तु तत्त्वज्ञानमेव। यत्तु व्यभिचारिभावव्याख्यानावसरे मुनिना तत्त्वज्ञानस्य[2] निर्वेदविभावत्वं प्रतिपादितम्, तत्तु चिरकालं भ्रान्त्या विप्रलब्धस्य पुरुषस्य विषयेषूपादेयत्व-निवृत्तये यत् सम्यग्ज्ञानम् तस्य। अर्थात् तादृशयथार्थज्ञानं खेदरूपनिर्वेदस्य कारणम्। यथा--

"वृथादुग्धोऽनड्वान् स्तनभरनता गौरिति परं
परिष्वक्तः षण्ढो युवतिरिति लावण्यरहितः।
कृता वैदूर्याशा विकचकिरणे काचशकले
मया मूढेन त्वां कृपणमगुणज्ञं प्रणमता[3]।।" इत्यादौ।

न च 'दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति न्यायसूत्रानुसारेण मिथ्याज्ञान-विनाशकं तत्त्वज्ञानं रागद्वेषरूप दोषस्याभावरूप-वैराग्यस्य कारणम्। एवञ्च वैराग्य-रूप-निर्वेदस्य तत्त्वज्ञानं कारणम् भवति। ततश्च तत्त्वज्ञानजनिर्वेदः शान्तस्य स्थायी स्यादेवेति वाच्यम्, अत्र शोक-प्रवाहप्रसर-रूपचित्तवृत्ति-विशेषान्निर्वेदात् रागादिप्रध्वंसरूपस्य वैराग्यस्य वैलक्षण्यात्। अर्थात् भावरूपो निर्वेदः अभावरूपवैराग्याद् विलक्षणः। एवञ्च पूर्वोक्तन्यायसूत्रानुसारेण वैराग्यस्य कारणं तत्त्वज्ञानं तद्भिन्ननिर्वेदस्य कारणं कथं स्यात् ? यदि निर्वेद-वैराग्ययोरैक्यमपि स्वीक्रियेत तथापि मिथ्याज्ञान-विनाशेन जायमानस्य दोषाभावरूपवैराग्यस्य मोक्षे साक्षात्कारणत्वं नास्ति। किञ्च तत्त्वज्ञानजन्यो निर्वेद इत्यङ्गीकृते शमस्यैव निर्वेद इति नाम कृतं स्यात्। अतः शम एव शान्तरसस्य स्थायी न तु निर्वेद इत्यभिनवगुप्तपादेन सिद्धान्तितम्। शम-शान्तयोः पर्यायत्वरूपपूर्वोक्तदोषस्तु हास-हास्याभ्यामेव परिहृतः। अर्थाद्यथा हासः पर्यायवाचिनो हास्यस्य स्थायी तथैव शमोऽपि शान्तस्य स्यात्।

---

१. योगसूत्रम् १, १६।
२. नाट्यशास्त्रे सप्तमाध्याये।
३. अभिनवभारत्याम् ६१७ तमे पृष्ठे।

(ख) रत्याद्यन्यतमस्य स्थायित्वखण्डनम् :

यत्तु केचित्--रत्याद्यन्यतमस्यैव शान्ते स्थायित्वम्। रत्यादयो हि शृङ्गाराद्युपयोगिविभावेभ्यो भिन्नेन अध्यात्मचर्चादिरूपेण शान्तरसोपयोगिना अलौकिकविभाव-विशेषेणाभिव्यज्यमानाः सन्तो भिन्न-प्रकारा एव भवन्ति। तेषां विलक्षणरत्यादीनामन्यतमस्यैव शान्ते स्थायित्वम्। एवञ्च (१) मोक्षसाधनीभूतया अखण्डानन्दस्वरूपया आत्मविषयकरत्या, (२) समस्त-विषयं वैकृतं पश्यता जनस्य विकृतदर्शनजन्यहास्यरस-स्थायिभावेन हासेन वा, (३) विश्वं च शोच्यं विलोकयतः साधकस्य करुणरस-स्थायिभावेन शोकेन वा, (४) सांसारिकवृत्तान्तं मोक्षस्यापकारित्वेन पश्यतः अपकारित्वजन्यरौद्ररसस्य स्थायिभावेन क्रोधेन वा, (५) अत्यन्तज्ञानप्रधानमुत्साहमाश्रितवतः साधकस्य वीररस-स्थायिभावेनोत्साहेन वा, (६) समस्तसांसारिकविषयाद् बिभ्यतो जनस्य भयानक-स्थायिभावेन भयेन वा, (७) सर्वलोकस्पृहणीयादपि प्रमदादेर्जुगुप्समानस्य बीभत्सस्थायिभावजुगुप्सया वा, (८) अपूर्वस्वात्मातिशयलाभाद् विस्मयमानस्य अद्भुतरस-स्थायिभावेन विस्मयेन वा मोक्षसिद्धिः (चिरशान्तिः) भवतीति रति-हासादीनामन्यतमस्यैव शान्ते स्थायित्वमिति वदन्ति तन्न, एवंवादिनां मते कदाचिद्रतेः कदाचिद्हासादेः शान्तस्थायित्वे कस्याप्येकस्यैव स्थायित्वाप्रसङ्गात्। न च तत्तद् विभाव-विशेषभेदेन तत्तद्रतिहासादेः शान्ते स्थायित्वं स्यादिति वाच्यम् ? प्रतिपुरुषं स्थायिभेदेन शान्तरसस्याप्यानन्त्यापत्तेः। न च स्थायिभावभेदेनापि सर्वत्र मौक्षरूपैकफलत्वादेक एव शान्तरसः स्यादिति वाच्यम् ? धर्मैकफलत्वे वीर-रौद्रयोरप्येकत्वापत्तेः। एवञ्च रत्याद्यन्यतमस्य स्थायित्वं न युक्तम्।

(ग) रत्यादिसमष्टेः स्थायित्वखण्डनम् :

यत्तु केचित् पानकरसवन्मिलिताः सर्वे एव स्थायिभावाः शान्तस्य स्थायिन इति प्रतिपादयन्ति तन्न, रत्यादि-विषयक-चित्तवृत्तीनामयुगपद्भावात्, हासक्रोधयोर्भयोत्साहयो-रतिजुगुप्सयोः परस्परं विरोधाच्च रत्यादि-समष्टेः स्थायित्व-प्रतिपादनस्यासंगतत्वात्। एवञ्च पूर्वोक्तप्रकारेण निर्वेदस्य, रत्याद्यन्यतमस्य, रत्यादिसमष्टेश्च शान्ते स्थायित्वं निराकृत्य अभिनवगुप्तपादेन प्रतिपादितम्,--

(घ) आत्मज्ञानमेव शान्ते स्थायीति :

तथा हि--''इह तत्त्वज्ञानमेव तावन्मोक्षसाधनमिति तस्यैव मोक्षे स्थायिता युक्ता। तत्त्वज्ञानं च नाम आत्मज्ञानमेव। आत्मनश्च इन्द्रियादिव्यतिरिक्तस्यैव ज्ञानम्। परो

ह्येवमात्मा अनात्मना (देहादिना)-भिन्नः एव स्यात्। विपञ्चितं चैतदस्मद्गुरुभिः। अस्माभिश्चान्यत्र[1] वितन्यत इतीह नातिनिर्बन्धः कृतः। तेनात्मैव ज्ञानानन्दादिविशुद्धधर्मयोगी परिकल्पितविषयभोगरहितोऽत्र स्थायी[2]।''

न चात्मनः स्थायित्वेऽन्येषां रत्योदानामस्थायित्वं शङ्कनीयम्। रत्यादयो हि स्वस्वकारणानामुपस्थित्या प्रकाशमाना अनुपस्थित्या च विलीयमाना अपि आत्मरूपस्थायि-भित्ति-संश्रयाः सन्तो व्यभिचारिभावापेक्षया कञ्चिदधिकं कालं स्थिराः सन्तः स्थायिन उच्यन्ते। तत्त्वज्ञानन्तु सकलभावान्तर-भित्तिस्थानीयं सर्वस्थायिभ्यः स्थायितमं सर्वा रत्यादिकाः स्थायिचित्तवृत्तीर्व्यभिचारीभावयत् निसर्गत एव सिद्धस्थायिभावरूपमिति[3]। अत एव च आत्मरूप-तत्त्वज्ञानस्य शान्तरस-स्थायिनः पृथग्गणना स्थायिषु मुनिना न कृता। रुण्डमुण्डयोर्मध्ये यथा विद्यमानं तृतीयं गोत्वमिति न गण्यते तथैवाष्टसु स्थायिषु विद्यमानमात्मरूपतत्त्वज्ञानं न पृथग्गण्यते इति भावः। तेन एकोनपञ्चाशद् भावा इत्यव्याहतमेव।

शान्तरस-स्थायिन आत्मज्ञानस्य स्थायिषु गणनाभावेऽपि रसेषु शान्तरसस्य गणना युक्तैव, रत्यादीनामास्वादात् शान्तास्वादस्य वैलक्षण्यात्। अत्रायमाशयः-- ''योगश्चित्तवृत्तिनिरोधः'' ''तदा द्रष्टुः स्वरूपेऽवस्थानम्'', ''वृत्तिसारूप्यमितरत्र[4]'' इति योगसिद्धान्तानुसारेण लौकिकानुभवक्षणे चित्तवृत्तिसारूप्याद् विशुद्धात्मस्वरूपस्य प्रतीतिर्न भवति। निर्विकल्पे समाधौ विशुद्धात्मस्वरूपानुभूतिर्जायते। पुनश्च व्युत्थानकाले (समाध्यनन्तरम्) वृत्तिसारूप्यं भवति। अर्थात् चित्तवृत्तिकलुषितरूपेणैवात्मप्रतीतिर्भवति न तु वृत्तिशून्यरूपेण। अतः स्थायिभावरूपेण आत्मनो न पृथग्गणनम्। किन्तु शान्तरसे शुद्धात्मन आस्वादात् शान्तस्य पृथग्गणनं न्याय्यमेव। अत एव च 'अभिनवभारती'कारेण सिद्धान्तितम्--'तस्मादस्ति शान्तो रसः। तत्र सर्वरसानां शान्तप्राय एवास्वादो विषयेभ्यो – विपरिवृत्या, तन्मुख्यतालाभात्। केवलं वासनान्तरोपहित इति[5]।'' ''अयमेव (च शान्तरसः) स्वभावः[6]।'' अर्थात् शान्त एव प्रकृतिरसः अन्ये च विकृतयः। अत एव च ''अस्य सर्वप्रकृतित्वमभिधाय (त्वाभिधानाय) पूर्वमभिधानमिति[7]'' एवञ्च स्वमतं समर्थयता अभिनवगुप्तपादेन

---

१. भगवद्गीताव्याख्यायाम्।
२. अभिनव भारत्याम् ६२३ तमे पृष्ठे।
३. तत्रैव ६१४ तमे पृष्ठे।
४. योगदर्शने १, १-३।
५. अभिनवभारत्याम् ६३५-तमे पृष्ठे।
६. तत्रैव ६२७-तमे पृष्ठे।
७. तत्रैव ६३५-तमे पृष्ठे।

प्रोक्तम्,--''इतिहास-पुराणकोशादौ च नवरसाः श्रूयन्ते। श्रीमत्सिद्धान्तशास्त्रेष्वपि। तथा चोक्तम्–

अष्टानामिह देवानां शृङ्गारादीन् प्रदर्शयेत्।
मध्ये च देवदेवस्य शान्तं रूपं प्रकल्पयेत्[1]।। इति।

अत एव च हेतोर्भरतमुनिना--

''मोक्षाध्यात्मनिमित्तस्तत्त्वज्ञानार्थहेतुसंयुक्तः।
निःश्रेयसधर्मयुतः शान्तरसो नाम विज्ञेयः।।''

इत्यत्र 'मोक्षाध्यात्मनिमित्तः' इत्यनेन शान्तस्य विभावः, 'तत्त्वज्ञानार्थहेतुसंयुक्तः' इत्यनेन तत्स्थायी, 'निःश्रेयसधर्मयुतः' इत्यनेन तदनुभावश्च क्रमात् प्रदर्शिताः, तथा 'स्वं स्वं निमित्तमासाद्य' इत्यादिपूर्वोक्तकारिकया शान्तस्य रसान्तरप्रकृतित्वमुपसंहृतम्।

''ननु भरतमुनिना 'डिम'-लक्षण-प्रसङ्गे षड्रसलक्षणयुक्तश्चतुरङ्को वै डिमः कार्यः।''

'शृङ्गार-हास्य-वर्जः शेषैरन्यैः समायुक्तः'' ''दीप्तरसकाव्ययोनिः[2]।।'' इत्यादि प्रतिपादितम्। अत्र 'दीप्तरसकाव्ययोनि'रित्यादिना डिमे रौद्रस्य प्राधान्यम्, हास्य-शृङ्गार परिहारेण तस्य षड्रसत्वं च प्रतिपादितम्। यदि नाम शान्तोऽपि नवमो रसो भवेत्तर्हि हास्यशृङ्गारवर्जनेनापि डिमे सप्तरसत्वेन 'षड्रसलक्षणयुक्तः' इति कथनमसंगतम्। अतः शान्तरसो न मुनेः संमत इति चेत्, न, रौद्ररस-प्रधाने डिमे बलात् सेव्यमानयोर्हास्य-शृङ्गारयोः संभाव्यमानत्वात् तयोर्निषेधाय शृङ्गार-हास्यवर्ज' इति। शान्तस्य तु डिमे संभावनाया एवाभावात् नामग्राहपूर्वकं तस्य निषेधस्यानावश्यकत्वात्। अतो नवमशान्तरस-स्वीकारे न कापि विप्रतिपत्तिः। अभिनवगुप्तपादमतेन भरतमुनेर्डिमलक्षणं प्रत्युत शान्तस्य साधकमेव न बाधकम्। यतो हि तत्र मुनिना 'दीप्तरसकाव्ययोनिः' इत्यनेन शान्तरस एव व्यवच्छेद्यते। शान्तरसास्वीकारे कस्य व्यवच्छेदः स्यात् ? न च करुणाद्भुत-प्राधान्यमनेन व्यवच्छेद्यते इति वाच्यम् ? 'सात्त्वत्यारभटीवृत्तिसम्पन्नः'[3] इत्यनेनैव करुणाद्भुतयोर्निरासात्। यतस्तयोः सात्त्वत्यारभट्यौ वृत्ती एव न भवतः। शान्ते तु सात्त्वत्याः सत्त्वेन तस्य (शान्तस्य) व्यवच्छेदार्थं 'दीप्तरसकाव्ययोनिः' इति संगतम्। अन्यच्च दीप्तरसपदेन करुणाद्भुतयोर्व्यवच्छेद्यत्वे डिमस्य षड्रसयुक्तत्वकथनमपि न संगच्छेत। अतो डिमलक्षणं प्रत्युत शान्तरसस्य सद्भावे लिङ्गम्। एवञ्चाभिनवगुप्तपादेन शान्तरस-सद्भावं समर्थ्य

---

१. तत्रैव ६३६-तमे पृष्ठे।
२. नाट्यशास्त्रे १०, ८७-९२ चौखम्बासंस्करणे।
३. नाट्यशास्त्रे २०, ९२।

"अस्य रसस्य यम-नियमेश्वर-प्रणिधानाद्युपदेशेऽनुयोगितया महाफलत्वं, सर्वप्राधान्यम्, इतिवृत्तव्यापकत्वं चोपपन्नमित्यलमतिप्रसङ्गेन"[१] इत्युक्तम्।

ततश्चाभिनवभारतीकारेण शान्तरसस्यास्वादप्रकारं प्रकटयता प्रतिपादितम्,-- "अस्मिन् शान्तरसे विशुद्धमात्मस्वरूपं रत्यादिषूपरञ्जकेषु तथाभावेनापि सकृद्विभातोऽयमात्मेति न्यायेन भासमानं परोन्मुखतात्मक-सकल-दुःखजालहीनं परमानन्द-लाभ-संविदेकत्वेन काव्यप्रयोग-प्रबन्धाभ्यां साधारणतया निर्भासमानम् अन्तर्मुखावस्थाभेदेन लोकोत्तरानन्दानयनं तथाविधहृदयं विधत्ते। एवं ते नवैव रसाः। पुमर्थोपयोगित्वेन रञ्जनाधिक्येन वा इयतामेवोपदेश्यत्वात्[२]" इति।

शारदातनयेन स्वीये "भावप्रकाशने" पद्मभू-मतेन शान्त-रहिता अष्टौ नाट्यरसा इति तथा वासुकि-मतेन शान्त-सहिता नव नाट्यरसा इति प्रतिपादितम्[३]। एतद्विषयोल्लेखो- भरतनाट्यशास्त्रे कदाचिदासीदिति तत्तात्पर्यम्।

आचार्याभिनवगुप्तपादानां सयुक्तिकं पूर्वोक्तं मतं विलोक्यापि केचित् समालोचकाः भरतमुनिप्रतिपादित-शान्तरस-समस्यामसमाहितामेव मन्यन्ते। तेषां पुरतो मया स्वमतमुपस्थाप्यते--

(क) छन्दोदृष्ट्या चौखम्बासंस्करणस्य 'अष्टौ' इति पदयुक्तपाठात् गायकवाड-संस्करणस्य दिल्लीविश्वविद्यालयसंस्करणस्य च 'नव' इति पदयुक्तः पाठोऽधिकः सुसङ्गतः। यतो हि 'अष्टौ' इति पाठे सर्वत्र छन्दःपूर्त्यर्थम् 'च, तु, हि, इति' इत्यादि निरर्थकपदान्युपलभ्यन्ते। स च दोषः 'नव' इति पाठे नास्ति। अतः 'अष्टौ' इति 'नव' इत्यस्य स्थाने परिवर्तितः पाठः प्रतीयते।

(ख) विष्णुधर्मोत्तरपुराणस्य काव्यशास्त्रीयभागस्य रसविवेचनं सर्वथा "नाट्यशास्त्रा"नुसारि इति सर्वे समालोचका ऐकमत्येन स्वीकुर्वते। पुराणञ्चेदं पञ्चमशतकात् प्राचीनमेवेति पाश्चात्त्यपद्धत्या विचारयन्तोऽपि विद्वांसो मन्यन्ते। एतत्पुराणस्य तृतीयखण्डे[४] प्रतिपादितेषु नवसु रसेषु शान्तस्यापि विवेचनं वरीवर्ति। तत्र सर्वप्रथमम् –

"शान्तस्य तु समुत्पत्तिर्नृप वैराग्यतः स्मृता।
स चाभिनेयो भवति लिङ्गाग्रहणतस्तथा[५]।।"

---

१. अभिनवभारत्याम् ६३६-तमे पृष्ठे।

२. तत्रैव ६४०-तमे पृष्ठे।

३. भावप्रकाशने ४७-तमे पृष्ठे। द्रष्टव्या लेखकस्य "काव्यात्ममीमांसा" ३४४-४५-तम पृष्ठयोः (चौ० सं०)।

४. विष्णुधर्मोत्तरपुराणे तृतीयखण्डे १५शे, १७शे, ३०शे चाध्याये।

५. तत्रैव तृतीयखण्डे ३०, ६। द्रष्टव्या "काव्यात्ममीमांसा" ३३३-तमे पृष्ठे।

इत्यादिरूपेण शान्तस्यैव विवेचनमित्यधिकमहत्त्वपूर्णविषयः। एतदनुसारेण निर्बाधमिदं स्वीकर्तुं शक्यते, यन्नाट्यशास्त्रेऽपि शान्तरसस्यप्रतिपादनमभूत् तथा अभिनवगुप्तपादानुसारेण सर्वप्रथममभूत्।

(ग) पञ्चमशतके रचिते जैनग्रन्थे ''अनुयोगद्वारसूत्रे''ऽपि[1] शान्तरस-प्रतिपादनं प्राप्यते। अत्र शान्तस्य विभावादिनिरूपणं ''नाट्यशास्त्रा''नुसार्येव। अतः शान्तरसस्य प्रथमोद्भावनं भरतनाट्यशास्त्रेऽनङ्गीकृत्य ''अनुयोगद्वारसूत्रे'' ततूस्वीकरणमसङ्गतमेव।

(घ) दण्डिना ''काव्यादर्शे'' काव्यपरत्वेन रस-विचारे कृतेऽपि यदुद्भटेन ''काव्यालंकारसारसंग्रहे'' 'नव नाट्यरसाः स्मृताः' इत्युल्लिखितं तत् सूचयति यदुद्भटः नाट्यशास्त्रस्य तत्पाण्डुलिपिं प्राप यत्र नवसु रसेषु शान्तस्यापि प्रतिपादनमासीत्। दण्डि-धनञ्जय-धनिकमम्मटादिभिः शान्तापलापिनां पाठ उपलब्धो येन तैः शान्तस्य तादृशी चर्चा नाकारि।

(ङ) एवमेव च कालिदास-विषयेऽपि शक्यते वक्तुं यत्तेनापि 'अष्टौ रसाः' इत्येव पाठ उपलब्धः। कालिदासस्य च 'अष्टरसाश्रयः प्रयोगः' इत्यत्र 'प्रयोग' शब्दप्रयोगोऽतीवसाभिप्रायः। अर्थात् प्रयोगात्मकतया-अभिनयात्मकतया तस्य अष्टावेव रसा अभिप्रेता आसन्। समस्तव्यापारप्रविलयरूपशान्तस्य व्यापार-प्रधानेऽभिनयात्मके नाट्ये प्रयोगो न संभवः। इदमेव च मतं धनञ्जय-धनिकाभ्यामप्यनुसृतम्।

नाट्ये शान्तरसस्याभिनयो भवितुं शक्नोतीति वासुकिभट्टोद्भटाभिनवगुप्त-निःशङ्कशार्ङ्गदेव-जगन्नाथ-प्रभृतीनां निर्भ्रान्तं मतम्। एतद्विषये मदीयापि निर्भ्रान्तधारणा वरीवर्ति, यत् शान्तस्याभिनयो भवितुं शक्नोति तथा च सफलं भवितुं शक्नोति। एतस्य विवेचनं सविस्तरं मयान्यत्र[2] कृतमिति नेह वितन्यते।

पूर्वोक्तयोरुभयोः पक्षयोर्निष्पक्षरूपेण विचारेण ''नाट्यशास्त्रे''ऽपि शान्तरस-प्रतिपादनमभूदिति आचार्याभिनवगुप्तपादानां मतं नासङ्गतमितिशम्।

---

१. अनुयोगद्वारसूत्रे १२६, गाथा ८१-८२। ''काव्यात्ममीमांसा'' ३३४-तमे पृष्ठे।

२. विहार-सङ्गीत-नृत्य-नाट्यपरिषत् पत्रिकायाम् (क्रमसंख्या १३)।

स्वभावोक्तेरलङ्कारत्वस्य समीक्षणम्

स्वभावोक्तेरलंकारत्वं विद्यते न वेति विवेचनं भामहात् पूर्वकालादेव अलंकारशास्त्रे दरीदृश्यते। लोकातिक्रान्तगोचररूपातिशयोक्त्यैव अर्थस्य विभावनं वक्रोक्तिशून्यालंकारस्थले अलंकारत्वाभावं च मन्वानस्य भामहस्य वक्रोक्तौ तथा काव्यजीवितरूपायां वैदग्ध्यभङ्गीभणिति-स्वरूपायां कुन्तकस्य वक्रोक्तौ स्वभावोक्तेः समावेशः शक्यसंभवो न-वेति विचारः काव्यशास्त्रस्य प्रारम्भकालादेव दृष्टिगोचरीभवति।

आचार्य भामहेन--

'स्वभावोक्तिरलंकार इति केचित् प्रचक्षते।

अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा'।।[१]

इत्यत्र 'केचित् प्रचक्षते' इत्येवं प्रतिपादयता लोकातिक्रान्तगोचरताया अभावस्थले शुद्धे स्वभावोक्तिरूपे अलंकारत्वमस्वीकृतम्[२]। अतस्तन्मते

'गाः वारयति दण्डेन डिम्भः शस्यावतारणीः'।[३]

इत्यादौ वार्तामात्रत्वम्। किन्तु 'केचित् प्रचक्षते' इति कथनात् केषाञ्चिन्मते तदानीमपि स्वभावोक्तेरलंकारत्वमासीदेवेति निश्चीयते।

अलंकारान्तराणामप्येकमाहुः परायणम्।

वागीशमहितामुक्तिमिमामतिशयाह्वयाम्।।[४]

इति मन्यमानेनापि आचार्यदण्डिना पदार्थानां नानावस्थानां विभिन्नरूपाणां साक्षात्–प्रत्यक्षरूपेण अव्याजरूपेण वा प्रदर्शने स्वभावोक्तिर्जातिर्वा अलंकृतिर्भवतीति प्रतिपादयाञ्चक्रे[५]। शास्त्रे एततृस्वभाववर्णनस्य साम्राज्ये सत्यपि काव्येऽपि एतदभीप्सितं भवति। अतो दण्डिमते स्वभावोक्तेरलंकारत्वं विद्यते।

---

१. भामहालंकारे २, ९३।

२. सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना।। तत्रैव २, ८५।

३. तत्रैव २, ९४।

४. काव्यादर्शे २, २०।

५. नानावस्थं पदार्थानां रूपं साक्षाद् विवृण्वती।
स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा।। तत्रैव २, ८।।

कविता–कामिनी-पञ्चबाणेन बाणेन अग्राम्याया जातेरलंकारत्वं स्वीकुर्वाणेन भामहमत-विपरीतं स्वमतं संस्थापयाञ्चक्रे[1]। भट्टिनापि स्वभावोक्तिरूप-वार्तालंकारस्य उदाहरणानि[2] प्रदर्शयता स्वभावोक्त्यलंकारपक्ष एवाङ्गीकृतः।

भट्टोद्भटेन मृगशावकादीनां हेवाकानाम् अर्थात् स्वजात्यनुरूपलीला-विशेषाणां वर्णने स्वभावोक्तिरलंकारो भवतीति स्वीचक्रे।[3]

एतत् प्रसङ्गे प्रतीहारेन्दुराजेन 'काव्यालंकारसारसंग्रह–लघुवृत्तौ' ''तस्याश्च (स्वभावोक्तेः) अलंकारत्वम् असाधारणपदार्थ–स्वरूपध्वननात्'' इत्येवं कथयता स्वभावोक्तौ पदार्थस्य असाधारणे–स्वरूपध्वननात् अलंकारत्वं भवत्येवेति प्रतिपादयाञ्चक्रे। एतावता साधारणस्वभाववर्णने नालंकारत्वमिति प्रतिहारेन्दुराज-राद्धान्तोऽवगम्यते।

आचार्यवामनेन वस्तुस्वभावस्फुटत्व-रूपे अर्थव्यक्तिगुणे एव स्वभावोक्तेरन्तर्भावः[4] क्रियते।

आचार्यरुद्रटमते पदार्थानां स्वरूपवर्णनं यत्र पुष्टार्थम्--रमणीयार्थम्--अविपरीतं निरुपमम् अनतिशयम् तथा अश्लेषं भवति तत्र वस्तुस्वभाववर्णनाद् 'वास्तवम्'। अत्र च कल्पनात्मकविधानमन्तरैव वस्तुनः स्वाभाविकसौन्दर्य-वर्णनं भवतीति हेतोः एतादृशस्थले जातिरूपा[5] स्वभावोक्तिरलंकृतिर्भवति।

वैदग्ध्यभङ्गीभणितिरूपाया वक्रोक्तेरेव अलंकारत्वं स्वीकुर्वाणेन कुन्तकेन पदार्थानां स्वरूपाधायके स्वभाववर्णने अलंकारत्वं नाङ्गीक्रियते। अयन्तदाशयः--यदि नाम स्वभाववर्णनेऽपि अलंकारत्वं तदा स्वभाववर्णनादभिन्नं काव्यशरीरस्थानीयं किमपि तादृशं वस्तु भवेत् यत् अलंकार्यरूपं स्यात्, किन्तु स्वरूपकथनं विना वस्तुवर्णनमेव न संभाव्यते'। यतो हि--

स्वभावव्यतिरेकेण वक्तुमेव न युज्यते।
वस्तु तद्रहितं यस्मात् निरुपाख्यं प्रसज्यते।[6]

---

१. नवोऽर्थो जातिरग्राम्या . . . । हर्षचरिते प्र० ६।

२. भट्टिकाव्ये १०, ४६।

३. क्रियायां संप्रवृत्तस्य हेवाकानां निबन्धनम्।
कस्यचिन्मृगडिम्भादेः स्वभावोक्तिरुदाहृता।। काव्यालंकारसारसंग्रहे ३, ५।

४. वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः। काव्यालंकारसूत्रे ३, २, १४।

५. संस्थानावस्थानक्रियादि यद् यस्य यादृशं भवति।
लोके चिरप्रसिद्धं तत्कथनमनन्यथा जातिः।। रुद्रटालंकारे ७, ३०।

६. वक्रोक्तिजीविते १, १२।

अर्थात् स्वभावरहितं वस्तु गगनकुसुमायमानं भवति। भवतः अभिधान-प्रत्ययौ अस्मादिति 'भावः'। स्वस्य आत्मनोभावः स्वभावः इति व्युत्पत्तेः स्वभावकथनाद् भिन्नं वस्तु निरुपाख्यम् असत्कल्पमेव भवति, अतः स्वभावोक्त्यलंकारभिन्नं तस्य अलंकार्यं न सद्रूपं स्यात्। ततश्च अलंकार्याभावात् स्वभावोक्त्यलंकारः न शक्यते स्वीकर्तुम्।

एतत् प्रसङ्गे स्वभावोक्तिवादिनः कुन्तकमाक्षिपन्ति यत् 'सालंकारस्य काव्यता' इति स्वीकृत्य यथा भवान् अलङ्कार्यालङ्कारयोर्भेदं न मनुते तथैव स्वभावोक्तिवादिनः तयोर्भेदं न मन्वते। एतेषामाक्षेपं समादधता कुन्तकेन प्रत्यपादि--

'अलंकृतिरलंकार्यमपोद्धृत्य विविच्यते।

तदुपायतया तत्त्वं सालङ्कारस्य काव्यता।।''[1] इति।

अयं भावः यथा व्याकरणनये वर्णपदन्यायेन प्रकृतिप्रत्ययादिकल्पना क्रियते तथैव पारमार्थिक दृष्ट्या सालंकारस्य काव्यत्वे स्वीकृते अलंकार्यालंकारयोरभेदेऽपि व्यावहारिकदृष्ट्या तयोर्भेदः स्वीक्रियते। किन्तु एतद्दृष्टान्तेन स्वभावोक्त्यलंकारस्थले अलंकार्यालंकारयोरभेदः स्वीकर्तुं न शक्यते, स्वभावोक्तिभिन्नस्य अलंकार्यस्य पूर्वोक्तप्रकारेण अविद्यमानत्वात्। स्वभाव-कथनं काव्य-शरीर-स्थानीयं भवति। तदेव यदि स्वभावोक्त्यलंकारः तर्हि कम् अलंकार्यं सोऽलंकारः अलंकुर्यात् ? एकमेव तत्त्वम् अलंकार्यम् अलंकारश्च भवितुं नार्हति। नहि कश्चित् स्वयमेव स्वस्कन्धे अधिरोहति[2]।

यदि नाम 'दुर्जनतोषन्यायेन' स्वभावोक्त्यलंकारः स्वीक्रियेत तर्हि सर्वत्र स्वभावोक्तेर्विद्यमानत्वात् अलंकारान्तरे विहिते तयोर्भेदप्रकटे सति संसृष्टिः अप्रकटे वा संकरः स्यात्। एवंसति उपमाद्यलंकाराणाम् स्वस्वलक्षणान्येव निरर्थकानि भवेयुः[3]। अतः स्वभावोक्त्यलंकार-प्रतिपादनं-न शक्यसंभवम्।

आचार्य महिमभट्टमते वस्तुनो रूपद्वयं भवति – सामान्यं विशिष्टं च। तत्र सामान्यरूपं जनसाधारणगोचरम् विशिष्टरूपञ्च केवलं प्रतिभावतां सत्कवीनां प्रत्यक्षम्।

---

१. तत्रैव १, ६।

२. शरीरं चेदलंकारः किमलंकुरुते परम्।
आत्मैव नात्मनः स्कन्धं क्वचिदप्यधिरोहति।। तत्रैव १, १३।

३. भूषणत्वे स्वभावस्य विहिते भूषणान्तरे।
भेदावबोधः प्रकटस्तयोरप्रकटोऽथवा।।
स्पष्टे सर्वत्र संसृष्टिरस्पष्टे संकरस्तयोः।
अलंकारान्तराणां च विषयो नावशिष्यते।। तत्रैव १, १४-१५।

अतो महिमानुसारं वस्तुनो विशिष्टस्वभाववर्णने स्वभावोक्त्यलंकारो भवति।[1] यतो हि तत्र सत्कविप्रतिभावशात् अर्थाः साक्षात् प्रत्यक्षायमाणा[2] भवन्ति। पदार्थस्य सामान्य स्वभावश्च अन्यालंकार-विषयो भवति।[3] एवं हि स्वभावोक्तिं स्वीकुर्वता कुन्तकमतं खण्डयता महिमभट्टेन प्रतिपादितम् यत् कुन्तकेन पदार्थस्य सामान्यरूपमेवावलोकितम्। न तु विशिष्टरूपम्। अत एव तेन (कुन्तकेन) स्वभावोक्तेरलंकारत्वं नाङ्गीकृतम्।

पदार्थस्य सार्वकालिकरूपवर्णने अर्थव्यक्तिगुणो भवति तथा तस्य जायमानरूपवर्णने स्वभावोक्तिर्जातिर्वालंकृतिर्भवतीति स्वीकुर्वाणेन भोजराजेन स्वभावोक्त्यलंकारः अङ्गीचक्रे।[4] "शृङ्गारप्रकाशे" वक्रोक्तौ, स्वभावोक्तौ रसोक्तौ च समस्तवाङ्मयं विभाजयता वक्रोक्तेर्भिन्नायाः स्वभावोक्तेः सत्ता स्वीकृता।

ध्वनि-प्रस्थापन-परमाचार्येण मम्मटेनापि--

"स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूप-वर्णनम्।"[5]

इति प्रतिपादयता स्वभावोक्त्यलंकारः स्वीकृतः।

आचार्यरुय्यकेण--

"सूक्ष्मवस्तुस्वभावस्य यथावद् वर्णनं स्वभावोक्तिः" इति स्वकीयं स्वभावोक्त्यलंकार-लक्षणं व्याख्यायता--"इह खलु स्वभाव-वर्णनमात्रं नालंकारः। तत्त्वे सर्वं काव्यमलंकारि स्यात्। न हि तत् काव्यमस्ति, यत्र वस्तुस्वभाववर्णनमात्रं न

---

१. कथं तर्हि स्वभावोक्तेरलंकारत्वमिष्यते।
नहि स्वभावमात्रोक्तौ विशेषः कश्चनानयोः।।
उच्यते वस्तुनस्तावद् द्वैरूप्यमिह विद्यते।
स एव सर्वं शब्दानां विषयः परिकीर्तितः।
अत एवाभिधेयं ते श्यामलं बोधयन्त्यलम्।।
विशिष्टमस्य यद्रूपं तत्प्रत्यक्षस्य गोचरम्।
स एव सत्कविगिरां गोचरः प्रतिभाभुवाम्।। व्यक्तिविवेके २, ११३-१६।

२. अर्थस्वभावस्योक्तिर्या सालंकारतया मता।
यतः साक्षादिवाभान्ति तत्रार्थाः प्रतिभार्पिताः। तत्रैव २, १२०।

३. सामान्यस्तु स्वभावो यः सोऽन्यालंकारगोचरः।
क्लिष्टमर्थमलंकर्तुमन्यथा को हि शक्नुयात्।। तत्रैव २, १२१।

४. नानावस्थासु जायन्ते यानि रूपाणि वस्तुनः।
स्वेभ्यः स्वेभ्यो निसर्गेभ्यस्तानि जातिं प्रचक्षते।।
अर्थव्यक्तिः स्वरूपस्य साक्षात्कथनमुच्यते।
अर्थव्यक्तेर्भूयं भेदमियता प्रतिपद्यते।
जायमानमियं वक्तिरूपं सा सार्वकालिकम्।। सरस्वतीकण्ठाभरणे ३, ४-५।

५. काव्यप्रकाशे १०, १११।

विद्यते। तदर्थं सूक्ष्मग्रहणम्। सूक्ष्मः कवयितृमात्रस्य गम्यः। अत एव तन्निर्मित इव यो वस्तुस्वभावः, तस्य यथावद् अन्यूनानतिरिक्तत्वेन वर्णनं स्वभावोक्त्यलंकारः इक्युक्तम्। अतो महिमभट्टमतं समर्थयता रुय्यकेण सूक्ष्मवस्तु-स्वभावस्य यथावद्वर्णने स्वभावोक्तिरङ्गीकृता।

महिमभट्टमनुसरता हेमचन्द्रेण वस्तुनः सामान्यस्वभावे अलंकार्यत्वं विशिष्टस्वभावे स्वभावोक्त्यलंकारत्वं स्वीकुर्वाणेन कुन्तकस्य पूर्वोक्तमते आपत्तिः प्रकटयाञ्चक्रे।

दण्डिमतानुकारिणा सुमतिना अमृतानन्दयोगिना--

"यद् यद् वस्तु यथावस्थं तथा तद्रूपवर्णनम्।
स्वभावोक्तिरिति ख्याता सैव जातिर्मता यथा।।"[१]

इत्येवं स्वभावोक्तिर्लक्षयाञ्चक्रे।

'अलंकारमहोदधौ'[२] नरेन्द्रप्रभसूरिणा, 'एकावल्याम्'[३] विद्याधरेण, प्रतापरुद्रयशोभूषणे'[४] विद्यानाथेन, साहित्यदर्पणे[५] विश्वनाथेन च स्वभावोक्तेरलंकारत्वं स्वीकृतम्।

अयमत्र निष्कर्षः – वक्रोक्तिवादिनोर्भामह-कुन्तकयोर्मते स्वभावोक्तेरलंकारत्वं नास्ति। किन्तु दण्डि-भट्टोद्भटरुद्रट-महिमभट्ट-भोजराज-मम्मट-रुय्यक-हेमचन्द्रा-मृतानन्दयोगि-नरेन्द्रप्रभसूरि-विद्याधर- विद्यानाथ-विश्वनाथादि मनीषिणां मते तदलंकारत्वं वरीवर्ति।

इदमत्रावधेयम्--

वागीशमहिता सर्वालंकारसामान्यरूपा काव्यजीवितत्वेन विवक्षिता वैदग्ध्य-भङ्गीभणितिस्वरूपा शुद्धयोगार्थप्रधाना आनन्दाभिनवमम्मटादिस्वीकृतमहत्त्वा इयमतिशयोक्तिः अलंकाराणां प्राणप्रदेति नात्र काचिद्विचिकित्सा परन्तु स्वभावोक्तेरलंकारत्वस्य अस्वीकरणं न समीचीनम्। कविप्रतिभावशात्

---

१. अलंकारसंग्रहे ५, १६-२०।
२. स्वभावोक्तिः पुनः सूक्ष्म-वस्तु सद्भाव वर्णनम्। ८, ८२।
३. वस्तुस्वभाव उद्धैर्यः स्यात् सूक्ष्मो यथावदेतस्य
यद्वा वर्णनमेषा कथिता कविभिः स्वभावोक्तिः।। ८, ७२।
४. स्वभावोक्तिरसौ चारु यथावद्वस्तु वर्णनम्। अ० प्रक०
५. स्वभावोक्तिर्दुरूहार्थस्वक्रियारूप वर्णनम्। २०, १२१।

सूक्ष्मवस्तु-स्वभावस्य यथावद् वर्णने स्वभावोक्तिरलंकारो भवत्येव। तत्र कविप्रतिभया समुत्पादितमनुकरणमूलकसौन्दर्यं चमत्कारावहं भवत्येव। यथा हि कमपि विकलाङ्गमवलोक्य लोको विषीदति परन्तु तस्यैव यथावदनुकर्तारमवलोक्य स एव प्रसीदति। अनुकर्ता पुरस्कृतो भवति, प्रशंसितो भवति; तथैव यथावद् वर्णयिता कविः कलावान् भवति, तस्य कला च प्रशंसिता भवति। स्वभावोक्तौ अनुकरणमूलकचमत्कारः सहृदय-हृदयसंवेद्यः उपेक्षणीयो भवितुं नार्हति।

अतः स्वभावोक्त्यलंकारः सर्वथा स्वीकार्य इति शम्।

चित्रालंकार - चित्रणम्

अलंकारशास्त्रे शब्दालंकारान्तर्गततया चित्रालंकारस्य विवेचनं प्राप्यते। तत्र चित्रस्य अलंकारत्वे किं बीजमित्यत्र अलंकार-निरूपकाः नैकमता दृश्यन्ते। अत्र चित्रशब्दस्य विभिन्नार्थाभिधायकत्वमेव मतभेदे चित्रालंकार-स्वरूप-भिन्नत्वे च कारणमिति विवेचका आमनन्ति।

'चायृ पूजा-निशामनयोः' इति भौवादिकचायतेः पृषोदरादित्वात् चित्रशब्दो निष्पद्यते। वेदे मन्त्रेषु[1] चायनीये-पूजनीये-इत्यर्थे चित्रशब्दो बहुधा प्रयुक्तो दृश्यते।

चायृधातोः निशामने-चाक्षुष-ज्ञानरूपेऽर्थेऽपि प्रयोगात् चित्रशब्देन चाक्षुष-ज्ञानविषयीभूतमालेख्यम्, आलेख्यस्य विस्मयजनकतया आश्चर्यञ्च अवगम्यते। अत एव 'आश्चर्यालेख्ययोश्चित्रम्' इति कोशानुसारेण चित्रशब्दस्य आश्चर्ये आलेख्ये च प्रयोगो भवति।

'विस्मयोऽद्भुतमाश्चर्यं चित्रम्' इत्यमरकोशे[2], 'चित्रमद्भुतमाश्चर्यं विस्मयः' इति हलायुधकोशे[3] च चित्रशब्दस्य समानार्थकतया अद्भुताश्चर्यविस्मयशब्दा निगदिताः सन्ति।

चित्रशब्दस्य वैदिकनिर्वचनाद् भिन्ना अपि अनेका व्युत्पत्तयो भवन्ति--

चित्र्यते इति (चित्र धातोः कर्मणि अप्) चित्रम्। चीयते इति (चिनोतेः कर्मणि क्त्रः) चित्रम्। चितम्-ज्ञानम् त्रायते इति (त्रायतेः आतोऽनुपसर्गे कः) चित्रम्। एवं हि चित्रशब्दस्य अनेकार्थकतया चित्रालंकार-प्रसङ्गे कमर्थमाश्रित्य आलंकारिकाः तमलंकारं लक्षयन्तीति अनुसन्धानीयम्।

अलंकारशास्त्रे प्रायः आचार्यरुद्रटः प्रथमं चित्रालंकारं लक्षयन् प्रतिपादयति--

भङ्ग्यन्तरकृत - तत्कर्म - वर्णन-निमित्तानि वस्तुरूपाणि।
साङ्गानि विचित्राणि च रच्यन्ते यत्र तच्चित्रम्[4]।।

---

१. इदं श्रेष्ठं ज्योतिषां ज्योति रागाच्चित्रः प्रकेतः-ऋग्वेद - १-८-१।
यदिन्द्र ! चित्र मेहनास्ति - तत्रैव ४-२-१०।
चित्रं देवानामुदगात् - तत्रैव १-८-७।

२. १-७-१६।

३. श्लोक संख्या ७४५।

४. काव्यालंकारे ५।१।

कारिकामिमां व्याचक्षाणेन नमिसाधुना--

"यत्र काव्ये वस्तूनां चक्रादीनां रूपाणि संस्थानानि रच्यन्ते निबध्यन्ते तच्चित्रसादृश्यात् आश्चर्याद् वा चित्रं नाम अलंकारः" इति प्रतिपादयाञ्चक्रे। एतेन वर्णानां क्रमविशेषेण सन्निवेशात् कमलादिवस्तूनामाकारस्य आलेख्यनिर्माणात्, उताहो चित्रस्य निर्माणाभावेऽपि अक्षरपङ्क्तीनां विशिष्टक्रमेण असाधारणतायाः परिलक्षितत्वेन आश्चर्यकारित्वाद्वा[1] चित्रालंकारो भवतीति विज्ञायते। उभयोर्मते चित्रालंकारे आलेख्याश्चर्यरूपयोरन्यतरत्वं बीजमिति निश्चीयते।

काव्ये रसादि-ध्वनेः प्राधान्यं मन्वानेन आनन्दवर्धनेन "रस-भावादि-तात्पर्य-रहितं व्यङ्ग्यार्थ-विशेष-प्रकाशन-शक्तिशून्यं च काव्यम्, केवल--वाच्य-वाचक-वैचित्र्य-मात्राश्रयेण उपनिबद्धालेख्यप्रख्यम्--यदाभासते तच्चित्रम्[2]" इति प्रतिपाद्यमानेन चित्रालंकारस्य बीजतया आलेख्यरूपतामेवाङ्गीकृत्य आश्चर्यरूपता निराकृता। तत्रैव अभिनवगुप्तेन लोचने आलेख्य-प्रख्यम् इत्यस्य रसादिजीवरहितं मुख्यप्रतिकृतिरूपम्[3] इत्यर्थः प्रतिपादयांचक्रे।

अत्रेदं ध्यातव्यम्--

रस-ध्वनि-प्रस्थानस्याचार्याः चित्रालंकार-घटक-चित्रशब्दस्य प्रवृत्ति-निमित्तम् प्रायेण आलेख्य-रूपं स्वीकृत्य चित्रालंकारं लक्षयन्ति।

तथा हि--आचार्यमम्मटः-

"तच्चित्रं' यत्र वर्णानां खड्गाद्याकृति हेतुता"[4] सन्निवेशविशेषेण यत्र न्यस्ता वर्णाः खड्ग-मुरज-पद्माद्याकारमुल्लासयन्ति तच्चित्रं काव्यमित्यर्थः। आचार्यरुय्यकोऽपि "वर्णानां खड्गाद्याकृतिहेतुत्वे चित्रमि"ति स्वकीये "अलंकारसर्वस्वे" चित्रालंकारं लक्षयति।

"काव्यवित्प्रवरैश्चित्रं खड्ग-बन्धादिलक्ष्यते" इति जयदेवः - "चन्द्रालोके" चित्रालंकारं निरूपयति – "पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते" इति। "प्रतापरुद्रयशोभूषणे" विद्यानाथोऽपि तथैव तमलंकारं प्रतिपादयति।

---

१. "अहो येन क्रमेण गता वर्ण-पक्तिः तेनैव क्रमेण प्रत्यागता इत्याश्चर्यकारित्वाद्वा चित्रम्" इति एकावल्याम् विद्याधरेण आश्चर्यस्य कारणं स्पष्टीक्रियते।

२. ध्वन्यालोके ३।४३ इति कारिकायाम्।

३. तत्रैव लोचने।

४. काव्यप्रकाशे नवमोल्लासे।

''साहित्यदर्पणे'' विश्वनाथेनापि तथैवानुसरता ''पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते'' इति न्यगादि।

एवमेव अन्येषामपि ध्वनिमार्गानुसारिणां चित्रालंकारलक्षणेषु आलेख्यत्वमेव मुख्याधारतया अवलोक्यते।

आलेख्यत्वेन सह वर्णानां सन्निवेश-विशेषात् यत् आश्चर्यकारित्वमनुभूयते तदपि तदलंकारस्य बीजमिति स्वीकुर्वाणा अपि अनेके रुद्रट- भोजराज वाग्भटादयः आचार्याः वर्तन्ते। तत्र भेद-प्रभेदैः सह भोजराजः चित्रालंकारं निरूपयति--

'वर्ण-स्थान-स्वराकार-गति-बन्धान् प्रतीह यः।

नियमस्तद्बुधैः षोढा चित्रमित्यभिधीयते।।[१] इति

एवं हि व्यञ्जनवर्णस्य उच्चारणस्थानस्य विभिन्नस्वरस्य, आकारस्य, गत-प्रत्यागत क्रमेण पठितिभङ्गविशेषरूपाया गतेः, सर्वतोभद्रादिबन्धस्य च नियमेन चित्रालंकारस्य षड्विधत्वं भवति। एतेषु प्रभेदेषु क्वापि आलेख्यत्वम् क्वापि च आश्चर्यकारित्वम्। अतो भोजराजमते उभयोः चित्रालंकारस्य बीजत्वम् इति सुस्पष्टम्।

भोजलक्षणं व्याचक्षाणेन रत्नदर्पणकारेण रत्नेश्वरमिश्रेण - ''चित्रमालेख्यम् तदिव जीवित-स्थानीय-ध्वनि-रहितं चित्रम् इति काश्मीरकाः।'' तदसत् ध्वनेः प्राधान्यानङ्गीकारात् प्रतीयमान-मात्राभावस्य क्वचिदपि असंभवात्। यद्वा आकृतिविशेषयुक्तं चित्रमिति तदपि न, अव्यापकत्वात्। अतो वर्णादिनियमेन प्रवृत्तमाश्चर्य-कारितया चित्रमित्येव युक्तम्, इत्येवं प्रतिपादयता उभयोः- आलेख्याश्चर्यकारित्वयोः-बीजत्वमिति स्पष्टीकृतम्।

भोजराजमतं समर्थयता उभयोर्बीजत्वं स्वीकुर्वता वाग्भटेनापि चित्रं लक्षितम्--

''यत्राङ्गसन्धितद्रूपैरक्षरैर्वस्तुकल्पना।

सत्यां प्रसत्तौ तच्चित्रं तच्चित्रं चित्रकृच्च यत्।।[२]

अर्थात् यत्र पद्य-बन्धे वस्तूनाम्-कमल-च्छत्र-मुरजादीनाम् अङ्गानाम्-दल-दण्डपट्टिकादीनाम् तथा अङ्गसन्धीनाम् रूपाणि अक्षर-विशेष-विन्यासेन तत्सदृशानि कल्प्यन्ते तत्र तद्रूपप्राप्तौ सत्याम् चित्रतया तत् चित्रम् भवति। तच्च चित्रम् दुष्करत्वेन कवि-प्रतिभा-विशेषप्रख्यापनात् चित्रकृत् आश्चर्यकारि भवति। एवमेव एक-व्यञ्जन-

---

१. सरस्वतीकण्ठाभरणे २।१०६।

२. वाग्भटालंकारे - ४।७।

सन्निवेशेन एक-स्वर-सन्निवेशेन वा पद्य-निर्माणेऽपि तत्पद्यं चित्रम् आश्चर्यजनकं भवति। एतादृशं कवि-कौशल-निबद्धं काव्यं चित्रालंकारयुक्तं जायते। -

अत्रेदं न शङ्कनीयम्–यत् भित्तिस्थकमलमुरजादिचित्रेषु यथा शब्दालंकारत्वं न भवति तथा लिप्यक्षर-विशेष-विन्यासेन निर्मितेषु कमल-मुरजादि-बन्धेष्वपि शब्दालंकारत्वं न स्यात्, लिप्यक्षराणां तेषां तु श्रोत्राकाश-समवेत-वर्णात्मकशब्दाभेदेन लोके प्रतीतेः शब्दालंकारत्वं निर्बाधम्। अत एव विश्वनाथेन "साहित्यदर्पणे" चित्रालंकार-प्रसङ्गे[1] –

"अस्य च तथाविध-लिपि-सन्निवेश-विशेषवशेन चमत्कारविधायिनामपि वर्णानां तथाविध-श्रोत्राकाश-समवाय-विशेषवशेन चमत्कारविधायिभिर्वर्णैः अभेदेनोपचाराच्छब्दालंकारत्वम्" इति स्पष्टीकृतम्।

एवमेव कुमारस्वामिना "प्रतापरुद्रीये"[2] रत्नापणव्याख्याने चित्रालंकार-प्रसङ्गे प्रश्नमिमं सम्भाव्य - "नच श्रावणानां वर्णानां पद्माद्याकारहेतुत्वं न घटते इति वाच्यम्, वर्णशब्देन तत्स्मारकाणां लिप्यक्षराणामाक्षेपात् तेषां मुख्यवर्णाभेदेन लोकव्यवहारादस्य शब्दालङ्कारत्वम्" इति समाहितम्।

नरेन्द्रप्रभसूरिणा "अलंकारमहोदधौ" लिप्यक्षराणामेव विन्यासेन न तूच्चार्यमाणानां वर्णानां श्रवणेन - पद्मादिरूपत्वे आलोकिते सति चित्रालंकारो भवतीति स्पष्टमुक्तम् –

"लिप्यक्षराणां विन्यासे खड्गपद्मादिरूपता।
यस्मिन्नालोक्यते चित्रा तच्चित्रमिति गीयते।।[3]

अयमत्र निष्कर्षः -

कवि-प्रतिभा-विशेषेण लिप्यक्षर-विशेष विन्यासात् यत्र कमल-मुरजादीनामाकृतीनां निर्मितिर्भवति तत्र आलेख्य-रूपतया, यत्र च वर्ण-विन्यासेन गत-प्रत्यागत-रूप-पठितिभङ्गविशेषाद् बन्धे चमत्काराधानं भवति तत्र आश्चर्यकारितया च चित्रात्मकः शब्दालंकारो भवति। भोजराजमते च एकव्यञ्जनविन्यासेन एक-स्वर-वर्ण-विन्यासेन चापि बन्धे चमत्कारः आधीयते, अतः तत्रापि आश्चर्यकारितया चित्रालंकारो भवतीतिशम्।

---

१. साहित्यदर्पणे - १०।१५ इति कारिकावृत्तौ।
२. प्रतापरुद्रयशोभूषण-रत्नायण - व्याख्याने।
३. १३-७-२१।

भोजराजस्य अलङ्कारशास्त्रीयचिन्तनम्

समराङ्गणसूत्रधार-रणरङ्गमल्लः सरस्वतीकण्ठाभरणशृङ्गारप्रकाश-राजमार्तण्डादि-विविध-विरुद-प्रोद्भासित-प्रचण्डभुजदण्डः परमभट्टारक-महाराजाधिराज-परमेश्वर-श्रीभोजदेवः अप्रतिम-प्रतिभा-भासमानः "प्रातर्दिनं सूच्यते" इति लोकोक्त्यनुसारं स्वबाल्यकाले एव अलोक-सामान्यं किमपि अनिर्वचनीयं वैशिष्ट्यं प्रकटयाञ्चकार।

महाराजसिन्धुराजस्य स्वर्गारोहणसमये भोजदेवः आसीत् पञ्चहायनः। तदानीं राज-लक्ष्मीमनुभूयमानः महाराजो मुञ्जराजः एकदा एकस्य दैवज्ञस्य मुखात्

"पञ्चाशत् पञ्चवर्षाणि सप्तमास-दिनत्रयम्।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः।।" इति

बालस्य भोजदेवस्य विषयिणीं भविष्यवाणीमाकर्ण्य महत्या चिन्तया समुद्विग्नमानसः भोजदेवं घातयितुं षड्यन्त्रं विरचयाञ्चकार। "अरक्षितं तिष्ठति दैवरक्षितम्" इतीश्वरीयविधानेन संरक्षितो भोजदेवः

"मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये चापि युधिष्ठिर-प्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती मुञ्ज ! त्वया यास्यति।।"

इति सत्य-सन्देशपद्यं मुञ्जराजं प्रति प्रेषयामास। पत्रं पाठं पाठं साश्रुवदनः विलपन् मुञ्जराजः मूर्च्छितः। वस्तुस्थितिं विज्ञाय स्वस्थः सन् भोजराजं राज्य-सिंहासनासीनं विधाय स्वयं राज्यलक्ष्मीतो विरतो बभूव। एतेन भाग्यशालिनोभोजराजस्य बुद्धिवैभवम् प्रत्युत्पन्नमतित्वञ्च विज्ञायते विज्ञैः।

राज्यप्रशासनं कुर्वन् भोजराजः षाड्गुण्य-प्रयोग-कौशलेन स्वराज्यं विस्तारयामास।

विविध शास्त्राध्ययन-जन्य-सर्वतन्त्रस्वतन्त्रतया

काव्यशास्त्रे - सरस्वती कण्ठाभरणम्, शृङ्गारप्रकाशः;

व्याकरणे - सरस्वतीकण्ठाभरणम्, शब्दानुशासनम्; भर्तृहरि-कारिका;

चिकित्साशास्त्रे - आयुर्वेदसर्वस्वम्, राजमृगाङ्कः विश्रान्तविद्याविनोदः, शालिहोत्रम्;

ज्योतिषे - आदित्यप्रतापसिद्धान्तः, राजमार्तण्डः, राजमृगाङ्ककरणम्, विद्वज्जन वल्लभप्रश्नज्ञानम्;

शैवदर्शने - सिद्धान्तसंग्रहः, तत्त्वप्रकाशः, शिवतत्त्वरत्नकलिका;

वास्तुशास्त्रे - समराङ्गण-सूत्रधारः, युक्तिकल्पतरुः;

धर्मशास्त्रनीतिशास्त्रयोः —चाणक्यनीतिः, चारुचर्या, व्यवहारसमुच्चयः, विविधविद्या चतुरा, सिद्धान्तसारपद्धतिः;

योगदर्शने – राजमार्तण्डनामिका योग सूत्रवृत्तिः;

वेदान्तदर्शने—राजमार्तण्डः।

नाममालिकाकोशः, चम्पूरामायणम्, विद्या-विनोदकाव्यम्, शृङ्गारमञ्जरीकथा, पारिजात-मञ्जरी, सुभाषितप्रबन्धः, कूर्मशतकम्, अवनिशतकम्, कोदण्डः, प्राकृतकाव्यम्, इत्यादीन् पञ्चाशतोऽप्यधिकान् विशिष्टान् ग्रन्थान्[1] विरचयामास। संस्कृत-प्राकृतभाषाकवीनां काव्यकोविदानां च सबहुमानं प्रचुरदानेन समादरं विदधत् संस्कृतविद्यायाः कमपि अपूर्वं प्रसारं प्रचारंचकार।

भोजराजस्य अलंकार-शास्त्रीय-ग्रन्थेषु "शृङ्गारप्रकाशः" निखिलविद्यारहस्यानां सकलकलास्वरूपाणां समस्त-काव्यौचित्यानाञ्च प्रकाशक इति स्वयमेव ग्रन्थकर्ता समुद्घोषयति[2]। किन्तु काव्यस्वरूपादि-चिन्तनन्तस्य "सरस्वतीकण्ठाभरणे" एव विशेषतः समुपलभ्यते। अतस्तेन तत्र विहितानि चिन्तनानि प्रकृते विश्लिष्यन्ते।

१. काव्यस्वरूपचिन्तनम्

भोजराजात् पूर्वम् अलंकारस्य विशिष्टेषु आचार्येषु भामह-वामन-भट्टोद्भट-रुद्रट-वाग्भटानन्दवर्धनाभिनवगुप्त-कुन्तकाचार्या विश्रुता आसन्। कश्मीराभिजना एते आचार्याः काव्यस्वरूपविषये ऐकमत्यमादधाना आसन्। एते 'सहितयोरेव शब्दार्थयोः

---

१. भोजराजीयग्रन्थभूमिकायां संस्कृतसाहित्येतिहासे च एतेषां विवरणं समुपलभ्यते इति नेह तद् वितन्यते। सरस्वतीकण्ठाभरणटीकाकृद्वाजडमहोदयानुसारम् "इह हि शिष्टशिरोमणि-निखिल-निरवद्य-निर्माणापूर्व-प्रजापति-प्रचण्डभुजदण्ड-पराक्रमार्जित-चतुरशीति-विरुद-प्रकाशित-स्वकृतग्रन्थसमाजः श्री भोजराजः....." डॉ० कामेश्वर नाथ मिश्र कृत सरस्वतीकण्ठा० भूमिका।

२. एतस्मिन् शृङ्गारप्रकाशे सुप्रकाश्यमेवाशेषशास्त्रार्थसंपदुपनिषदाम् अखिल-कला-काव्यौचित्य-कल्पना-रहस्यानां च संनिवेशो दृश्यते।

काव्यत्वं'' सयुक्ति स्वीकुर्वाणा आसन्। अग्निपुराणानुसारम् आचार्य दण्डी 'इष्टार्थबोधकं शब्दमेव काव्यं' मन्वान आसीत्।

शब्दः शब्दार्थौ वा काव्यम् इति निर्णयो विधीयताम् विपश्चिद्भिः, किन्तु उभयविधेनापि काव्येन निर्दोषेण, गुणवता, अलंकारैरलंकृतेन रसान्वितेनैव च भाव्यम् इति निर्दिशन् आलंकारिको भोजराजः काव्यलक्षणम् तत्प्रयोजनं च निम्नोक्तं प्रतिपादयाञ्चकार--

''निर्दोषं गुणवत् काव्यमलंकारैरलंकृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति।।[१]

एतेन कीर्ति-प्रीति-कामुकेन कविना शब्दात्मकं शब्दार्थोभयात्मकं वा काव्यं निर्दिष्ट-लक्षणानुसारेणैव कुर्वता अभीष्ट-फलमवाप्यते इति संसूच्यते। लक्षणेऽस्मिन् न कस्यापि विप्रतिपत्तिः इति विजानन्ति विपश्चितः।

२. गुण-चिन्तनम्

भरतमुनिः ''दोषा एव विपर्यस्ता गुणाः काव्येषु कीर्तिताः[२]।'' इति दोष-विपरीतत्वं गुणत्वमिति गुणं लक्षयित्वा--

''श्लेषः प्रसादः समता समाधिर्माधुर्यमोजः पदसौकुमार्यम्।
अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यस्य गुणा दशैते।।[३]

इति तस्य दशभेदान् न्यरूपयत्।

भामहः माधुर्यौजः प्रसादाः इति त्रीनेव गुणानङ्गीचकार। दण्डी वैदर्भमार्गस्य प्राणरूपान् भरतोक्तान् दशगुणान् स्वीचकार। आचार्यवामनस्तु दण्डिना स्वीकृतम् अलंकारस्य काव्यशोभाकर-धर्मत्वम् गुणस्य लक्षणं स्वीकृत्य अलंकारस्य गुणनिष्पन्न शोभाया अतिशय-हेतुत्वमङ्गीकृत्य दश शब्दगुणान् दश अर्थगुणाँश्च स्वीचकार। भट्टोद्भटः गुणालंकारयोर्भेदं गड्डरिकाप्रवाहमिव अमन्यत। आलंकारिकशिरोमणिः आनन्दवर्धनाचार्यः--

''तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।
अङ्गाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत्।।[४]''

---

१. सरस्वती कण्ठाभरणम् १।२।
२. नाट्यशास्त्रम् १७।६५।
३. तत्रैव १७।६६।
४. ध्वन्यालोकः २।७।

इत्येवं प्रतिपादयन् अङ्गिनो रसादिध्वनेराश्रिता गुणाः तथा अङ्गस्य आश्रिता अलंकारा भवन्तीति निरणैषीत्।

पूर्वोक्तानां विचाराणां मन्थनं विधाय भोजराजः वामनाचार्यमतमनुसरन्--

"अलंकृतमपि श्रव्यं न काव्यं गुण-वर्जितम्।
गुणयोगस्तयोर्मुख्यो गुणालंकारयोगतः।।[१]"

इति प्रतिपाद्य बाह्याभ्यन्तर-वैशेषिकरूपेण गुणस्य त्रैविध्यं स्वीकुर्वन् चतुर्विंशतिं शब्दाश्रितान् बाह्यान् तावत एव अर्थाश्रितान् आभ्यन्तरान् एतावत् संख्यकानेव दोषत्वेऽपि गुणत्वमापन्नान् वैशेषिकाँश्च गुणान् न्यरूपयत्। तत्र पद-वाक्य-वाक्यार्थरूपदोषाश्रितत्वात् वैशेषिक - गुणस्य द्वासप्ततिः प्रभेदा भवन्ति। भोजराज-प्रतिपादितान् एवंविधान् गुणान् मम्मटादयः नाङ्गीकुर्वन्तीति त्वन्यत्।

२. अलंकार-चिन्तनम्

अलंक्रियते अनेनेत्यलंकारः इत्यलंकार-स्वरूपं स्वीकुर्वणेन भोजराजेन शब्दस्य, अर्थस्य उभयोश्च अलंकरणात् अलंकारस्य त्रैविध्यं मन्यमानेन बाह्यालंकाररूपेण शब्दालंकारः, आभ्यन्तरालंकाररूपेण अर्थालंकारः बाह्याभ्यन्तरालंकाररूपेण उभयालंकारश्च अङ्गीक्रियन्ते। एतेषु जाति-गति-रीति-वृत्ति-च्छाया-मुद्राचित्रादिरूपेण शब्दालंकारः चतुर्विंशतिधा[२]।

भोजराजात् पूर्वम् अलंकारशास्त्रे अनुप्रास-यमक-श्लेष-चित्र-वक्रोक्तिरूपाः पञ्च शब्दालंकाराश्चर्चिता आसन्। एतेन वक्रोक्तिं विहाय अनुप्रास-यमक-श्लेष-चित्राश्चत्वारः पूर्वोक्ताः तथा जाति-रीति-वृत्तिच्छायादयः अन्येऽपि विंशतिः शब्दालंकाराः स्वीकृताः भेद-प्रभेदैः सह सोदाहरणं वर्णिताश्च। शब्दाश्रयत्वाद् विशिष्टशब्द-सापेक्षत्वाद् वा रीति-वृत्ति-प्रभृतीनामपि शब्दालंकारत्वं भवतीति भोजराजेन मन्यते। काव्ये यत् किमपि गुणादिकं वस्तु निरूप्यते तत् सर्वं शब्दसापेक्षमेवेति शब्दाश्रयत्वस्य शब्द-सापेक्षत्वस्य वा व्यभिचरितत्वात् तस्य शब्दालंकारप्रयोजकत्वं नास्तीत्यपरे।

अर्थालंकाराः शब्दार्थोभयालंकाराश्चापि चतुर्विंशतिः। तत्र अर्थालंकारेषु अहेतुः, अभावः, अर्थापत्तिः, आप्तवचनम्, उपमानम्, प्रत्यक्षम्, वितर्कः, संभवः, समाधिः

---

१. स० क० १।५६।
२. तत्रैव २।१-५।

इति नव नवीना एतेन उद्भाविता अर्थालंकाराः सन्ति। एतेन भोजदेवस्य गम्भीर-चिन्तनं संसूच्यते।

४. रीति-तत्त्व-चिन्तनम्

"वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः।
रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते।।"[1]

इत्येवं लक्षयता भोजराजेन प्रतिपाद्यते यत् वैदर्भादिकविभिः अनुसृतः पन्थाः काव्ये मार्ग इति कथ्यते। एतस्यैव मार्गस्य कृते 'रीयन्ते गच्छन्ति अनया' इति व्युत्पत्त्या रीतिशब्दोऽप्युच्यते एषा हि रीतिः वैदर्भी, पाञ्चाली, गौडीया, आवन्तिका, लाटीया तथा मागधीति षड्विधा।

रीतेः स्वरूपनिर्माणे भोजदेवेन वामनानुसारेण गुणस्य रुद्रटानुसारेण समासस्य च आधारत्वं स्वीकृतम्। एतन्मते पाञ्चाली-वैदर्भ्योरन्तरालवर्तिनी आवन्तिका रीतिः आरब्धायाः कस्याश्चिद् रीतेरग्रे अनिर्वाहे सति मागधी नाम खण्डरीतिश्च भवति। भोजराजस्य रीतिविषयकं चिन्तनं रीतेर्निरूपणञ्च पूर्वाचार्यापेक्षया अधिकं स्पष्टम्[2]। रीतेः शब्दालंकारत्वं स्वीकुर्वाणेन एनेन वामनाचार्यस्य रीतेरात्मत्वम्, षड्विधत्वमङ्गीकुर्वाणेन च भामह-दण्डिनोः काव्यमार्गस्य द्विविधत्वम्, वामनस्य त्रिविधत्वं रुद्रटस्य च चतुर्विधत्वम् अनादृतम्।

५. वृत्त्यलंकार-चिन्तनम्

चेतसः विकासे, विक्षेपे, संकोचे, विस्तारे च प्रयोजिका रस-विषयक-व्यापार-रूपा वृत्तिः कैशिकी, आरभटी, भारती, सात्त्वती, मध्यमारभटी तथा मध्यम कैशिकीति भेदेन षड्विधा भवति भोजराजमते।

काव्ये दीप्त-कोमल-मध्यमभेदेन त्रिविधस्य वर्ण्यविषयस्य वैचित्र्यात् चेतसः विकासाद्याः चतस्रः अवस्था जायन्ते। तत्र रजस्तमसी अभिभूय यदा सत्त्वगुणस्य उद्रेको भवति तदा तन्मयीभवनयोग्यं चेतो विकसति, आनन्दमयसंविद् विश्रान्तिं च आसादयति। एतस्माद् रसविषयककैशिकीरूपाद् व्यापारात् शृङ्गारः तद्भूमिकः हास्यश्च अनुभूयते।

---

१. तत्रैव २।२७-३३।
२. तत्रैव २।३४-३८।

सत्त्वात्मकविकासात् प्रच्युतम् अप्राप्तगुणान्तर-प्रादुर्भावं चेतः विक्षिप्तमुच्यते। एतद्दशायाम् समुचित-विभावादिमहिम्ना आरभटीरूपाद् रसविषयकव्यापारात् रौद्रः तद्भूमिकः करुणश्च अनुभूयते।

यदा सत्त्वतमसी अभिभूय केवलं रजोमयं चेतो भवति तदा बहुमुख-व्यापारोन्मेषात् विस्तारमासादयति। एतद्दशायाम् सात्त्वतीरूपाद्-रस-विषयक-व्यापारात् वीरः तद्भूमिकः अद्भुतश्च अनुभूयते।

न्यग्भूतगुणान्तरस्य प्रबुद्धतमसश्चेतसः अवस्था-विशेषः संकोचो भवति। एनमालम्ब्य बीभत्सः तद्भूमिकः भयानकश्च अनुभूयते। अत्र बीभत्से आरभटी भयानके भारती वृत्तिः। रस-प्रकाशस्य यानि कारणानि सन्ति तेषु शब्दस्यैव प्राथम्यमस्तीति मन्यमानो भोजदेवः वृत्तेः शब्दालंकारत्वं कल्पयति। नाट्यशास्त्रादौ वृत्तेश्चतुर्विधत्वमेव प्रतिपाद्यते।

६. चित्रालंकार-चिन्तनम्

चित्रालंकारस्य शब्दालंकारत्वं सर्वैः स्वीक्रियते। किन्तु चित्र-विषये भोजराजस्य चिन्तनं सर्वातिशायि वर्तते। महर्षियास्कः निरुक्ते अनेकत्र वेदे-प्रयुक्तं चित्रशब्दं व्याचष्टे – चित्रं चायनीयम्-पूजनीयम्। एतेन चित्रं काम्यं भवतीत्यवगम्यते। 'आश्चर्यालेख्ययोश्चित्रम्' इत्यमरकोशानुसारेण चित्रस्यार्थो भवति – आश्चर्यम् आलेख्यञ्च।

शब्दालंकाररूपस्य चित्रस्य स्पष्टं निरूपणं कुर्वाणेन रुद्रटेन प्रतिपादितम् यत् काव्ये यत्र वस्तूनां रूपाणि आलेख्यमयानि - कमल - खड्ग - मुरजाकाराणि, वर्णक्रमविन्यासात् आश्चर्य-जनकानि च विरच्यन्ते तत्र चित्रसादृश्यात् आश्चर्याद् वा चित्रं [1]नाम अलंकारो- भवति। अयमाशयः - कुत्रचिद् वर्णानां विशेषक्रमेण विरचनात् कमलादिवस्तु-रूपं स्पष्टं प्रतीयते, कुत्रचिच्च वर्ण-पंक्तिनां विशिष्टक्रमेण विरचनात्-कस्यचिद् रूपस्य निर्माणाभावेऽपि- असाधारणता परिलक्ष्यते। यथा–

"सार मानवरारोहा नगेभागमना हि या।
याहि नामग भागेन हारोरा वनमार सा।।"

इत्यादौ येन क्रमेण आरोहः तेनैव क्रमेण अवरोह इत्याश्चर्यम्। अतः वर्ण- विन्यासाद् रूपनिर्माणेन आश्चर्यकारित्वेन च चित्रत्वम्।

---

१. काव्यालंकारः ५।१।

आनन्दवर्धनेन--

"चित्रं शब्दार्थ-भेदेन द्विविधं च व्यवस्थितम्।

तत्र किंचिच्छब्दचित्रं वाच्यचित्रमतः परम्।।[1]

इति कारिकां व्याचक्षाणेन "केवल वाच्य-वाचक-वैचित्र्यमात्राश्रयेण उपनिबद्धम् आलेख्यप्रख्यं यदाभासते तच्चित्रम्" इति चित्रस्य आलेख्यरूपत्वमेव स्वीकृतम्। अभिनवगुप्तेनापि "लोचने" "रसादिजीवरहितं मुख्य-प्रतिकृतिरूपम्" इति तथैव व्याख्यातम्।

भोजराजेन चित्रालंकार-वर्णन-प्रसङ्गे व्यञ्जनवर्णानाम् कण्ठताल्वादिस्थानानाम्, अकारादिस्वराणाम्, पद्माद्याकाराणाम्, पठिति-भङ्ग-विशेषगतीनाम्, चक्रादिबन्धानाञ्च नियमेन विरचनात् चित्रालंकारस्य षड्विधत्वं स्वीकुर्वता चित्रस्य आलेख्यरूपत्वम् आश्चर्यजनकत्वं काम्यत्वञ्च अङ्गीकृतम्।

७. रस-चिन्तनम्

भोजराजस्य रस-चिन्तनम् विशिष्टं महत्त्वमादधाति। 'सरस्वतीकण्ठाभरणे' सामान्यतया 'शृङ्गारप्रकाशे' च विशेषतया एतेन रस-निरूपणं विहितम्–

रसोऽभिमानोऽहंकारः शृङ्गार इति गीयते।

योऽर्थस्तस्यान्वयात् काव्यं कमनीयत्वमश्नुते।।[2]

इत्येवं प्रकारेण रसं निरूपयतो भोजराजस्य मते अभिमानाहंकारस्वरूपः शृङ्गार एव रसः यस्य सम्बन्धात् काव्यं कमनीयं भवति। एतत् स्पष्टयता टीकाकारेण भट्टनृसिंहेन प्रतिपाद्यते --'येन रस्यते, येन अनुकूलवेदनीयतया दुःखमपि सुखत्वेन अभिमन्यते, येन रसिकैरहंक्रियते, येन शृङ्गम् उच्छ्रयोरीयते स खलु तादृशोऽस्ति" इति। अत एव--

"शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत्।

स एव चेदशृङ्गारी नीरसं सर्वमेव तत्।।[3]

---

१. ध्वन्यालोकः ३।४३।

२. स० क० ५।१।

३. तत्रैव ५।३।
द्रष्टव्या काव्यालमीमांसा पृ० ५७-५८, ६८-६६।

इत्युद्घोष्यते। एतन्मते अयमेव रसराज-शृङ्गारः एकः प्रकृतो रसः अन्ये च तद्विकृताः--

शृङ्गार-वीर-करुणाद्भुत-रौद्र-हास्य-
बीभत्स-वत्सल भयानक-शान्त-नाम्नः।
आम्नासिषुर्दशरसान् सुधियो वयन्तु
शृङ्गारमेव रसनाद् रसमामनामः।।
वीराद्भुतादिषु च येह रस-प्रसिद्धिः
सिद्धा कुतोऽपि वटयक्षवदाविभाति।
लोके गतानुगतिकत्ववशादुपेता-
मेतां निवर्तयितुमेष परिश्रमो नः।।[1]

भोजराजात्पूर्वम् "नाट्यशास्त्रे" भरतेन शान्तरसस्य, अभिनवगुप्तानुसारेण, प्रकृतित्वम् अन्येषाञ्च तद्विकृतित्वं प्रतिपाद्य शृङ्गार-रौद्र-वीर-बीभत्सानां चतुर्णाम् प्रकृतित्वम् हास्य-करुणाद्भुत-भयानकानां क्रमशः तद्विकृतित्वं च निरूपितम्।[2] महाकविना भवभूतिना "उत्तररामचरिते" करुणस्यैव प्रकृतिरूपेण एकरसत्वमङ्गीकृतम्। दशरूपककारेण धनञ्जयेन भरतमुनेर्मतं समर्थितम्।[3]

भोजराजेन विविधाभिर्वाचोयुक्तिभिः अहंकार-शृङ्गारस्यैव प्रकृतरसत्वं स्वीचक्रे। एतन्मते शृङ्गारी हि रमते, उत्सहते, हसति, विस्मयते, जुगुप्सते, शोचति, बिभेति, शाम्यति, स्निह्यति, गर्वायते, अभिमन्यते इति हेतोः शृङ्गारस्यैव इमे हास्यादयः विकृतरूपा इति।

इदमत्रावधेयम्-- भोजराजमते महत्तत्त्वाज् जायमानः मानवे विद्यमानः अहंकार एव शृङ्गाररूपतां धत्ते। तस्मिन् अहंकारे सत्येव कोऽपि रसोऽनुभूयते। अतः अहंकार शृङ्गारस्यैव प्राधान्यम्।

पूर्वोक्त-विषय-पर्यालोचनेन भोजराजस्य अलंकारशास्त्रीय-चिन्तनं सर्वत्र किमपि विशिष्टमेव परिलक्ष्यते इतिशम्।

---

१. शृङ्गार प्रकाशः १। ५-६।
२. नाट्यशास्त्रम् ६।३६।
३. दशरूपकम् ४।४३-५।

काव्य-श्रवणात् परं रस-निष्पत्ति-पर्यन्तं समेपक्षितकालस्य विमर्शः

मिथिला-मही-मण्डल-मण्डनेन पद-वाक्य-प्रमाण-पारावारीणेन 'काव्य-प्रकाश'-विवरण-कारेण महामहोपाध्याय-गोकुलनाथोपाध्यायेन अलौकिक-काव्य-रसास्वाद-विवेचन-प्रकरणे स्वकीये विवरणे काव्य-श्रवणात् परं रस-निष्पत्ति-पर्यन्तं क्रमेण एकादशक्षण-कालः समपेक्षितो-भवतीति प्रतिपादयाञ्चक्रे।

तथा हि--

> "शून्यं वास-गृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः
> निद्रा-व्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
> विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
> लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता।।"

एतस्यैव संक्षिप्तरूपम्--

> "चुम्बन्ती शनकैः कान्तं निद्राव्याजमुपागतम्।
> ज्ञात्वा नतमुखी बाला हसता तेन चुम्बिता।।"

इत्यादिकाव्य-श्रवणानन्तरम्--

प्रथमेक्षणे – श्रुतपदानामाकाङ्क्षादि-विशिष्टमनुसन्धानं जायते।

द्वितीयेक्षणे- समुपस्थितानां पदार्थानां स्मरणं भवति।

तृतीयेक्षणे-कर्तृ-कर्म-क्रियानुसन्धानपूर्वक-समस्त-वाक्यार्थ-बोधे- निद्राव्याजोपागताभिन्न-कान्त-कर्मकस्य शनैश्चुम्बनस्य कर्त्री कान्त-व्याज-ज्ञानानतमुखी बाला हसदभिन्न-कान्त-कर्तृक-चुम्बनकर्मेति रूप-वाक्यार्थः प्रतीयते।

चतुर्थक्षणे-(क) कान्त-बाला-पदाभ्यां प्रकरणाद्युपस्थितौ विशिष्ट-नायक-नायिकारूपौ आलम्बन-विभावौ;

(ख) शून्यवाससदनेन उपस्थितः उद्दीपन-विभावः;

(ग) नायिकाकृत-चुम्बनम्, मुखनमनम्, नायक-कृतमुख-चुम्बनञ्च आङ्गिकानुभावः;

(घ) रोमाञ्चः सात्त्विकानुभावः;

(ङ) चुम्बनेन औत्सुक्य-हर्षौ, शनकैरिति शङ्का, निद्रया कैतवम्, ज्ञात्वेति मतिः, मुख-नमनेन लज्जा, हासेन हर्षः, प्रियकृत-चुम्बनेन औत्सुक्यम् इत्येवं विधा व्यभिचारि-भावाः; इत्येवं प्रकारेण आलम्बनोद्दीपन-विभावानुभाव-सात्त्विकभाव-व्यभिचारि-भावानां स्मरणं जायते। तदेव काव्य-वैचित्र्यम्।

पञ्चमेक्षणे- विभावानुभाव - व्यभिचारि-सहकृत-वाक्यार्थः। तथा हि – निद्राव्याजोपागत-कितव-कान्त-कर्मक-शनैश्चुम्बनकर्त्री शङ्कौत्सुक्य-हर्षवती कैतव-ज्ञान-प्रयोज्य-मुखनमन-कर्त्री मति-लज्जावती बाला हसदभिन्नेन हर्षवता उत्सुकेन कान्तेन चुम्बितेति व्यञ्जनाभिधा-व्यतिकरेण वाक्यार्थानुभवस्य उल्लासो जायते। अस्मिन् काव्यारोहात्मके वाक्यार्थानुभवे प्रकरणोपस्थितविशिष्टकान्तत्वकान्तात्वाभ्यां विभावौ, तद्वदनयोः संयोगत्वेन चुम्बनम् कान्तेन सह सपदि संगच्छेयेत्याकारेण औत्सुक्यम्, मास्मजागरीत् कान्तः इति शङ्का, कितवकान्तः मद्भावमज्ञासीत् इति मतिः, असमञ्जसं-कान्तेन मद्भाव-परिज्ञानमिति लज्जा, प्रसभमनया विदितभावया संगच्छेयेत्यौत्सुक्यं च विशेषाकारेण अवगम्यते। अस्मिन् वैयञ्जनिक वाक्यार्थ-बोधे वाक्यार्थ इव वाक्यमपि भासते एव, आलोक-घटयोरिव व्यङ्ग्य-व्यञ्जकयोः वाक्यतदर्थयोरेक - बुद्ध्यनुप्रवेश-ध्रौव्यात्।

षष्ठेक्षणे – वाक्य-वाक्यार्थयोरुभयोर्भासनात् वाक्यगताः शब्दालङ्काराः वाक्यार्थगता अर्थालंकाराश्च स्वदन्ते। मूद्धिर्न वर्गान्त्यग-स्पर्शादि-वर्णैश्चित्ते द्रवीभावश्च जन्यते। यतो द्रुतेन चेतसा रत्यादेराह्लादकत्वं नाम गुणो विषयीकरिष्यते। ते एते शब्दार्थ-चमत्काराः काव्य-श्रवणादनन्तरे षष्ठे क्षणे भुज्यन्ते।

सप्तमे क्षणे – पूर्वोत्पन्न-काव्याद्यारोहस्वरूप-साधारणीकरण-व्यापार-सहकृतेन शब्दार्थालङ्कार-चमत्कारौ आस्वादयता द्रवता च चित्तेन साधारणीकृता विभावानुभाव-व्यभिचारिणः प्रतिसन्धीयन्ते।

एतस्मिन् सप्तमे क्षणे साधारणीकरण-व्यापार-महिम्ना समुद्रिक्तसत्त्वेन चित्तेन विशिष्टकान्तत्व-कान्तात्वादिपरिच्छिन्न - धर्म- परिहारेण जुगुप्साद्यभिव्यञ्जन-स्त्रीपुंस-व्यञ्जन-घटित-नायकत्वादि-तिरोभावेन विभावाः साधारण्येन प्रतीता भवन्ति।

चुम्बन-मुखनमन-द्वितीय-चुम्बनादयोऽनुभावास्तु रागेङ्गितत्व-कुट्टमितत्त्व-प्रगल्भत्वादिना, शङ्कौत्सुक्यादयश्च विषय-विशेष-परिहारेण साधारणतया स्मर्यन्ते। अत्रैव विभावादिभिः सह अनुभवितुः प्रियत्व-द्वेष्यत्वोदासीनत्व-सम्बन्ध-विशेष-स्वीकार-परिहारयोरभावो जायते।

अष्टमेक्षणे – भावास्वादात्मक - काव्यार्थः अनुभूयते। तथाहि--प्रकृते- ''चुम्बन्ती शनकैः कान्त''मित्यत्र वाम्याभिजात्य-हाववती प्रगल्भ-कितवं चालम्ब्य लज्जितोत्सुका कुट्टमितवती चेत्येकः वाम्यहावादिमतीम् आलम्ब्य उत्सुक-हृष्टश्च प्रगल्भः इत्यपरः काव्यार्थः यौगपद्येन स्वदते।

नवमेक्षणे – अत्रैव स्थायि-भाव-स्मरणम्।

दशमेक्षणे – स्थायिभावास्वादः, अर्थात् अत्र स्थायि-भावः अभिव्यक्तो भवति। अत्रैव उभयोर्नायक-नायिका-रूपयोर्विभावयो रती युगपत् आस्वाद्येते।

एकादशेक्षणे – पानकरस-न्यायेन अलौकिकरसास्वादः।

तथाहि-आस्वादगोचरानर्थान् उपादाय तथाविधविभावानुभाव-व्यभिचारि-भावसम्पन्ने परस्पर-रतिमदालम्बिते रती इति चर्वणा। अत्रैव वस्तुतः सहृदय-हृदयस्य स्थायि-भावस्य अभिव्यक्तिः रस-निष्पत्तिरिति।

अयं हि अलौकिक-रसास्वादः आस्वादक-प्रकर्षबलात् अधिकाधिककालं यथानुभवमवतिष्ठमानो निखिलैरेव चमत्कारास्वादादिभिः सह विरमति। संख्याजनकापेक्षा-बुद्धीनां प्रयोजनानुरोधेन त्रिक्षणावस्थायित्वमिव काव्य-प्रयोज्यास्वाद परम्पराणामधिकाधिक-काल-व्यापकत्वमविरुद्धम्। स्थायि-भावस्य वैयञ्जनिकबोधे व्यञ्जकस्य विभावादेर्भानाय रस-निष्पत्ति-पर्यन्तं तदवस्थानमावश्यकमितिशम्।

भर्तृहरेः सूक्ष्मेक्षिका

भर्तृहरेरतिमधुरां निपीय सूक्तिं सुधामयीं ललिताम्।
विबुध ! विनोदय चित्तं भावय नित्यं तदर्थमतिपथ्यम्।।[१]

सांसारिक-पदार्थानां सूक्ष्मदर्शनात् दृष्टवस्तूनाञ्च समुचित-ललित-सन्निवेश-चारुणा शब्दार्थयुगलेन वर्णनाच्च प्रातिभज्ञानसम्पन्नो व्युत्पत्ति-निपुणो निरन्तराभ्यासशीलो मनीषी एव कश्चित् [२]कवि-पदवीं लभते।

भर्तृहरेरुपलब्धासु स्वल्पास्वपि रचनासु जागतिक-पदार्थानां सूक्ष्मावलोकनम्, मानवजीवनस्य हृदय-ग्राहि-वास्तविक-चित्रणम्, रसायमानं सदुक्तिवचनामृतञ्च अद्यापि जनमानसं चमत्कुर्वन्ति समाह्लादयन्ति च। तेन गुम्फिताः शब्दार्थाः अनायासेनैव हृदये निविशन्ते स्थायि-प्रभावं च समुत्पादयन्ते।

भर्तृहरेः सूक्ष्मेक्षिका - निदर्शनात् पूर्वम् एतस्य परिचयस्य प्रतिपादनं परमावश्यकम्। यतो हि संस्कृत-वाङ्मयेतिहासे भर्तृहरित्रयी प्रसिद्धा। तथा हि एकः –

१. भट्टिकाव्यप्रणेता भट्टि - भर्तृहरिः -

विद्वज्जन-वल्लभस्य वलभीनरेन्द्रस्य श्रीधरसेनस्य सभारत्नेन एकेन महावैयाकरणेन श्रीधरस्वामि-तनूजेन प्रसिद्धभट्टिनामकेन भर्तृहरिणा ख्रिष्टीय-सप्तम-शतक-पूर्वार्द्धे व्याकरण-प्रधानं रावणवधाख्यं भट्टिकाव्यं व्यरचयाञ्चक्रे[३]।

भट्टिकाव्यस्य व्याख्याकारेषु काव्य-प्रणेतुर्नाम केनचित् 'भट्टि'[४] इति, केनचित् 'भर्तृहरि'[५] इति च उल्लिखितम्। सर्गान्त-वाक्येषु च क्वापि भट्टिकृतम्, क्वापि च

---

१. लेखकस्यैव।

२. नानृषिः कविरित्युक्तम् ऋषिश्च किल दर्शनात्।
अपूर्वभावधर्मांशतत्त्वप्रख्या च दर्शनम्।।
स तत्त्वदर्शनादेव शास्त्रेषु प्रथितः कविः।
दर्शनाद् वर्णनाच्चाथ रूढालोके कविश्रुतिः।।
काव्यकौतुके भट्टतौतः।

३. काव्यमिदं विहितं मया वलभ्यां श्रीधरसेननरेन्द्रपालितायाम्।
कीर्तिरतो भवतान् नृपस्य तस्य क्षेमकरः क्षितिपो यतः प्रजानाम्।। भट्टिका० २२।३५।

४. "श्रीधरस्वामिसूनुः कविर्भट्टिनामा राम कथाश्रय--
महाकाव्यं चकार" इति जयमङ्गलः हरिहरश्चः।

५. "अत्र तावन्महामहोपाध्याय श्रीभर्तृहरिकविना शब्दकाण्ड....." इति कन्दर्प चक्रवर्ती।
"अत्र कविना श्रीधरस्वामिसुनुना भर्तृहरिणा सर्गबन्धः" इति नारायणविद्याविनोदः।
"भर्तृहरिनामाकविः श्रीरामकथाश्रयं महाकाव्यं चकार" इति भरतः।

भर्तृहरिकृतम् इत्युल्लेखः समुपलभ्यते। एतावता सद्धेतुभिरनुमीयते यत् कविर्भट्टिः भट्टिस्वामी वा असाधारणवैयाकरणतया औपाधिकेन भर्तृहरीतिनाम्ना प्रख्यातिमलभत।

वलभी-नरेन्द्रेषु श्रीधरसेनेतिनाम्ना प्रसिद्धेषु चतुर्षु कतमस्य सभां कविर्भट्टिरयमलञ्चकारेति विवादास्पदम् विद्यते। इत्सिङ्गमहोदयस्य ६९१ इति ख्रिष्टीयवत्सरस्य यात्रा-विवरणेन विज्ञायते यत् ततः चत्वारिंशतो वर्षेभ्यः पूर्वम् ६५१ इति वर्षे वलभ्यां कश्चिद् वैयाकरणः भर्तृहरिर्दिवं जगाम। जनश्रुत्याधारेण निर्दिष्टस्य एतत्समयस्य प्रामाण्येन अयं भट्टि-भर्तृहरिः श्रीधरसेनचतुर्थस्य समसामयिकः ख्रिष्टीय-सप्तमशतक-पूर्वार्द्धे भारतभुवमलंचकारेति ज्ञायते।

परन्तु-

> व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम्।
>
> हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया।।[1]

इति भट्टि-मतमाक्षिपता भामहाचार्येण

> "काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्।
>
> उत्सवः सुधियामेव हन्त दुर्मेधसो हताः।।[2]

इत्यादिना उपर्युक्तभट्टिश्लोकः संकेतितः। एवं हि षष्ठशतके विद्यमानेन भामहेन संकेतितस्य भट्टिकाव्यस्य तत्पूर्ववर्तित्वं नितरां सिद्ध्यति। अतः इत्सिङ्गयात्राविवरण-निर्दिष्टकालस्य (६५१ इति वर्षे कश्चिद् भर्तृहरिनामा वैयाकरणः दिवं जगाम इति कथनस्य) जनश्रुत्याधारतया सन्दिग्धप्रामाण्येन भट्टिभर्तृहरिः श्रीधरसेनद्वितीयस्य[3] सभामलंकुर्वन् षष्ठशतक-पूर्वार्द्धे एव भारतभुवं भूषयामास इति निश्चीयते।

2. महाभाष्यदीपिका-वाक्यपदीयप्रणेता भर्तृहरिः -

पद-वाक्य-प्रमाण-पारावारीणेन पातञ्जल-महाभाष्य-रत्नाकरावगाहन-निपुणेन व्याकरणदर्शन-प्रतिपादनचतुरेण महावैयाकरणेन आचार्यवसुरातशिष्येण अपरेण भर्तृहरिणा महाभाष्यदीपिका-भागवृत्ति-स्वोपज्ञटीका सहितवाक्यपदीयग्रन्थरत्नानि प्रकाशयाञ्चक्रिरे। अयं हि भर्तृहरिः भट्टिभर्तृहरेर्भिन्न एवेति अधस्तनकालविचारेण निश्चीयते।

---

१. भट्टिकाव्ये २२।३४।

२. भामहालंकारे २।२०।

३. श्रीधरसेनद्वितीयस्य एकस्मिन् शिलालेखे एकस्मै भट्टिनाम्ने विदुषे भूमिदानस्योल्लेख्योऽप्यस्ति।

"शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः"[1] इति सूत्रस्य काशिकावृत्तौ 'वाक्यपदीय'मित्युदाहरणात् काशिकाकालात् (६२५-६५०) भर्तृहरेः पूर्ववर्तित्वम्।

काशिकातो बहोः कालात् पूर्वं द्वितीयचन्द्रगुप्तस्य (३८०-४१३) समये विद्यमानस्य "अष्टाङ्गसंग्रह"- टीकाकारस्य वाग्भटस्य शिष्येण इन्दुना 'उत्तरतन्त्रे' भर्तृहरेः –

"संयोगो विप्रयोगश्च साहचर्यं विरोधिता।[2]
.... विशेषस्मृतिहेतवः।।"

इत्यादि-श्लोकद्वयस्य उद्धरणात् इन्दु-वाग्भटाभ्यां भर्तृहरेः प्राचीनत्वं सिद्ध्यति। एवञ्च 'वाक्यपदीय' कारस्य भर्तृहरेः समयः ख्रिष्टीयचतुर्थशतकात् परं भवितुं नैवार्हति। अतोऽयं भर्तृहरिः भट्टि-भर्तृहरेर्भिन्नः।

३. शतकत्रय-रचयिता भर्तृहरिः

लोकद्वयसाधन-चातुरीचुञ्चुना नीति-शृङ्गार-वैराग्य-शतकत्रयी-प्रणयन-प्रख्यात-कौशलशालिना कविशिरोमणिना भर्तृहरिणा उज्जयिनीनृपतेर्विक्रमादित्यस्य समये ख्रिष्टपूर्व प्रथमशतके एव भारतवसुन्धरा भूषयाञ्चक्रे इति केचन ऐतिहासिका आमनन्ति तथा भर्तृहरि-त्रितये अमुमेव भर्तृहरिं प्राचीनतमं कथयन्ति।[3]

अयं हि भर्तृहरिः उज्जयिनीनरेश-विक्रमादित्यस्य ज्यायान् भ्राताऽऽसी-दित्यधस्तनानुश्रुत्या विज्ञायते –

"ब्राह्मण्यामभवद् वराहमिहिरो ज्योतिर्विदामग्रणी-
राजा भर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत्।
वैश्यायाममरश्च शङ्कुककृती शूद्रात्मजायामभूत्
पञ्चासन् गुणिनो बुधाः कृति-शिवस्वामि-द्विजास्यात्मजाः।।[4]

---

१. पा० सू० ४।३।८८।

२. वाक्यपदीये २।३१५-३१६।

३. अस्यैव स्मारिका संस्थापितास्ति - भर्तृहरि - स्मारक-समितिः। समित्या प्रकाशितम् सूचनापत्रम् - "भर्तृहरिरेवात्र जाज्वल्यमानं प्रमाणम्। तस्य समाधेरुपरि द्विसहस्रवर्षेभ्योऽखण्डज्योति श्चकास्ति विद्योतमानम्। भर्तृहरेः सा खलु प्रखर-वाणी धनमोहान्धानद्यापि धिक्करोति, न्यक्करोति च सत्तामदोद्धतान्, आश्वस्तयति च तदनुनयाश्रितान् विद्वत्कल्पान्" इति भर्तृहरिविषयकोद्घोषः नीतिशतक-प्रणेतारमेव भर्तृहरिं निर्दिशति।

४. काश्यामधीयानः प० व्रजविहारिझाशर्मणो मुखात् श्लोकमिमं श्रुतवान्।

ऐतिहासिक-निर्भ्रान्त-प्रमाणाभावेऽपि विक्रमादित्यस्य नवसु सभारत्नेषु[1] वराहमिहिरामरसिंह-शङ्कुकानामवस्थानम् उपर्युक्तार्थं सत्यापयति। अतः भर्तृहरिः पूर्वम् नृपतिरासीत्, पश्चात् घटना[2]-विशेषेण सम्प्राप्तनिर्वेदः परित्यज्य राज्यम् गोरक्षपथमन्वसरत्। ततः विक्रमार्कः उज्जयिनी-राज्यसिंहासनमारुरोह। हरिहररचित-भर्तृहरिनिर्वेदनाटकस्य कथानकादपि वृत्तान्तस्यास्य समर्थनं भवति। ''राजा भरथरी ''त्येतत् चलचित्रमपि इदमेव कथानकमाधारीकरोति। राज्यसिंहासनं विभूषयन्नेव भर्तृहरिः पूर्वं 'शृङ्गारशतकम्'' ततः ''नीतिशतकम्'' विरचयाञ्चकार। निर्वेदात् तत्त्वज्ञानमवाप्य'' वैराग्यशतकं'' प्रणिनाय।

भर्तृहरेः सूक्ष्मेक्षिका-

नीति-शृङ्गार-वैराग्य-शतकत्रये भर्तृहरेः कविप्रतिभायाः सूक्ष्मेक्षिकायाश्च दर्शनं भवति। एतेन यत् सूक्ष्मदृष्ट्याऽवलोकितस्य वस्तुनः चारुचमत्कृतशब्दार्थ-युगलेन यथावद्वर्णन-कौशलं प्रदर्शितं तत् सहृदयान् चमत्करोति। अधस्तनपद्ये द्रष्टव्योऽयं चमत्कारः--

''क्षीरेणात्मगतोदकाय हि गुणा दत्ता पुरा तेऽखिलाः
क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशानौ हुतः।
गन्तुं पावकमुन्मनास्तदभवद् दृष्ट्वा तु मित्रापदम्
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी।।''[3]

अयमाशयः - नीरं यदैव क्षीरेण सह मैत्रीमवाप्नोति तदैव क्षीरमात्मीयं रूपादि गुणम् निखिलं तस्मै नीराय प्रददाति। नीरमपि क्षीरे तापमवेक्ष्य प्रथमं स्वात्मानं वह्नौ जुहोति। आत्मानं जुह्वतो नीरस्य तां विपदं विलोक्य क्षीरम् पावके गन्तुमुन्मनायते, किन्तु मित्रे नीरे प्राप्ते सत्येव शान्तं भवति। नीर-क्षीर-मैत्रीव सज्जनानां मैत्री भवतीति तात्पर्यम्। एवमेव -

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वीपुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्द्ध-परार्द्ध-भिन्ना छायेव मैत्री खल-सज्जनानाम्।।[4]

---

१. धन्वन्तरि-क्षपणकामरसिंह-शङ्कु-वेतालभट्ट घटखर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य।।

२. यां चिन्तयामि सततं मयि सा विरक्ता साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृते च परिशुष्यति काचिदन्या धिक् तां च तञ्च मदनञ्च इमाञ्च माञ्च।। नीतिशतकम्।
इयमेव घटना तस्य वैराग्यकारणम् इति कथयन्ति विपश्चितः।

३. नीतिशतके - ६६।

४. तत्रैव ४६।

इत्यत्र दिनस्य पूर्वार्द्ध-छायेव खलानां परार्द्धछायेव सज्जनानां मैत्री भवतीति वर्णने कवेः सूक्ष्मदर्शनमवलोक्यते।

फलभारावनतान् पादपान्, जलभार-नम्रान्[1] घनान्, अनुद्धतान् सत्पुरुषान् विलोक्य कविकृतं परोपकारिणां स्वभाव-वर्णनं कामपि अपूर्वां मनोहरतां समभिव्यनक्ति। एवमेव भर्तृहरेः शतकत्रये दर्शन-वर्णनयोः किमपि अपूर्वं वैशिष्ट्यं कोऽपि असाधारण-चमत्कारः सहृदयैरनुभूयते।

रचना-कालादेव जनरसनासु रसायमानाः जन-जीवनसम्बद्धाः भर्तृहरेः चिरन्तना मधुराः सदुक्तयः मानव-मानसेषु निविशमानाः सन्तीति अनुभवन्ति विपश्चितः।

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति।।[2]

किन्तु सदुक्तिरियं सर्वान् सर्वकालं रञ्जयति। एवमेव–

विभूषणं मौनमपण्डितानाम्। १, ७।
नहि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्। १, ६।
विवेक-भ्रष्टानां भवति विनिपातः शतमुखः। १, १०।
मूर्खस्य नास्त्यौषधम्। १, ११।
वाग्भूषणं भूषणम्। १, १५।
विद्या-विहीनः पशुः। १, १६।
सत्संगतिः कथय किं न करोति पुंसाम्। १, १६।
जयन्ति ते सुकृतिनः रससिद्धाः कवीश्वराः।
नास्ति येषां यशःकाये जरामरणजं भयम्।। १, २०।
न खलु वयस्तेजसां हेतुः १, ३०।
सर्वे गुणाः काञ्चनमाश्रयन्ति। १, ३२।
वाराङ्गनेव नृपनीतिरनेकरूपा। १, ३८।
सेवाधर्मः परमगहनो योगिनामप्यगम्यः १, ४७।
न निश्चितार्थाद् विरमन्ति धीराः। १, ७१।
प्रारब्धमुत्तमगुणा न परित्यजन्ति। १, ७२।
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः। १, ७४।

---

१. भवन्ति नम्रास्तरवः फलोद्गमैः ....स्वभाव एवैषपरोपकारिणाम्।। तत्रैव ६१।
२. तत्रैव १, ३।

शीलं परं भूषणम्। १, ८०।

विपदि हन्त सुधापि विषायते। २, ८२।

तृष्णा न जीर्णा वयमेव जीर्णाः। ३, ७।

मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः। ३, ५३।

संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः। ३, ७५।

इत्यादयः कर्णामृतायमाना जीवनोपयोगि-ज्ञानमादधानाः सदुक्तयः सहृदयानानन्दयन्तितरामितिशम्।

भारते प्रतीक-नाटक-परम्परा

निर्जीव-पदार्थानां सूक्ष्मवस्तूनाममूर्त-भावानाञ्च स्पष्टप्रतिपत्तये मानवीकृतत्वं प्रतीकत्वम्। प्रत्यक्षायमाणा हि पदार्थाः सुलभतया साधारण-मानवानां बोधगम्या भवन्तीति हेतोः कवयः असाधारणपुरुषाणां बोधगम्यान् पदार्थान् भावांश्च तथा प्रतीकरूपेण वर्णयन्ति येन ते सरलतया सर्वेषां बोधगम्या भवन्ति। एवं-विधवर्णन-परम्परा भारते वैदिककालादेव समुपलभ्यते।

"द्वा सुपर्णा सयुजा सखाया[1]" इति प्रसिद्धे मन्त्रे जीवात्म-परमात्मनोः प्रतीकात्मक-सुपर्णरूपेण वर्णनं सारल्येन अवबोधनाय। ऋग्वेदस्य मण्डूकसूक्ते प्रतीकात्मकता स्पष्टमेव। बृहदारण्यकोपनिषदि पारस्परिकतारतम्य-निरूपण-प्रसङ्गे प्राणानां पञ्चानाम् इन्द्रियाणाञ्च मानवीकरणं प्रतीकात्मक-वर्णन-शैली-प्राचीनरूपम्। रामायण-महाभारत-पुराणादिषु च प्रतीकात्मक-शैली बहुषु स्थलेषु समुपलभ्यते। श्रीमद्भागवते च पुरञ्जनोपाख्यानं[2] सर्वथा प्रतीकात्मकम्। एवञ्च वेद-रामायण-महाभारत-पुराणादिषु समुपलब्धं प्रतीकवाद-माधारीकृत्य नाट्य-साहित्येऽपि इयं परम्परा प्रचलिताभूत्। एवं हि यस्मिन्नाटके अमूर्तभावा अचेतनपदार्थाश्च मानवीकृत-पात्र-रूपेण प्रदर्शिता भवन्ति तद्धि प्रतीकनाटकम्। भारते हि एतादृश-नाटकस्यापि परम्परा अतीव प्राचीना।

"दैवी संपद् विमोक्षाय निबन्धायासुरी मता[3]" इति गीतोक्त-सिद्धान्तं प्रतिपादयितुकामाः प्रतीक-नाटक-काराः धार्मिक-दार्शनिक-तत्त्वानि सुगमतया अवबोधयितुं प्रतीकनाटकानि विरचयाञ्चक्रुः।

कविताकामिनीहासः भासः "बालचरिते" शापस्य प्रतीकात्मकं मानवीकृतरूपं प्रदर्शयामास। बौद्ध-संस्कृतकाव्य-समीक्षया इदं ज्ञायते यत् महाकविरश्वघोषः एकं प्रतीक-नाटकं विरचयामास यत्र बुद्धि-कीर्ति-प्रभृतिपात्राणि मानवीकृतानि प्रदर्शितानि सन्ति।

एतत्प्रतीक-नाटकपरम्परायां गुर्जरदेशीयस्य अजयदेवापरनामकस्य अजयपालस्य राज्यकाले तदाश्रितकविः यशपालः "मोहपराजय" नामकं प्रतीकात्मक-नाटकं

---

१. ऋग्वेदे १,१६४,२०/मु० उ० ३, १।
२. श्रीमद्भागवते चतुर्थस्कन्धे (२५-२८) अध्यायेषु।
३. गीता १६, ५।

व्यरचयत्, यत्र मानव जीवन-चरम-सिद्धये मोहपराजयपूर्वकं ज्ञानोपार्जनं परमावश्यकमिति प्रतिपादितं वर्तते।

बौद्धधर्मस्य ह्रासात्मके, शङ्कराचार्यस्य अद्वैतवेदान्तसिद्धान्तस्य प्रचारात्मके च युगे तस्मिन् प्राचीनप्रतीकात्मकनाटकस्य शिल्प-पात्र-कथावस्तु-विधानानि अनुसरन् श्रीकृष्ण मिश्रः "प्रबोधचन्द्रोदय" नामकं प्रसिद्धं प्रतीकनाटकं विरचयामास। तथा श्रीरामानुजाचार्य-प्रवर्तित-सुलभ-ज्ञान-भक्ति-समन्वय-मार्गमाधारीकृत्य विरचितं संकल्पसूर्योदयनामकं नाटकं सर्वथा रमणीयं तथा स्वोद्देश्य-पूर्तौ सम्यक् सफलम्। क्रमेण चेयं परम्परा लोकप्रियतामादधाना विकासोन्मुखतामवापत्।

ख्रिष्टीय-त्रयोदश-शतके पवित्रे काञ्चीस्थले भगवतो वेङ्कटनाथस्य सदाशिषा जायमानः तोतारम्बातनूजः अनन्तगुणशेवधेरनन्तसूरेरात्मसंभवः वेदान्तदेशिक-वेङ्कटाचार्यः "संकल्पसूर्योदय" नामकं प्रतीकनाटकं विरचयाञ्चकार। अस्मिन्नाटके दक्षिणभारतस्य आलवार-भक्तानां भक्ति-भाव-प्रभावः वेदान्तदर्शन-तत्त्वानां प्रभावश्च समन्वयात्मकरूपेण विलसतः। "संकल्पसूर्योदयस्य" प्रणयने इदं रहस्यं प्रतिभाति यत् संकल्प-रूप-सूर्यस्य प्रकाशमन्तरा प्रबोध-रूप-चन्द्रस्य उदयः शक्य-संभवो नास्ति। यथा सुषुम्ण-सूर्यरश्मिद्वारैव चन्द्रमा गन्धर्वः[१]= किरणधारकः अर्थात्, प्रकाशको भवति तथैव संकल्प-सूर्य-द्वारैव प्रबोध–चन्द्रः समुदेति, इति हेतोः 'संकल्पसूर्योदय'स्यातीव महत्त्वं वरीवर्ति।

महाप्रभुश्रीचैतन्यदेव-प्रसाद-प्राप्त-वर-सरसभक्त-कवि कर्णपूरः श्रीचैतन्यदेव-जीवनवृत्तमाधारीकृत्य उत्तरभारते श्रीराधाकृष्ण-समाराधन-परक-परम- भक्ति-प्रचाराय "चैतन्यचन्द्रोदय" नामकं प्रतीक-नाटकं प्रणिनाय, यस्य निम्नलिखित-श्लोकेन कविकर्णपूरस्य समुद्देश्यं प्रतिपादितं भवति :--

> किं गेयं व्रजकेलिकर्म, किमिह श्रेयः सतां संगतिः,
> किं स्मर्तव्यमघारिनाम, किमनुध्येयं मुरारेः पदम्।
> क्व स्थेयं व्रज एव, किं श्रवणयोरानन्दि वृन्दावने--
> क्रीडैका, किमुपास्यमत्र महसी श्रीकृष्णराधाभिधे।।[२]

ख्रिष्टीय-षोडशशतके समुद्भूतः भूदेवशुक्लः एततूपरम्परायामेव "धर्मविजय" नामकं प्रतीक-नाटकं विरचयामास। एतस्मिन् नाटके कविः अधर्मस्य पराजय-प्रदर्शन-पुरस्सरं धर्मस्य विजयं प्रदर्शयामास।

---

१. सुषुम्णः सूर्य रश्मिश्चन्द्रमा गन्धर्वः य० १८-४०/निरुक्ते २, २, ६।
२. श्रीचैतन्य चन्द्रोदये ७, १०।

ख्रिष्टीय सप्तदशशतके जायमानः आनन्दरायमखी श्रीवेङ्कटनाथात् पूर्णप्रभावितः सन् "विद्या-परिणयन"–नामकं "जीवानन्द"–नामकञ्च प्रतीक-नाटकद्वयं प्रणीतवान्। आनन्दरायस्य शिवभक्ततया "विद्यापरिणयने" शिवभक्तेः प्राधान्यम् वरीवर्ति।

मैथिलोपाध्यायप्रवरगोकुलनाथस्य "अमृतोदय"–नामकं प्रतीकनाटकं "संकल्प सूर्योदयात्" प्रभावितं वर्तते।

वैष्णवभक्तेन वरदाचार्येण सप्तदशशतके प्रणीतम् "वेदान्तविलास"–नामकं प्रतीक- नाटकमपि "संकल्पसूर्योदय"मनुसरति।

ततः परमपि अनेकानि प्रतीक-नाटकानि भक्तैः दार्शनिकैश्च विरचितानि यानि सनातनधर्मस्य, दार्शनिकगूढतत्त्वस्य प्रतिपादनं कुर्वन्ति, आसुर-भावस्य दुष्परिणामं प्रकटयन्ति तथा शङ्कर-रामानुजाचार्य-प्रभृतीनां सिद्धान्तान् समाजे हृदयङ्गमान् विधाय लोकोपकारं विदधतीतिशम्।

संस्कृत-काव्यशास्त्रे विहारस्य योगक्षेमः

श्रीजानकीजानि-यशोऽभिशोभितस्य, जनक-याज्ञवल्क्य-गौतम-कपिल-मण्डन-वाचस्पत्युदयन - हलायुध-महीधर-गङ्गेश-पक्षधर-विद्यापति-भवनाथ-शङ्कर-वर्द्धमान-पार्थसारथि- गोकुलनाथ-धर्मनाथ-गङ्गानाथ-यदुनाथ-शशिनाथ-विश्वनाथाद्यनेकपद-वाक्य-प्रमाण-पारावारीण-पण्डितप्रवर-जन्मयशोभासुरस्य, शौद्धोदनि-तपो-विभूति- विश्रुतस्य विश्वविख्यात-योगक्षेमो न केवलं वेदान्त-न्याय-सांख्य-मीमांसा-बौद्ध-नव्यन्यायादिविविधदर्शनेष्वेवातिशेते, अपि तु साहित्य-शास्त्रपारदृश्वानामनेकेषां रससिद्धमनीषिणां विविधरचनाभिर्विख्यातस्य विहारस्य काव्यशास्त्रेऽपि योगक्षेमो न परिहीयते। न केवलं विहारस्य मिथिलामहीमण्डले मीमांसा-न्याय-वेदाध्ययन-पटुतरैः पण्डितैर्मण्डिते सदने 'स्वतः प्रमाणं परतः प्रमाणम्' इति शुकाङ्गना गिरो गिरन्ति स्म, अपि तु 'रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती' ति तैत्तिरीयोपनिषदनुसारं साहित्यसारं रसतत्त्वं विजानतां विदुषां शेमुषी काव्यशास्त्रालोचनेऽपि नोदास्ते स्म इति जानत एव विपश्चितः।

विहारस्यैव मिथिलामहीमण्डले ख्रिष्टीयत्रयोदशशतके सुमित्रा-महादेव[1] - तनुजस्य पक्षधरापरनाम्नः पीयूषवर्ष-जयदेवस्य चन्द्रालोकः काव्यालोचकानामालोक इति विजानते विद्वांसः। प्रसन्नराघव-नाटककृज्जयदेवस्य चन्द्रालोककृज्जयदेवस्य [2]चाभिन्नत्वमेवेति निश्चिन्वन्ति विपश्चितः। अयं हि पक्षधरा-परनामा पीयूषवर्षजयदेवः कोमल-काव्यकौशल-कलाकुशलस्तथैव यथा [3]कर्कशतर्कवचनोद्गारीति विजानन्ति विपश्चितः।

ख्रैष्ट-पञ्चदशशतके विद्यमानस्य मैथिलपण्डितप्रवर-गोविन्दठक्कुरस्य काव्यप्रदीपनाम्नी काव्यप्रकाशस्य व्याख्यापि स्वतन्त्रग्रन्थरूपैवेति मन्यन्ते मनीषिणः, यत्र च काव्यप्रकाशेऽपि निगूढं रहस्यं काव्यप्रदीपेनैव प्रकटितं भवति। एवमेवास्य श्लोकदीपिकापि काव्यप्रकाशं समुद्दीपयतितराम्।

---

१. महादेवः सत्रप्रमुखमखविधैकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ। चन्द्रलोके १, १६।

२. जयदेवः श्रवणयोरयासीदातिथ्यं न किमिह महादेवतनयः।।
लक्ष्मणस्येव यस्यास्य सुमित्रागर्भजन्मनः।
रामचन्द्रपदाम्भोजे भ्रमद्भृङ्गायते मनः।। प्रसन्नराघवे १, १४-१५।

३. येषां कोमल-काव्य-कौशल-कलालीलावती भारती
तेषां कर्कशतर्कवक्रवचनोद्गारेऽपि किं हीयते।
यैः कान्ताकुचमण्डले कररुहाः सानन्दमारोपिता
स्तैः किं मत्तकरीन्द्रकुम्भशिखरे नारोपणीयाः शराः।। तत्रैव १, १७।

विहारस्य एतस्मिन्नेव भूमिभागे दरभंगामण्डलान्तर्गते ख्याते सरिसवग्रामे [1]हलायुध-महीधर-वंशावतंसः शाण्डिल्यगोत्रीयः मैथिलश्रोत्रियः सोदरपुर-सरिसव-वंशोद्भव-महामहोपाध्याय-शङ्करमिश्रानुज-महादेवमिश्रतनुज- कविविरुद-विभूषित-कवि-चक्रचूडामणिर्गणेश्वरापरनामगणपतिमिश्रतनूजः ख्रिष्टीय-पञ्चदशशतकान्ते षोडशशतकादौ च विद्यमानः सकलालंकारिकशेखरः काव्यकला-कुशलः रसशास्त्रनिपुणः कविशेखरस्तत्रभवान् भानुदत्तमिश्रः रसतरङ्गिणी-रसमञ्जरी- रसपारिजात-गीतगौरीपति-कुमारभार्गवीयअलंकारतिलक-मुहूर्तसार-शृङ्गारदीपिकाद्यनेकग्रन्थरत्नानि विरचयाञ्चकार।

कविशेखरस्यास्य काव्यकलाचातुरी अधोलिखितेन रसतरङ्गिणी-मङ्गलश्लोकेनैव शक्यतेऽवगन्तुम्-

लक्ष्मीमालोक्य लुभ्यन्निगममुपहसञ्छोचयन् यज्ञजन्तून्
क्षत्रं शोणाक्षि पश्यन् समिति दशमुखं वीक्ष्य रोमाञ्चमञ्चन्।
हत्वा हैयङ्गवीनं चकितमपसरन् म्लेच्छरक्तैर्दिगन्तान्
सिञ्चन्दन्तेन भूमिं तिलमिव तुलयन् पातु नः पीतवासाः।।

अत्र लक्ष्मीमालोक्य लुभ्यन् इत्यनेन शृङ्गारस्य, निगममुपहसन् इत्यनेन हास्यस्य, यज्ञजन्तून् शोचयन् इत्यनेन करुणस्य, क्षत्रं शोणाक्षि पश्यन् इत्यनेन रौद्रस्य, समिति दशमुखं वीक्ष्य रोमाञ्चमञ्चन् इत्यनेन वीरस्य, हत्वा हैयङ्गवीनं चकितमपसरन् इत्यनेन भयानकस्य, म्लेच्छरक्तैर्दिगन्तान् सिञ्चन् इत्यनेन बीभत्सस्य, दन्तेन भूमिं तिलमिव तुलयन् इत्यनेनाद्भुतस्य च रसस्याभिव्यक्तिर्भवति।

एवं हि रससिद्धकवीश्वरस्य भानुदत्तमिश्रस्य काव्यशास्त्रनिष्णातत्वं प्रकटितं भवति। अयमेव हि आचार्यः रसतरङ्गिण्यां जृम्भाख्यं नवमं सात्त्विकभावं निरूपयामास[2]।

कविशेखरभानुदत्तमिश्र-तनूजस्य जानुदत्तमिश्रस्य दौहित्रेण कविवर-गङ्गानन्दमिश्रेण षोडशशतकपूर्वार्द्धे विद्यमानस्य वीकानेर-नरेश-श्रीकर्णस्य सभापण्डितशिरोमणिना कर्णभूषणं-नाम ग्रन्थरत्नं रचयाञ्चक्रे, यस्मिन् विभावानुभाव-व्यभिचारिभाव - स्थायिभाव-रसानां वैदुष्यपूर्णं विवेचनं भानुदत्तमिश्र-प्रतिपादित-नवम जृम्भाख्यसात्त्विकभावस्य चर्चा च वरीवर्ति। एतेनैव कविवर-गङ्गानन्देन काव्यडाकिनी विरचिता, यत्र कियतां नवीनानां दोषाणां निरूपणं दोषज्ञानां मनांसि चमत्करोति।

---

१. द्रष्टव्यः काव्यात्ममीमांसायां ग्रन्थकार-वंशपरिचयः।
२. रसतरङ्गिण्याम् ६६-तमे पृष्ठे।

मैथिलकविकोकिलविद्यापति-समकालिकेन षोडशशताब्द्यां विद्यमानेन न्यायशास्त्रप्रवीणेन केशवमिश्रेण साहित्यशास्त्रेऽपि विविधानि ग्रन्थरत्नानि रचयाञ्चक्रिरे, येषु अलंकारशेखर-काव्यरत्नालंकारसर्वस्वादीनि प्रसिद्धानि। अलंकारशेखरे एतेन मैथिलीरीतिरपि न्यरूपि।

ख्रिष्टीयसप्तदशतकान्ते विद्यमानेन पद-वाक्य-प्रमाण-पारावारीणेन पदवाक्य-रत्नाकरकारेण साहित्यतत्त्वमर्मज्ञेन गोकुलनाथोपाध्यायेन अन्वर्थनामा रसामहार्णवो नाम ग्रन्थो व्यरचि।

महादेवमिश्रेण विरचितां रसमञ्जरी-व्याख्यां भानुभावप्रकाशिनीं रसतरङ्गिणीव्याख्यां रसोदधि-नाम्नीं विद्वांसः प्रायेण जानत एव।

सुखदेवमिश्रस्य शृङ्गारलता भावमिश्रस्य शृङ्गारसरसी श्रीकरमिश्रस्य अलंकारतिलकः भास्करमिश्रस्य साहित्यदीपिका सुबुद्धिमिश्रस्य तत्त्वपरीक्षा तथा साहित्यसर्वस्वनामिका काव्यालंकारसूत्रवृत्ति-व्याख्या च अध्ययनाध्यापनादावप्रचलिता अपि प्रेक्षावतां समालोचकानां समक्षं प्रत्यक्षायमाणा एव। इमानि च ग्रन्थरत्नानि विहारप्रान्तीयमैथिलमनीषिभिर्विरचितानि ख्रिष्टीयोनविंशशतकान्तात् पूर्वमेव भारतभुवं विभूषयाञ्चक्रुः।

वर्तमानशताब्द्यां च दिवमुपयातानामनल्पगुणगणशालिनां विरचित-काव्यशासनग्रन्थानां सुविहितसाहित्यशास्त्रव्याख्यानां विहारप्रान्तीयविपश्चितां व्यञ्जनावादकृद् यदुनाथमिश्र, काव्यप्रकाशव्याख्याकारः खुद्दी झा, काव्यप्रकाशाङ्गलभाषाव्याख्याकार-महामहोपाध्याय - डाक्टर - सर् - गङ्गानाथ झा - प्रभृति-महाभागानां नामानि एतत्प्रसङ्गे समुल्लेख्यानि।

अधुनातनेषु लब्ध-साहित्य-शास्त्र-विषय-रचनाप्रतिष्ठेषु ध्वन्यालोक-रसमञ्जरी-रसगङ्गाधरादि- व्याख्याकृत् कविशेखर-बदरीनाथ झा, ध्वनिसाहस्रीकार-श्रीपदानन्दझा, रसगङ्गाधर-हिन्दी-व्याख्याकार- श्रीमदनमोहनझा, भामह-विरचित- काव्यालंकार-हिन्दी-व्याख्याकार-प्राध्यापक-श्रीदेवेन्द्रनाथशर्मा, काव्यदोषसमीक्षक-वामनविरचित-काव्या-लंकारसूत्र-व्याख्याकार-प्राध्यापकश्रीवेचनझा, काव्यात्म-मीमांसा- काव्यस्वरूपमीमांसा-निबन्ध कुसुमाञ्जलि-लेखक-प्राध्यापक-श्रीजयमन्तमिश्रः काव्यादर्श-रुद्रटालंकार-कुवलयानन्दादिग्रन्थ-व्याख्याकार-श्रीरामचन्द्रझा, साहित्यदर्पण-व्याख्याकार-श्रीकृष्ण-मोहनठक्कुर प्रभृतिविदुषां नामानि प्रसङ्गेऽस्मिन् समुल्लेख्यान्येव।

बाणभट्टस्य गद्य-शैली

लोकोत्तर-वर्णना-निपुण-कवि-कर्म काव्यम् भवति। एतत्काव्यस्य विभिन्नैराचार्यैरालंकारिकैश्च विविधानि लक्षणानि कृतानि। तत्र शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद्विधा इति भामहाचार्यप्रतिपादितस्य विशिष्ट - साहित्य - समन्वित शब्दार्थरूप- काव्यस्य गद्यम् एक - प्रभेदः।

गद्यते सुव्यक्तं प्रतिपाद्यते यदिति व्युत्पत्या अनुपसर्गात् गद्धातोः कर्मणि यत् प्रत्ययेन निष्पन्नो गद्यशब्दः रचनाविशेषे प्रयुज्यते। 'अपादः पदसन्तानो गद्यम्' इति आचार्यदण्डिना काव्यादर्शे लक्षितम्। 'वृत्तगन्धोज्झितं गद्यमिति च कविराज विश्वनाथेन प्रतिपादितम्। एवं हि वृत्तगन्धरहितः अपादः पदसमूहो गद्यमिति फलितम्। एतद्य गद्यम् 'काव्यालङ्कारसूत्रकृतो वामनस्य मते त्रिविधम् - वृत्तगन्धि, चूर्णम्, उत्कलिकाप्रायञ्च। तत्र 'पद्यभागवद् वृत्तगन्धि' इति लक्षणेन छन्दोगन्धसमन्वितं गद्यम् 'वृत्तगन्धि' भवति। यथा 'पाताल-तालु-तल-वासिषु-दानवेषु' इति गद्यांशे वसन्त-तिलकावृत्तस्य भागः प्रत्यभिज्ञायते। यस्मिन् गद्ये अदीर्घसमासानि ललितानि पदानि भवन्ति तत् 'अनाविद्धललितपदं गद्यं चूर्णम्' भवति। यथा 'अभ्यासो हि कर्मणां कौशलमावहति' इत्यादि।

यस्मिँश्च गद्ये दीर्घसमासानि उद्धतानि पदानि भवन्ति तद्गद्यम् उत्कलिका प्रायमित्युच्यते।

गद्यस्य एतद्भेदत्रयेण सह मुक्तकनामकं चतुर्थं प्रभेदं - स्वीकुवता आचार्य-विश्वनाथेन प्रतिपादितम् –

वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम्।।
आद्यं समासरहितं वृत्त-भागयुतं परम्।
अन्यद्दीर्घसमासाढ्यं तुर्यं चाल्प-समासकम्।।'

आचार्यदण्डिनो मते गद्यस्य आख्यायिका कथा चेति भेद-द्वयं भवति। आख्यायिकायाम् ऐतिहासिक-वृत्तान्त-वर्णनं भवति। कथायाञ्च कविकल्पित-वस्तु-निरूपणं भवति। 'हर्षचरितम्' बाणभट्टस्य आख्यायिका वर्तते। कादम्बरी च कथा विद्यते।

बाणभट्टस्य गद्यशैली-विचार-प्रसङ्गे प्रथमं तावत् तस्य उत्कृष्ट गद्य-काव्य-विषयक-सिद्धान्तस्य प्रतिपादनम् परमावश्यकम्। बाणस्य मते उत्कृष्टकविगद्यम्, विविधवर्ण-श्रेणिप्रतिपाद्यमानाभिनवार्थसञ्चयम् भवति। अर्थात् तदेव गद्यम् उत्कृष्ट गद्यं भवति यत्र विविध-वर्णजातैः अभिनवार्थ-समूहस्य मनोहरं प्रतिपादनं जायते। एतादृशं च गद्यम् उत्कृष्टकविद्वारैव केवलं विरच्यते। यानि पञ्च तत्त्वानि एकत्र दुर्लभायमानान्यपि उत्कृष्टकवि-काव्ये-अपेक्षितानि भवन्ति तानि बाणभट्टेन स्वकीये 'हर्षचरिते' प्रारम्भे एव उल्लिखितानि –

> "नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।
> विकटाक्षर-बन्धश्च कृत्स्नमेकत्र दुर्लभम्"।। इति।

अर्थात् (१) विषयस्य नूतनता, (२) मनोहरा स्वभावोक्तिः, (३) सुस्पष्टः श्लेषालङ्कारः, (४) स्फुटः रसः, (५) विकटाक्षरपदरचना चेति पञ्चकम् एकत्र दुर्लभम् भवति। किन्तु एतत् सर्वम् उत्कृष्टगद्यस्य कृते अपेक्षितं भवति।

बाणभट्टस्य समये ख्रिष्टीय-सप्तमे शतके भारते पूर्वोत्तर-पश्चिम-दक्षिण-भागेषु कवयः एकाङ्गिदृष्ट्या काव्य-रचनां कुर्वन्त आसन्, यस्य बाणेन 'हर्षचरिते' निर्देशः कृतः-

> "श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थमात्रकम्।
> उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बरम्।।"

अर्थात् भारतस्य उदीच्या कवयः स्वरचनासु श्लेषस्यैव बाहुल्यं कुर्वते, प्रतीच्याः भाषां समुपेक्ष्य अर्थमात्रे ध्यानमादधति, दाक्षिणात्या उत्प्रेक्षायामेव पाटवं प्रदर्शयन्ति तथा गौडा अक्षराडम्बरमेव कुर्वन्ति। अतः चतुर्षु भागेषु काव्यरचनायाम् एकाङ्गिनी दृष्टिः प्राप्यते। परन्तु बाणस्य मते उत्कृष्टकाव्यनिर्माणाय –

> "नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटोरसः।
> विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुर्लभम्"।।

इति पूर्वोक्तप्रकारेण समन्वयात्मिका दृष्टिः अपेक्षिता वर्तते। एतस्य सारांशं प्रतिपादयता बाणभट्टेन कादम्बरी कथा-प्रारम्भे निर्णीतम्--

> हरन्ति कं नोज्ज्वलदीपकोपमैर्नवैः पदार्थैरुपपादिताः कथाः।
> निरन्तरश्लेषघनाः सुजातयो महास्रजश्चम्पककुड्मलैरिव।। इति

अत एव एवंविधनिरन्तरश्लेषघना उज्ज्वलदीपकोपमा नवपदार्थोपपादिता सुजातिः कादम्बरी कथा लोके अतिद्वयी वरीवर्ति। अर्थात् कादम्बरी गुणाढ्यस्य बृहत्कथाम् सुबन्धोर्वासवदत्ताञ्च तिरस्करोति।

अतएव बाणभट्टस्य सम्बन्धे समालोचका मुक्तकण्ठं कथयन्ति--

"श्लेषे केचन शब्दगुम्फविषये केचिद्रसे चापरेऽ –
लंकारे कतिचित् सदर्थविषये चान्ये कथावर्णने।
आसर्वत्र गभीरधीरकविताविन्ध्याटवीचातुरी –
संचारीकवि-कुम्भि-कुम्भ-भिदुरो बाणस्तु पञ्चाननः।।" इति।

बाणभट्टस्य हर्षचरिताख्यायिकायाम् कादम्बरी - कथायाञ्च समासरहितं मुक्तकम्, अल्पसमासकं चूर्णकम् दीर्घसमासकम् उत्कलिकारूपञ्चेति शैलीत्रयम् प्राप्यते तथा शब्दार्थयोः समानगुम्फनात् पाञ्चालीरीतिरुपलभ्यते। सरस्वतीकण्ठाभरणे भोजराजेन प्रतिपादितम् –

शब्दार्थयोः समो गुम्फः पाञ्चालीरीतिरिष्यते।
शिलाभट्टारिकावाचि बाणोक्तिषु च सा यदि।।" इति

तथा हि हर्षचरिते - वेलेव रागसागरस्य, ज्योत्स्नेव यौवन-चन्द्रोदयस्य, महानदीव रतिरसामृतस्य, कुसुमोद्गतिरिव सुरत-तरोः बालविद्येव वैदग्ध्यस्य, कौमुदीव कान्तेः, धृतिरिव धैर्यस्य, गुरुशालेव गौरवस्य, बीजभूमिरिव विनयस्य, गोष्ठीव गुणानाम्, मनस्वितेव महानुभावतायाः, तृप्तिरिव तारुण्यस्येत्यादौ मुक्तकं गद्यम्।

कादम्बर्यामपि निम्नलिखितं मुक्तक-गद्यम्--

"यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।" किमपि अपूर्वं चमत्कारमादधाति।

चूर्णकस्यापि गद्यस्य, हर्षचरिते कादम्बर्याञ्च बहुशः प्रयोगो वरीवर्ति तथा हि हर्षचरिते - कृतोपनयनादि क्रियाकलापस्य समावृत्तस्य चास्य चतुर्दशवर्षदेशीयस्य पितापि श्रुति-स्मृति-विहितं कृत्वा द्विजजनोचितं निखिलं पुण्यजातं कालेनादशमीस्थ-एवास्तमगमत्।

उत्कलिका-गद्यस्य तु उभयत्र प्राचुर्यमेव विद्यते। यथा-कादम्बर्याम् – "नरपति-सहस्त्र-मध्यवर्तिनम् अशनि-भय-पुञ्जित-कुल-शैल-मध्यगतमिव कनकशिखरिणम्, अनेक-रत्नाभरण-किरण-जालकान्तरितावयवम्-इन्द्रायुध-सहस्त्र-संछादिताष्टदिग्भागमिव जलधर-दिवसम् .... राजानमद्राक्षीत्।"

एवं हि त्रिविधायामपि शैल्याम् वर्णने बाणः सिद्धहस्तः। अस्य कवेः वर्णन-शैल्या इदमपरं वैशिष्ट्यम् यत् चित्रात्मकप्रसङ्गे उत्कलिकायाः दीर्घ-समासात्मिकायाः शैल्या एव प्रायेण समाश्रयणं क्रियते कविना। वर्णनान्ते च समासरहिताया मुक्तक-शैल्या आश्रयणं विधीयते यत् अतीव मनोवैज्ञानिकम्। उत्कलिकागद्यपाठेन परिश्रान्तस्य अध्येतुः वाचकस्य वा मनोभावानुकूलेयं मनोहरा प्रक्रिया। संस्कृतभाषाया इदं परमं वैशिष्ट्यं यत् लघुचित्राणां प्रस्तुतीकरणे मालायां पुष्पाणीव पदानि कविना एकत्र गुम्फ्यन्ते चित्राणां शृङ्खलाश्च उपस्थाप्यन्ते।

गद्यसाहित्ये बाणस्य चरमोत्कर्षम् अवलोक्यैव समालोचकाः कथयन्ति 'बाणोच्छिष्टं जगत् सर्वम्' इति।

युक्तं कादम्बरीं श्रुत्वा कवयो मौनमागताः।
बाणध्वनावनध्यायो भवतीति श्रुतिर्यतः।। इति।

हर्षचारितापेक्षया कादम्बरीकथायाम् वर्णनस्य चित्रमयता, प्राञ्जलता तथा सरसता अधिकम् दरीदृश्यते। महाश्वेताया वर्णने कादम्बर्याः स्वरूपनिरूपणे बाणस्य अलौकिक-वर्णन-निपुणता अवलोक्यते। अत एव तिलकमञ्जरी-कारः धनपालः कथयति- 'केवलोऽपि स्फुरन् बाणः करोति विमदान् कवीन्' इति दिवंगते ताते बाणे तत्तनयः पुलिन्दः कादम्बरीकथाया उत्तरार्द्धं विरचयन् युक्तं प्रतिपादयति-

'कादम्बरी-रस-भरेण समस्त एव
मत्तो न किञ्चिदपि चेतयते जनोऽयम्।
भीतोऽस्मि यन्न रसवर्ण-विवर्जितेन
तच्छेषमात्मवचसाऽप्यनुसन्दधानः।। इति

बाणस्य श्लाघनीयरचनायाम् विषयस्य नवीनता, सरल-सरस-श्लेष - प्रधानशैल्या अद्भुतयोजना, वस्तुनो यथार्थवर्णनम्, समासबहुलपदविलासः, कथावस्तु संग्रथनम् च एवं विधविशिष्टानि तत्त्वानि सन्ति यद्वैशिष्ट्यं समुद्दिश्य जनाः कथयन्ति –

'प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूव ह" इति।

संस्कृतसाहित्ये माघस्य महत्त्वम्

सुविस्तृतेऽस्मिन्नसारेऽपि संसारे महाकाव्यमेवास्ति सारभूतं वस्तु यल्लोकानलौकिकं सुखसङ्गं समर्प्य सततं सुखयति। तस्मात्कमनीयतमानि महाकाव्यानि तत्कलयितारो महाकवयश्च सत्कृतां शाश्वतिकीं सपर्यामर्हन्ति।

तत्रापि स्फुरन्प्रतिभाविशेषाः कतिपय एव महाकवयो भवन्ति न बहवः। अत एवोक्तमानन्दवर्धनाचार्येण ध्वन्यालोके - "अस्मिन्नतिविचित्र-कवि-परम्परावाहिनि संसारे कालिदास-प्रभृतयो द्वित्राः पञ्चषा एव वा महाकवय इति गण्यन्ते" इति। तत्र द्वयोरन्यतरस्त्रिषु पञ्चषेषु वाऽन्यतमोऽयं महामनीषी महाकविर्माघो विराजते।

माघमासे समुद्भूत्या महाकवेर्माघ इति समाख्याऽन्वर्थतां लभत इति मन्ये। तत्रापि माघपूर्णिमायामस्य जन्म प्रतिभाति। माघे माघ्यां वा भवो जातो वेत्युभयथा व्युत्पत्ति-संगतेः। माघमासस्य पूर्णिमाया मघानक्षत्रस्य संस्थितिरिति प्रत्यक्षमेव। तद्वशादेव मासस्य माघसंज्ञा समजनि।

नैवं केवलस्य माघस्यैवापि तु समेषां मासानां तत्तन्नक्षत्रयुक्तपूर्णिमावशादेव तथा तथा तत्तन्माससंज्ञा समर्थिताऽस्ति। एवञ्च मघायां भवो जातो वेत्यपि व्युत्पत्तिर्निर्दुष्टा। एतदर्थं "तत्र भवः" "तत्र जातः" "नक्षत्रेण युक्तः कालः" "साऽस्मिन् पौर्णमासी" इत्यादीनि पाणिनीय-सूत्राणि स्मरणीयानि। कथं तत्तन्मासपूर्णिमासु तानि तान्येव नक्षत्राणि सहसा समायान्तीत्यस्य समाधये ज्योतिर्विज्ञानं शरणम्।

स्फुरत्प्रतिभाविशेषेषु तेषु कश्चिदुपमायां परां प्रसिद्धिमगमत्। कश्चिदर्थगौरवे। कश्चिच्च पदलालित्ये। किन्तु महामनीषी महाकविर्माघः सर्वत्र समानां सारस्वतगतिं भारतीं लेभ इति महाभाग्यं माघस्य तदीयस्य महाकाव्यस्य शिशुपालवधस्य च। तथा चोक्तमभियुक्तेन केनचित्--

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।। इति।

"नैषधे पदलालित्यम्" इत्यपि कुत्रचित्पाठः प्रत्यक्षीक्रियते। सम्प्रति माघे गुणत्रयसंस्थितिः समर्थ्यते--

माघे सन्ति त्रयो गुणाः–

सर्वप्रथममस्य महाकवेरप्रतिमप्रतिभोपमा तावन्निरीक्ष्यताम् –

दधानमम्भोरुह केसरद्युतीर्जटाः शरच्चन्द्रमरीचिरोचिषम्।
विपाकपिङ्गास्तुहिनस्थलीरुहो धराधरेन्द्रं व्रततीततीरिव।।१।५।

विद्वद्भिरागमपरैर्विवृतं कथञ्चिद्धृत्वापि दुर्ग्रहमनिश्चितधीभिरन्यै।
श्रेयान् द्विजातिरिव हन्तुमघानि दक्षं गूढार्थमेष निधिमन्त्रगणं बिभर्ति।।४। ३७।

उपर्युक्ते प्रथम पद्ये देवर्षेर्नारदस्य पर्वतराजेन द्वितीये रैवतकर्पवतस्य द्विजातिना साम्यं विनिर्दिशता महाकविना निरुपम-प्रतिभा-शालिनी सद्योऽद्भुतचमत्कारकारिणी महाकाव्यान्तरुपमाप्रयोग-चातुरी प्रदर्शिता।

अथार्थगौरवसौन्दर्य समीक्ष्यताम्–

अपशङ्कमङ्क परिवर्तनोचिताश्चलिताः पुरः पतिमुपेतुमात्मजाः।
अनुरोदितीव करुणेन पत्त्रिणां विरुतेन वत्सलतयैव निम्नगाः।।१४।४७।

उदय-शिखरिशृङ्गप्राङ्गणेष्वेष रिङ्गन् सकमलमुखहासं वीक्षितः पद्मिनीभिः।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः परिपतति दिवोऽङ्के हेलया बालसूर्यः।।
११।४७।।

कीदृशमत्र सरसं माधुर्यपरिपूर्णमत्यन्तगाम्भीर्यगुरुतममर्थगौरवमस्तीति सदयहृदयाः सहृदयाः स्वयमेव समनुभवन्तु।

गुणत्रये तृतीयमथ पदलालित्यं लोचनगोचरीक्रियताम्--

मधुरया मधुबोधितमाधवी मधुसमृद्धि समेधितमेधया।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे।।

यत्रोज्झिताभिर्मुहुरम्बुवाहैः समुन्नमद्भिर्न समुन्नमद्भिः।
वनं बबाधे विषपावकोत्था विपन्नगानां न विपन्नगानाम्।।४।१५

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं

त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।

उदयमहिमरश्मिर्याति शीतांशुरस्तं

हतविधि लसितानां ही विचित्रो विपाकः।।११।६४

एतेषु विलसत्पदलालित्यं समेषां सचेतसाञ्चेतश्चमत्कुरुतेतरां नितराम्।

तृतीयपद्यविषये तु जनैः श्रूयते जनश्रुतिर्यत् कदाचित् कश्चिन्नृपतिरिदं पद्यं निशम्य भावयित्वा च मनसा महाकवये प्रत्यक्षरं लक्षं ददौ।

सुविस्तृतेऽस्मिन् शिशुपालवधमहाकाव्ये प्रायः सर्वत्रैवमुपमाऽर्थगौरवं पदलालित्यञ्च समुपलभ्यत इति गुणत्रयस्यैकत्र संस्थित्या महाकवेर्माघस्य तदीयस्य महाकाव्यस्य शिशुपालवधस्य च वैशिष्ट्यं सिद्धमेव समेषां सुधियां समक्षम्।

महाकविमाघस्य परिचयः--

महाकविर्माघो राजस्थानगुर्जरप्रान्तमध्यवर्ति"भिन्न-मालव"नगरं स्वजनुषाऽलञ्चकार। भिन्नमालवस्यैवापरं नाम "श्रीमाल" इत्यप्यस्ति। तत्र श्रीमालीजातीया ब्राह्मणा बहवोऽद्यापि वसन्तीति माघो महाकविः श्रीमाली ब्राह्मण इति निश्चीयते।

यद्यपि महाकविसमयसम्बन्धेऽपरिमितानि मतमतान्तराणि सन्ति तथाप्यस्य समयः ख्रिष्टीयसप्तमशताब्दीत्येव विनिश्चीयतां, यतो ह्येष एव पक्षो युक्तिसंगतो भाति। तथा हि--

नवमशताब्द्यां स्थितेन श्रीमदानन्दवर्धनाचार्येण स्वीये ध्वन्यालोके "अलङ्कारान्तरस्यापि" २।२७ इति कारिकाया वृत्तौ शिशुपालवधस्य "त्रासाकुलः परिपतन्" ५।२६ इति "रम्या इति प्राप्तवतीः पताकाः" ५।५३ इति च पद्यद्वयं समुदाहृतम्। तस्मादितः प्राक्तनो माघः सिध्यति।

स्वयमेव महाकविः शिशुपालवध-महाकाव्य-द्वितीयसर्गीये "अनुत्सूत्रपदन्यासा" २।११२। इति पद्ये न्यासं काशिकां च चर्चितवान्। महाकविना बाणेन च स्वकीये निरवद्यगद्यकाव्ये हर्षचरिते न्यासस्य चर्चा विहिता। सोऽयं बाणः सप्तमशताब्द्यामासीदिति विधिना माघस्य स्थितिः सप्तमशताब्द्यां सुनिश्चिताऽभूदित्यत्र नास्ति विचिकित्सावसरः।

कविकुलकमलदिवाकरस्य महाकवेर्माघस्य सर्वाश्रयापरनामा दत्तक आसीत्पिता पितामहश्च श्रीवर्मलाभिधस्य भूपतेर्धर्मसचिवः सुप्रभदेवः। प्रसिद्धपण्डितः पितृव्यश्च शुभङ्करोऽभूत्।

कुलमस्य सारस्वतसाम्राज्यसमुल्लसितमपि कमलालयाया विलासस्थानमभूदित्यप्यन्यविधमेतदीयं वैशिष्ट्यं वरीवर्ति।

समधिगत-सकलशास्त्रोऽपि माघो मुख्यतया महावैयाकरणोऽत एव तत्रावर्णनीयं वैदुष्यमासीत्। वस्तुतो वैयाकरणा एव विशिष्टवैदुष्यविभूषिता भवन्तीत्यत्र न कश्चिदपि विपश्चिद्विमतिं विधत्ते। तथा चोक्तमानन्दवर्धनेन--

"प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्" इति। महाकवेर्माघस्य महावैयाकरणत्वे मानं प्राचीनतमेषु कतिपयेषु शिशुपालवधमहाकाव्यपुस्तकेषु प्रतिसर्गमन्ते स्थितः "इति श्रीभिन्नमालव वास्तव्यदत्तकसूनोर्महावैयाकरणस्य माघस्य कृतौ शिशुपालवधे महाकाव्ये" इत्युल्लेख एव। एतदीयं व्याकरण-वैदुष्यं सकलशास्त्रीय-पाण्डित्य-प्रदर्शन-प्रकरणे प्रदर्शयिष्यते। महावैयाकरणत्वमपि महावैशिष्ट्यमस्य। प्राक्तनपुण्यप्रभावादेवैतादृशी वैशिष्ट्य-परम्परा येन केनचिदेवैतादृशेन समवाप्यते नान्येनान्यथा।

महापुराण-प्राणस्य श्रीमद्भागवतस्य दशमस्कन्धीय चतुःसप्ततितमेऽध्याये महाभारत सभापर्वणस्त्रयस्त्रिंशत्तमाध्यायात्पञ्चचत्वारिंशत्तमाध्यायपर्यन्तं त्रयोदशाध्यायेषु वर्णितां शिशुपालवध-कथामाश्रित्य माघेन कृतमेकमेवैतन्महाकाव्यं शिशुपालवधं नाम "एकश्चन्द्रस्तमो हन्ति" इति न्यायेन साहित्यजगदिदं स्वसमग्र-समज्ञया धवलीकरोति।

सकलशास्त्रीयशेमुषीसमृद्धिः--

प्रतिभाऽपरपर्याया शक्तिः, व्युत्पत्त्यपराभिधाना निपुणता, अभ्यास इत्येतत् त्रयं दण्डचक्रादिन्यायेन समुदितं काव्यस्य हेतुरित्यालङ्कारिकाणां सिद्धान्तः। तत्र निपुणता नाम वेदवेदाङ्गदर्शनाभिधानकोशकलाराजनीतिपुराण-रामायण-महाभारत-धर्मशास्त्र-नाट्यायुर्वेद-संगीतेतिहासगजतुरगलक्षणादिग्रन्थानां विमर्शनादुपजायते।

शिशुपालवधकाव्यसमीक्षणेन स्पष्टं प्रतीयते यदनेन महाकविना सकलशास्त्राणि सम्यक् परिशीलितानि, यतो हि सकलशास्त्राणामशेषतत्त्वानि संनिवेश्य विरचितमिदं महाकाव्यम्।

सूची-कटाह-न्यायेनान्यान्यशास्त्रीय-वैदुष्य-प्रदर्शनानन्तरमस्य व्याकरण-वैदुष्यं प्रदर्शयिष्यते। वस्तुतोऽनन्तावर्णनीयवैशिष्ट्यस्य महाकवेर्वैशिष्ट्यं यत्किञ्चिदेव समासतः स्थालीपुलाकन्यायेन प्रदर्शयितुपक्रम्यते।

वेदमीमांसयोर्वैदुष्यम् - चतुर्दशसर्गे यज्ञविधान-वर्णने विराजते।

ज्योतिषस्य - त्रयोदशसर्गस्य द्वाविंशे पद्ये।

योगशास्त्रस्य - चतुर्थसर्गस्य पञ्चपञ्चाशत्तमे।

सांख्यशास्त्रस्य - प्रथमसर्गस्य त्रयस्त्रिंशे।

वेदान्तशास्त्रस्य - प्रथमसर्गस्य द्वात्रिंशे।

न्यायशास्त्रस्य - द्वितीयसर्गस्यैकनवतितमे।

कोशस्य - विविधार्थकशब्दप्रयोगात्सर्वत्र। विशेषतो नवमसर्गपर्यन्तम्। अत एव 'नवसर्गगते माघे नवशब्दो न विद्यते' इति सूक्तिः संगच्छते।

राजनीतेः - द्वितीये सर्गे स्थितेषु शताधिकेषु पद्येषु।

पुराणस्य - प्रथमसर्गस्य पञ्चदशे, द्वितीयसर्गस्याष्टत्रिंशे तथान्यत्र बहुत्र स्थलेषु।

धर्मशास्त्रस्य - नवमसर्गस्य नवमे पद्ये।

आयुर्वेदस्य - द्वितीयसर्गस्य चतुष्पञ्चाशत्तमे।

नाट्यशास्त्रस्य - द्वितीयसर्गस्य चतुश्चत्वारिंशत्तमे।

अश्वशास्त्रस्य - पञ्चमसर्गस्य दशमे।

गजशास्त्रस्य – पञ्चमसर्गस्य षट्त्रिंशत्तमे।

संगीतशास्त्रस्य - प्रथमसर्गस्य दशमे।

मन्त्रशास्त्रस्य - द्वितीयसर्गस्य द्व्यशीतितमे।

पाकशास्त्रस्य - भावशुद्धिसहितैर्मुदं जनो नाटकैरिव बभार भोजनैरित्यत्र।

कामशास्त्रस्य - चतुर्थसर्गस्योनत्रिंशे।

एवमन्यान्यपि शास्त्राणि विषयवर्णनरूपेण यत्र तत्र महाकाव्येऽस्मिन् स्थितानि सन्ति।

महाकवेर्व्याकरणवैदुष्यं विशदीक्रियते--

पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः।

विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः।। १।५१।

अत्र लकारार्थप्रकरणपाण्डित्यं प्रदर्शितं भवति।

असम्पादयतः कञ्चिदर्थं जातिक्रियागुणैः।

यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम्।। २।४७।

अत्र "चतुष्टयी शब्दानां प्रवृत्तिः" इति व्याकरणमहाभाष्यकारस्य पतञ्जलेः सिद्धान्तः समाहृतः। चतुर्विधः शब्दः जातिवाचकः, गुणवाचकः, क्रियावाचकः, संज्ञावाचकश्चेति मर्म।

तदीशितारं चेदीनां भवांस्तमवमंस्त मा।

निहन्त्यरीनेकपदे य उदात्तः स्वरानिव।। २।६५।

अत्रोदात्तेनानुदात्तविधानरूपं वैदिक-व्याकरण-प्रक्रिया-विज्ञानं विद्योतते।

अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।

शब्दविद्येव नो भाति राजनीतिरपस्पशा।। २।११२।

अत्र राजनीत्या सह शब्दविद्योपवर्णिता।

पद्येऽस्मिन् सभङ्गाभङ्गोभयात्मकरूपत्रिविधस्यापि श्लेषस्य मधुरः सङ्गमः।

उत्क्षिप्तगात्रः स्म विडम्बयन्नभः समुत्पतिष्यन्तमगेन्द्रमुच्चकैः।

आकुञ्चितप्रोहनिरूपितक्रमं करेणुरारोहयते निषादिनम्।। १२।५।

अत्र रोहेर्गत्यर्थत्वाद् "गतिबुद्धि-" (१।४।५२) इत्यादिना अणि कर्तुर्निषादिनः कर्मत्वम्। अत्र कर्त्रभिप्राये 'णिचश्च" (१।३।७४) इत्यात्मनेपदे सिद्धेऽपि प्रयोगवैचित्र्यस्याप्यलङ्कारादकर्त्रभिप्रायेऽपि "णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने" (१।३।६७) इत्यात्मनेपदम्। अणि कर्मणः करेणोरेवात्र ण्यन्ते कर्तृत्वात्तस्यैव चार्थात्कर्मत्वात्।

ननु यत्सग्रहणमनन्यकर्मार्थमित्युक्तं तेन कर्ममात्रनिषेधात् कथं निषादिनि कर्मण्यात्मनेपदम् ? । सत्यम्। अन्येषां मतम्। भाष्यकारस्य तु "दर्शयते भृत्यान् राजा" इत्युदाहरणादणि कर्तृकर्मव्यतिरिक्तकर्मण एव निषेधो विवक्षित इति कैयटः।

भाष्यकारपद्धतिमनुसृत्यात्र पद्ये तथा प्रयोगं विधाय महाकविः स्वकीयं प्रबलं व्याकरणवैदुष्यं द्रढ्यति।

संशयाय दधतोः सरूपतां दूरभिन्नफलयोः क्रियां प्रति।

शब्दशासनविदः समासयोर्विग्रहं व्यवससुः स्वरेण ते।। १४। २४।

अत्र महाकविना स्वरद्वारा-समासविग्रह-विधिर्विनिर्णयो भवतीति शब्दानुशासन-सिद्धान्तः प्रादर्शि। यथेन्द्रशत्रुरित्यत्रेन्द्रस्य शत्रुः शातयिता हन्तेति षष्ठी-तत्पुरुषः, उतेन्द्रः शत्रुर्यस्येति बहुव्रीहिरिति सन्देहः। पूर्वपदे उदात्तत्वेन बहुव्रीहिस्वरेण बहुव्रीहि - समासविनिश्चयः। एतेन लौकिकव्याकरणस्येव वैदिकव्याकरणस्यापि परिपुष्टं ज्ञान - मासीन्महाकवेरित्यायाति।

केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्मणि।

धातवः सृजति-संहृशास्तयः स्तौतिरत्र विपरीतकारकः।। १४।६६।

अत्र भगवन्महत्त्वप्रदर्शन-पुरस्सरं स्वकीयं शब्द-शास्त्रीयं वैदुष्यं प्रदर्शितं महाकविना।

अयं भावः –

सृज्, संहृ, शास्, इत्येवं त्रयो धातवो भगवद्विषये कर्तृवाचिन एव प्रत्ययान् दधति न कर्मवाचिनः अर्थात् भगवान् स्रष्टा संहर्ता शासिता च भवति। न च केनचिदन्येन भगवान् सृज्यते संह्रियते शिष्यते वा। स्तुधातुस्तु एतद्विपरीतः। अर्थात् स धातुः कर्मवाचिन एव प्रत्ययान् दधाति न कर्तृवाचिनः। एतेनेदमायातं यद्भगवान् न कमपि स्तौति अपि तु सर्वैः स्तूयत एव। इत्येवमतिसमासतो महाकवेर्व्याकरण-वैदुष्यं प्रदर्श्य विरम्यते।

अलङ्कारशास्त्रीय-तत्त्वान्यत्र समीक्ष्यन्ते–

काव्यलक्षणम्–

महावैयाकरणो महामहिमा मम्मटः "तदधीते तद्वेद" इति पाणिनीय-सूत्रस्थभाष्य-प्रामाण्येन "शब्दार्थौ काव्यम्" इति स्वीकरोति तथाऽयमपि महावैयाकरणः। तथोक्तं महाकविमाघेन "शब्दार्थौ सत्कविरिव" २।८६। इति।

कुत्र सङ्केतग्रहः–

"संकेतितश्चतुर्भेदो जात्यादिः" इति मम्मटपक्षः। चतुष्टयी शब्दानां प्रवृत्तिरिति भाष्योक्तेः। एवमेवास्यापि महाकवेः।

स्वयमेवोक्तमनेन–

असम्पादयतः कञ्चिदर्थं जातिक्रियागुणैः।

यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम्।। २। २७। इति।

रसनिष्पत्तिः–

"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति नाट्यशास्त्रकारस्य मुनेर्भरतस्य रसनिष्पत्ति-सूत्रम्। विविधाचार्यैरिदं बहुधा व्याख्यातम्। एतदीयं रहस्यं स्वल्पैरेव शब्दैः समुदीरितमस्ति महाकविना माघेन स्वकीये महाकाव्ये -

स्थायिनोऽर्थे प्रवर्तन्ते भावाः सञ्चारिणो यथा।

रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः।। २।८७। इति।

अत्र सञ्चारिपदं विभावादीनामप्युपलक्षणमवगन्तव्यम्। राजनीतिनैपुण्यविलसितो रसनिष्पत्तिप्रकारोऽयं प्रदर्शितः कस्य न भवति भवे भूयो मनस्तोषाय।

गुण-गणना–

यद्यपि वामनादिभिर्दशगुणाः श्लेषादयः समुदीरितास्तथाप्यालङ्कारिकैः संगतयुक्तिभिस्तान्निराकृत्य माधुर्यौजः प्रसादाख्यास्त्रय एव गुणाः संस्थापिताः। तत्रैव गुणत्रय-सिद्धान्ते ममायमपि महाकविरनुकूलः। स्वीये महाकाव्येऽयं वक्ति–

तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः।

नैकमोजः प्रसादो वा रसभावविदः कवेः।। २।८३ इति।

अत्रौजःप्रसादौ कण्ठरवेणोक्तौ। रसभावपदप्रभावान्माधुर्यं ग्राह्यं भवति।

रसनायकादिविमर्शः–

महाकाव्येऽस्मिन् शिशुपालवधे को नायकः कश्चाङ्गी रस इत्यादि पर्यनुयोगश्चेत्तदा तस्य समाधिरेकेनैव पद्येन तथा दीयते यथैकैकेनैव पद्येन

समस्तरामायणभागवतमहाभारतविषयसमाधिः सञ्जायते। यथा चार्धेनैव श्लोकेन वेदान्तसिद्धान्त-निष्कर्षः समुपस्थाप्यते। स च समाधिश्लोकः--

नेताऽस्मिन् यदुनन्दनः स भगवान् वीरप्रधानो रसः,
शृङ्गारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना।
इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसादः फलं
धन्यो माघकविर्वयं तुं कृतिनस्ततसूक्तिसंसेवनात्।। इति।

नायकादिविशेषभेदा अपि यत्र तत्र समुदाहृताः सन्ति एतस्मिन् महाकाव्ये, विस्तरभयान्नेह प्रपञ्च्यन्ते। रसा अप्यङ्गभूताः स्वयमूह्याः।

अलङ्कारझङ्कारः-

पदे पदेऽस्मिन्नलङ्कारझङ्कारः श्रूयते। विभिन्नभेदं यमकं नाम शब्दालङ्कारः षष्ठसर्गे सर्वत्र समुल्लसति। श्लेषालङ्कारः शिशुपालदूतसंभाषणप्रसङ्गे समुज्जृम्भते। अनुप्रासच्छटा प्रायः सर्वत्रैव। इति प्रधानशब्दालङ्कारसम्पद्विवेकः। प्रायोऽर्थालङ्काराः सर्व एवात्र समुल्लसन्त्येव। नात्र विचिकित्साचर्चालेशोऽप्युपयुज्यते।

रस एवात्र जीवितम्—

"वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्" इत्युक्तिः परमसत्या अत्र काव्ये। अत्र रसपदं वस्त्वलङ्कारव्यङ्ग्यस्याप्युपलक्षणम्। विविधप्रकारकव्यङ्ग्यार्थ परिपूर्णपदप्रयोगादेव कश्चिन्महाकविरिति भण्यते। तथा चोक्तमानन्दवर्धनाचार्येण - '''व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्व-पदलाभो महाकवीनाम्, न वाच्यवाचकरचनामात्रेण'' ''काव्यस्यात्मा स एवार्थः'' ''योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः'' ''प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्'' इत्यादि।

सोऽयं रसवस्त्वलङ्कारभेदेन त्रिविधो व्यङ्ग्यो माघमहाकाव्ये समुदाहृतोऽस्ति यथास्थलम्। एवमलङ्कारशास्त्रीयसर्वसम्पत्समन्वितस्य महाकाव्यस्य तत्कर्तुर्महाकवेश्च परमवैशिष्ट्यं भवत्येव सम्पन्नम्।

ऋतुप्रभात समुद्राद्यावश्यक-वर्णनीय-वस्तुवर्णनया शिशुपालवधमहाकाव्ये महाकवि माघकृते महाकाव्यलक्षणं साधु समन्वेति। सर्वथैवं महाकवेर्महाकाव्यस्य च वैशिष्ट्यं सिद्धमेवेतिशम्।

किं कालिदासो मिथिला-निवासी

अस्ति विहारस्योत्तरस्यां दिशि दरभंगाप्रमण्डले मधुबनीमण्डले बेनीपट्टीनामकेऽनुमण्डले उच्चैठनामा ग्रामः। यत्रास्ते अनुपलब्धलिखित-विस्तरेतिहासमपि परम्पराप्राप्तप्रसिद्धेतिहासम् लोकाकर्षणकेन्द्रम् सुप्रसिद्धम् उच्चैठभगवती-स्थानम्। तस्य पार्श्वे विद्यते अद्यापि कालिदासनामाभिहितपीठम्। परम्पराप्राप्तप्रवचनप्रमाणेन अत्रैव पीठे अधीयानः अत्यन्ताज्ञानः अतिमन्दमतिः मिश्रोपनामकः कश्चित् स्थानीयश्छात्रः, यो हि एकदा प्रावृषि भयङ्करायां तमिस्रायां घनघोरं गर्जति वर्षति मेघे योगाख्याया नद्याः पारे अवस्थिते देवीकालीमन्दिरे प्रदीपप्रज्वालनाय अलसैः स्वयं गन्तुमसमर्थैः पीठच्छात्रैः समुत्साहितः देवीसन्निधौ प्रदीपं प्रज्वालयितुं जगाम। भयङ्करवृष्टिकारणात् छात्रावासे तदानीं परावर्तितुं सोऽसमर्थो बभूव। प्राक्तनपुण्यप्रसादात् समुद्भूतपूर्वसंस्कारः स देवीमाराधयामास। प्रसन्ना देवी वरदाभवत्। मन्दमतिश्छात्रः कृतकृत्योऽभवत्। तदानीन्तनादेव कालात् स कालिदासेति नाम्ना प्रसिद्धोऽभूत्। क्रमेण स एव कविताकामिनीविलासः कविकुलगुरुः कालिदासः प्रसिद्ध इति कथयन्ति परम्पराप्रसारणे मिथिला-निवासिनो मनीषिणः।

पुरातने सर्वकारीये 'खतियौन' इति नाम्ना प्रसिद्धे भूसर्वेक्षाभिलेखे 'कालिदास-डीह' इति समुल्लेखो विषयमिमं प्रमाणयतितराम्। आधुनिक-तत्रत्य-कालिदास-महाविद्यालयः कालिदासस्मारक-समितिश्च इमं प्राचीनेतिहासं प्रचारयतितमाम्।

ऋतुसंहार - कुमारसंभव-रघुवंश-मेघदूत-विक्रमोर्वशीयमालविकाग्निमित्राभिज्ञान-शाकुन्तल - प्रणेता कालिदासः स्वरचनासु स्वसमयं स्वनिवासस्थानं च स्पष्टतः क्वापि नोदलिखदिति विजानते सर्वे विपश्चितः। फलतः अद्यापि एतादृशस्य महाकवेः समयो जन्मस्थानं च सन्दिग्धे स्तः। यद्यप्येतस्यैतत् फलं यद् महाकविकालिदासः सम्पूर्णभारतस्य, न कस्यापि प्रान्तविशेषस्य, तथापि समस्येयं विचारणीया समाधानीयेति विपश्चित ऊहापोहं कुर्वन्ति। अत्रापि कालिदासस्य समयः ख्रिष्टपूर्वप्रथमशतक-समुद्भवस्य विक्रमाब्दजनकस्य उज्जयिनी-नरेशस्य विक्रमादित्यस्य नवसु रत्नेषु अन्यतमत्वाद् यथानिश्चितप्रायस्तथा तस्य जन्मस्थानं न निश्चितम्।

महाकविकालिदासस्य जन्मस्थानप्रसङ्गे उपर्युक्तपरम्पराप्रमाणातिरिक्तं तस्य रचनामाधारीकृत्य मनीषिणः अधोनिर्दिष्टाभ्यन्तरप्रमाणं समुपस्थाप्य मिथिलां तस्य जन्मभूमिं निश्चिन्वन्ति।

१. मिथिला-मैथिल-मैथिली-विदेहाधिपतिशब्दानामनेकवारं प्रयोगः

सीतापितुर्जनकस्य कृते महाकविकालिदास-कृतः मैथिल[१]-विदेहाधिपति[२] शब्द-प्रयोगः, सीतायाः कृते मैथिली[३] शब्दप्रयोगस्तत्प्रसङ्गे मिथिलाशब्दप्रयोगश्च तस्य मिथिला-मैथिलविदेहप्रियतां संसूचयति, मिथिला-निवासित्वं च समर्थयति।

२. सीता-तिरस्कारासहिष्णुता

सीता-निष्कासनमसहमानस्य महाकवेः रघुवंशे अभिव्यक्तस्तादृशः क्षोभस्तस्य[४] मैथिलीं जानकीं प्रति यमात्मीयभावं संसूचयति, सोऽपि कविकुलगुरोः मिथिला-निवासित्वं समर्थयति।

३. जनकपुर-सीमन्तिनीनां शृङ्गारावर्णनम्

सीता-परिणय-प्रसङ्गे महाकविः जनकपुर-सीमन्तिनीनां शृङ्गार-वर्णनं न करोति; किन्तु मैथिली यदैव अयोध्यां प्रविशति, तां द्रष्टुकामानां तत्रत्यानाम् अङ्गनानां शृङ्गारमयं[५] वर्णनं करोति कविः। मेघदूते उज्ज्ञयिनी-वर्णन-प्रसङ्गे महाकविः तत्रत्यरमणी-लोलापाङ्गरमणमेव लोचनफलं मनुते[६]। एवं हि मिथिलाभूमि-भिन्नानां नारीणां

---

१. तं न्यमन्त्रयत सम्भृतक्रतुर्मैथिलः स मिथिलां व्रजन् वशी (रघुवंशे ११।३३)
मैथिलाय कथयाम्बभूव सः - तत्रैव ११।३७।
वीर्यशुल्कमभिनन्द्य मैथिलः - तत्रैव ११।४७।
मैथिलः सपदि सत्यसागरः - तत्रैव ११।४८।
कार्मुकाभिहरणाय मैथिलः - तत्रैव ११।४३।
अध्वसु त्रिषु विसृष्टमैथिलः - तत्रैव ११।२।

२. तौ विदेहनगरीनिवासिनाम् - तत्रैव ११।३६।
बभौ तमनुगच्छन्ती विदेहाधिपतेः सुता-तत्रैव १२।२६।

३. पुरमविशदयोध्यां मैथिलीदर्सिनीनाम् - तत्रैव ११।३६।
जनकतनया स्नानपुण्योदकेषु (पूर्वमेघे) इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा (मेघदूते उत्तरे ३७)
मैथिली-तनयोद्गीतनिःस्पन्दमृगमाश्रमम् (रघुवंशे १५।३७)
मैथिलेयो यथाविधि - तत्रैव १५।३१।

४. वाच्यस्त्वया मद्वचनात् स राजा वह्नौ विशुद्धामपि यत् समक्षम्।
मां लोकवादश्रवणादहासीः श्रुतस्य किं तत् सदृशं कुलस्य।। (रघुवंशे १४।६१)

५. रघुवंशे ११।६३।

६. वक्रः पन्था .... लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि। (पूर्वमेघदूते- २७) तत्रैव २८। २९। ३१। ३७। ३८। ४१।

तथाविधशृङ्गारवर्णनम्, मिथिलानिवासिनीनां शृङ्गारस्य अवर्णनं च महाकवेः मिथिलामातृभूमित्वं प्रकटयति।

४. मिथिला-प्रचलितप्रथानुसारेण हिमालयवर्णनम्

महाकविः कुमारसंभवे[१], रघुवंशे[२], विक्रमोर्वशीये[३], अभिज्ञानशाकुन्तले[४] च हिमालयं सजीवं देवतात्मरूपेण वर्णयति। मिथिला-जन-जीवने, विद्यापतिगीतेषु, मिथिला-लोकगीतेषु यथा हिमालयो मेनायाः पतिरूपेण, गिरिजायाः पितृरूपेण शिवस्य श्वसुररूपेण च वर्ण्यते, तथैव कालिदासेन स्वरचनासु हिमालयो नगाधिराजो वर्ण्यते। एवंविधवर्णनं कालिदासस्य हिमालय-निकटवर्ति-मिथिलास्थानं स्वजन्मभूमिस्थानमिति प्रकाशयति।

५. मिथिला-विविध-व्यवहार-वर्णनम्

(क) मिथिलायां बाला यथा पूजोपकरणानि पुष्पादीनि स्वयमाहरन्ति, तथैव कालिदासस्य गिरिजा हिमालयस्य निदेशेन पूजासामग्रीमाहरति[५]।

(ख) गिरिशेन सह गिरिजायाः पाणिग्रहणं मिथिलाया विवाह-पद्धतिमनुसरति। मिथिलायां विवाहात् पूर्वं कन्यायाः सर्षपदूर्वादलादिभिः प्रसाधनं क्रियते, पश्चादुद्वर्तनलेपो विधीयते, घटजलेन स्नानं च कार्यते। ततः परं गोरोचनादिना तस्याः प्रसाधनं विधाय मातृका-पूजार्थं कुलदेवतागृहे सा आनीयते। गिराजायाः विवाहात् पूर्वमेव प्रसाधनं विधीयते[६]। एतद्धि मिथिला-विवाहपरिपाटीसमनुसरणं महाकवेः मिथिलानिवासित्वं प्रमाणयति।

---

१. अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः। (कुमारसंभवे - १।१) तत्रैव अन्येऽपि विविधाः श्लोकाः प्रसंगाश्च।

२. रघुवंशे द्वितीये सर्गे, चतुर्थसर्गे - ७६।

३. विक्रमोर्वशीये चतुर्थाङ्के।

४. अभिज्ञानशाकुन्तले सप्तमाङ्के।

५. अनर्घ्यमर्घ्येण तमद्रिनाथः स्वर्गौकसामर्चितमर्चयित्वा।
आराधनायास्य सखीसमेतां समादिदेश प्रयतां तनूजाम्।। (कुमारसंभवम् - १।५८)
अवचितबलिपुष्पा वेदिसंमार्गदक्षा नियमविधिजलानां बर्हिषां चोपनेत्री।
गिरिशमुपचार प्रत्यहं सा सुकेशी नियमित-परिखेदा तच्छिरश्चन्द्रपादैः।। (तत्रैव - १।६०)

६. सा गौरसिद्धार्थनिवेशवद्भिर्दूर्वाप्रवालैः प्रतिभिन्नशोभम्।
निर्नाभि कौशेयमुपात्तबाणमभ्यङ्गनेपथ्यमलञ्चकार।। (तत्रैव ७।७)
विन्यस्तवैदूर्यशिलातलेऽस्मिन्नाबद्धमुक्ताफलभक्तिचित्रे।
आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयांबभूवुः।। (तत्रैव ७।१०)

(ग) अधिमिथिलमद्यापि विवाहकाले कन्या लाजाहोमं विधाय होमाग्निधूमं जिघ्रति, तथैव पार्वती वैवाहिकाग्नौ लाजै[१]र्होमं विधाय होमधूमं[२] जिघ्रति। एतदपि मिथिला-व्यवहारानुसरणं कालिदासस्य मैथिलत्वं सूचयति।

(घ) मिथिलायां विवाह-विधि-समाप्त्यनन्तरं यथा एकासने वरेण सह स्थितां वधूं प्रति दूर्वाक्षतदानैराशीर्विधीयते, तथैव पाणिग्रहणानन्तरं पार्वती-परमेश्वरयोः चतुरस्रवेद्याम् आर्द्राक्षतैराशीर्विधानमवलोक्यते[३]।

(ङ) मिथिलायां विवाहात् परं चतुर्थीकर्मसमाप्तेः पूर्वं वर-वध्यौ कौतुकागारे यथा भूमावेव शयाते, तथैव उमा-महेश्वरौ कौतुकागारे क्षितिविरचितशय्यां शयाते[४]।

(च) मिथिलायां यथैव वरो वध्वा हस्तमाददानः कौतुकागारमागच्छति, तथैव गिरिशो गिरिजायाः करमाददानः कौतुकागारमागच्छति[५]। एतद्विशिष्टमिथिला-व्यवहारानुसरणं कालिदासस्य मिथिलानिवासित्वं प्रमाणयति।

(छ) भारतवर्षे प्रायः मिथिलायामेवेयं परिपाटी यद् विवाहात् परं वरः श्वशुरालये बहूनि दिवसानि निवसति। वृषध्वजोऽपि शैलराजभवने विवाहात् परं मासं यावन्निवसति[६]। एतद्विशेषव्यवहारानुसरणं महाकवेर्मैथिलत्वं प्रकटयति।

(ज) मिथिलायामद्यापि विधिरयं प्रचलितोऽस्ति यद् विवाहविधसमाप्त्यन्तरं वरेण प्रयुज्यमाना वधूः ध्रुवदर्शनं करोति, 'ध्रुवो दृष्ट' इति चोच्चारयति। एवमेव पार्वती विवाहान्ते 'ध्रुवदर्शनं करोति' 'दृष्ट' इति चोच्चारयति[७]। किमिदं कालिदासस्य मिथिलावासित्वं न प्रमाणयति ?

---

१. तौ दम्पती त्रिः परिणीय वह्निमन्योन्यसंस्पर्श-निमीलिताक्षौ।
स कारयामास वधूं पुरोधास्तस्मिन् समिद्धार्चिषि लाजमोक्षम्।। (तत्रैव ७।८०)

२. स लाजधूमाञ्जलिमिष्टगन्धं गुरुपदेशाद् वदनं निनाय।। (तत्रैव ७।८१)

३. क्लृप्तोपचारां चतुरस्रवेदीं तावेत्य पश्चात् कनकासनस्थौ।
जायापती लौकिकमेषणीयमार्द्राक्षतारोपणमन्वभूताम्।। (तत्रैव ७।८८)

४. अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य क्षितिवरपतिकन्यामाददानः करेण।
कनककलशयुक्तं भक्तिशोभासनाथं क्षितिविरचितशय्यं कौतुकागारमागात्।।। (तत्रैव ७।९४)

५. क्षितिधरपतिकन्यामाददानः करेण। (तत्रैव ७।९४)

६. एवमिन्द्रिय-सुखस्य वर्त्मनः सेवनादनुगृहीतमन्मथः।
शैलराजभवने सहोमया मासमात्रमवसद् वृषध्वजः।। (तत्रैव ८।२०)

७. ध्रुवेण भर्त्रा ध्रुवदर्शनाय प्रयुज्यमाना प्रियदर्शनेन।
सा दृष्ट इत्याननमुन्नमय्य ह्रीसन्नकण्ठी कथमप्युवाच।। (तत्रैव ७।८५)

(झ) यथा मिथिलायां बालानामक्षरारम्भो भूमावेव क्रियते, तथैव रघोरपि राजकुमारस्य अक्षरारम्भः भूपृष्ठ[१] एव भवति स्म। एतद्वर्णनमपि कालिदासस्य मैथिलत्वं सूचयति।

(ञ) अधिमिथिलं स्निग्धो जन ओदकान्तमनुगम्यत इति प्रथा प्राचीनकालादद्यापि प्रचलति। शकुन्तला यदा हस्तिनापुरं गच्छति, महर्षिकण्वस्तामनुगच्छति सरस्तीरपर्यन्तम्[२]। ततः स परावर्तते। एतन्मिथिला-प्रथानुसरणं कालिदासस्य मिथिलावासित्वं समर्थयति।

(ट) मिथिलायां दुहितृ-द्विरागमनसमये दुहितुर्भ्राता भगिन्या सह भगिनी-पतिगृहपर्यन्तं गच्छति। इयं परिपाटी पुरातनकालादधुनापि प्रचलति। शार्ङ्गरवमिश्रः शकुन्तलया सह हस्तिनापुरं यावद् अनुव्रजति[३]। एतदपि कालिदासस्य मैथिलत्वं प्रमाणयति।

(ठ) अधिमिथिलं तरुच्छायायां स्थिताः शिशवो गुप्तमणिसंज्ञक-बालक्रीडामद्यापि कुर्वन्ति, यत्र हस्तेषु सिकतां नीत्वा निमीलितनेत्राः क्रियद्दूरे ताः (सिकताः) संस्थापयन्ति। पश्चाद् उन्मीलितनेत्राः तासु सिकतासु गुप्तं द्रव्यमन्वेषयन्ति। इमामेव बालक्रीडां महाकविः मेघदूते[४] अलकावर्णनप्रसङ्गे प्रदर्शयति। 'रत्नादिभिर्वालुकादौ स्मृतौ दैशिककेलयः' इति मल्लिनाथेन कृतमेतस्य व्याख्यानम्। अत इदं दैशिकक्रीडनकमेवेति निश्चितम्। मिथिलायां प्रचलितस्यास्य क्रीडनकस्य वर्णनेन कालिदासस्य मिथिलावासित्वं सूच्यते।

(ड) महाकविः अधरसौन्दर्यवर्णने मिथिलायां 'तिलकोड़' इति नाम्नातिप्रसिद्धं बिम्बफलम् अधरोपमानरूपेण बहुशो निर्दिशति।[५] यस्यानुहरणं विद्यापति-प्रभृतिभिः कविभिरपि कृतम्। एतदपि वर्णनं कालिदासस्य मैथिलत्वं समर्थयति।

---

१. न्यस्ताक्षरामक्षरभूमिकायां कार्त्स्न्येन गृह्णाति लिपिं न यावत्।
सर्वाणि तावच्छ्रुतवृद्धयोगात् फलान्युपायुङ्क्त स दण्डनीतेः।। (रघु० १८।४६)

२. भगवन् ! ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र सन्दिश्य प्रतिगन्तुमर्हसि। (अ० श० चतुर्थाङ्के)

३. अभिज्ञानशकुन्तले चतुर्थाङ्के।

४. अन्वेष्टव्यैः कनक-सिकता-मुष्टि-निक्षेप-गूढैः।
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः।। (उत्तरमेघे - ४)

५. नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणम्। (तत्रैव - ५)
पक्व-बिम्बाधरोष्ठी। - तत्रैव १६
उमामुखे बिम्बफलाधरोष्ठे। (कुमारसंभवे- ३।६७)

(ढ) कुमारसम्भवे गौरीशंकर-विवाह-प्रसङ्गे महाकविः महाकोशीप्रपातस्य चर्चां करोति। इदं हि महाकोशी-प्रपातस्थानं मिथिलायाः प्रसिद्धं तीर्थं वाराहक्षेत्रम्, यत्र हिमालयाद् निःसरन्त्यः सप्त नद्यो महाकोशीति नाम्ना प्रसिद्धाः प्रथमं मिलित्वा त्रिवेणीरूपेण पश्चात् प्रपातरूपेण नीचैरागच्छन्त्यः एकाकारा भवन्ति, या एवाग्रे कोशी कौशिकी वा प्रसिद्धाः। अयमेव महाकोशीप्रपातो यत्र सप्तर्षीणां व्योमगङ्गास्नानं वर्ण्यते महाकविना। अत्र महावराहदंष्ट्रा[1] प्रसिद्धतीर्थम्-वाराहक्षेत्रम् स्मारयति। महाकवेरेतद् वर्णनं मिथिला-निवासित्वमभिव्यनक्ति।

(ण) ऋतुसंहारे ग्रीष्मर्तुवर्णने सभद्रमुस्तस्य[2] परिशुष्ककर्दमस्य सरसो वर्णनं ग्रीष्मकालिकमिथिलां निर्दिशति।

(त) प्रावृड्वर्णने इन्द्रगोपकैः शुक्लेतर-रत्न-भूषिता वसुन्धरा भवतीति कथनम्।

(थ) निम्नाभिमुखस्य नवोदकस्य भुजङ्गवद् वक्रगति-प्रसर्पण[3]-वर्णनं च संसूचयति, यत् कालिदासेन प्रावृट्-कालीन-मिथिला साक्षाद् व्यलोकि। अत एव तथाविधं सूक्ष्म-वर्णनं तेन कृतम्।

(द) शरद्वर्णने काशस्य[4] महाकविना कृतं वर्णनं हेमन्त-शिशिरयोर्विभिन्नरूपाणां शालीनां[5] वर्णनं महाकविः मिथिला-प्रदेशेन सह घनिष्ठ-परिचयं सूचयति। शालीनां तानि रूपाणि मिथिलायां स्वाभाविकरूपेण प्राप्यन्ते।

(ध) जनकवंशस्य शासनानन्तरं मिथिला मगधसाम्राज्ये समागता। अत एव कालिदासेन मगधाधिपस्य तथाविधं सादरं वर्णनमकारि। रघोः दिग्विजयवर्णन-प्रसङ्गे मगधनरेशस्य पराजयो नादर्शि। न केवलमेतावदेव इन्दुमती-स्वयंवर-प्रसङ्गे महाकविना

---

१. महाकोशी प्रपातेऽस्मिन् सङ्गमः पुनरेव नः। (कुमारसंभवे ६।३३)
आसक्तबाहुलतया सार्द्धमुद्धृतया भुवा।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि।। (तत्रैव ६।८)

२. आप्लुतास्तीर-मन्दार-कुसुमोत्करवीचिषु।
व्योमगङ्गाप्रवाहेषु दिङ्नागमदगन्धिषु।। (तत्रैव ६।५)
सभद्रमुस्तं परिशुष्ककर्दमं सरः खनन्नायतपोत्रमण्डलैः।
रवेर्मयूखैरभितापितो भृशं वराहयूथो विशतीव भूतलम्।। (ऋतु सं० -१।१७)

३. विपाण्डुरं कीटरजस्तृणान्वितं भुजङ्गवद् वक्रगति-प्रसर्पितम्।
स साध्वसैर्नैककुलैर्निरीक्षितं प्रयाति निम्नाभिमुखं नवोदकम्।। (तत्रैव २।१३)

४. काशांशुका विकचपद्म-मनोज्ञ-वक्त्रा सोन्मादहंस-रव-नूपुरनादरम्या।
आपक्वशालि रुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या।

५. प्रफुल्ललोध्रः परिपक्वशालिः नवप्रवालोद्गमसस्यरम्यः।
विलीनपद्मः प्रपतत् तुषारे हेमन्तकालः समुपागतोऽयम्।। (तत्रैव ४।१)
परिणतबहुशालि-व्याकुलग्रामसीमा। (तत्रैव ४। १६)
प्ररूढशालीक्षुचयावृतक्षितम्। (तत्रैव ५।१)

ससम्मानं सर्वप्रथमस्थानं मगधनरेशायैव[1] अदायि। मगधराजः प्रसिद्ध-पराक्रमः शरणागतवत्सलः परन्तपः राजन्वान्[2] प्रजारञ्जनराजेत्यादिभिर्विशेषणैर्महाकविना सश्रद्धं विभूषितः। अन्येषां च पूर्वदिग्-वर्तिनां भूभृतां पराजयः प्रदर्शितः[3]। एतद्धि महाकवेः स्वदेशनरेशं प्रति सम्मानं सूचयति।

(न) यदि नाम कालिदासः उज्ञयिनी-निवासी अभविष्यत्, तर्हि सर्वप्रथमं स्वयंवर-प्रसङ्गे स्वदेशनरेशस्यैव वर्णनमकरिष्यत्। एतत् प्रसङ्गे च अवन्तिनाथस्य वर्णने--

"तामिस्रपक्षेऽपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान्" इत्येवं रूपेण प्रियाभिः सह अयं नरेशः निर्विशतीति पतिंवरा-भावप्रतिकूलरूपेण वर्णनं नाकरिष्यत्।

एवं हि मगधाधिपं प्रति सम्मानस्य अवन्तिनाथं प्रति अतथाविधभावस्य प्रदर्शनात् कालिदास-मगध-साम्राज्यान्तर्गत-मिथिलां स्वजन्मनः विभूषयाञ्चकारेत्यनुमीयते[4]।

एवं हि परम्पराप्राप्तप्रमाणेन, 'कालिदासडीह' इति भूसर्वेक्षणे अङ्कितेन, विविध-मिथिला-व्यवहार-वर्णनेन, मिथिला-मैथिल-मैथिलीं प्रति अत्यन्तानुरागेण, समादरेण पूर्वप्रदर्शितविभिन्नप्रमाणैश्च महाकवेः कालिदासस्य जन्मभूमिर्मिथिलेति प्रतिपादयन्ति विवेकिनो मिथिलामनीषिणः।

प्रख्यातकविकर्मकौशलस्य कालिदासस्य पश्चाद् गुणग्राहिणो विक्रमादित्यस्य उज्ञयिनी-नरेशस्य नवसु रत्नेषु अन्यमतमत्वाद् उज्ञयिनीकर्मभूमिरभूदिति विद्वांसो निश्चिन्वन्ति इति शम्।

---

१. प्राक्सन्निकर्षं मगधेश्वरस्य नीत्वा कुमारीमवदत् सुनन्दा।। (रघुवंशे ६।२०)

२. असौ शरण्यः शरणोन्मुखानामगाधसत्त्वो मगधप्रतिष्ठः।
राजा प्रजारञ्जनलब्धवर्णः परन्तपो नाम यथार्थनामा।।
कामं नृपाः सन्तु सहस्रशोऽन्ये राजन्वतीं त्वाहुरनेन भूमिम्।
नक्षत्रताराग्रहसङ्कुलापि ज्योतिष्मती चन्द्रमसैव रात्रिः।। (रघुवंशे - ६।२१।२२-२४)

३. तत्रैव - ६।३०।५३।४६।

४. रघुवंशे - ६।३४।

देशस्य एकतायां संस्कृतस्य योगदानम्

भारतीया वैदेशिकाश्च मनीषिणो न केवलं पुराकाले अधुनापि मन्यन्ते यत् संस्कृतभाषायां वस्तुतः एतादृशी विशिष्टता वर्तते यां सुविज्ञाय जना विचाराचारेण संस्कृताः सुसंश्लिष्टाश्च भवन्ति। संस्कृत-भाषाप्रधानं भारतं भारतमासीदिति प्रमाणयन्ति इतिहासविदः।

संस्कृतभाषा संश्लेषणात्मिका

सन्धि-द्वारा एकत्वमानीयते, समासद्वारा एकपदीभवनं जायते। अस्या इदं वैशिष्ट्यम् नोपलभ्यते क्वाप्यन्त्र। आधुनिक-भारतीय-भाषाः वैदेशिकभाषाश्च विश्लेषणात्मिकाः, फलतः विश्लिष्टत्वं तासां स्वभावः। संश्लिष्टतया पारस्परिक सम्बन्धो दृढो भवति, विश्लिष्टतया स च सम्बन्धो विच्छिन्नो भवति। अतः संश्लिष्टेयं संस्कृतभाषा समानभावेन देशव्यापिनी एकस्मिन् सूत्रे देश-प्रदेश-मणीन् ग्रन्थयन्ती राष्ट्रस्य एकताया अखण्डतायाश्च संरक्षणे अद्वितीयं साधनम् नान्या भाषा तथाविधा 'स्वयमसिद्धः परान् कथं साधयेत्' इति नियमात्।

भाषा भावाभिव्यक्तेः साधनम्

तच्च साधनत्वं यथा संस्कृते तथा नास्ति अन्यस्यां भाषायाम्। सरलस्य संमिश्रस्य च, एकार्थस्य अनेकार्थस्य च अभिव्यक्तिः यथा संस्कृतभाषया भवति न तथा भाषान्तरेण, अतः विशालस्यास्य भारत-राष्ट्रस्य विभिन्नेषु प्रदेशेषु संस्कृतभाषाया महत्त्वपूर्णं स्थानमासीत् राष्ट्रञ्च एकमखण्डं सुदृढं सुसम्बद्धमासीत्।

तेलगु-तमिल-कन्नड़-मलयालम, मराठी, कोङ्कणी गुजराती बंगभाषा पंजाबीत्यादि भाषाः यथा प्रदेश विशेषाणाम् न तथा संस्कृतं कस्यापि प्रदेश-विशेषस्य, अपि तु इयं भाषा सम्पूर्णराष्ट्रस्य। अतः सर्वत्र शब्दार्थयोरेकरूपता। सम्पूर्णराष्ट्रस्य समानभावेन योगक्षेम-वहन-शक्तिः। एकतायाः सम्पादनस्य अखण्डतायाः परिरक्षणस्य च अस्यां भाषायामपूर्व सामर्थ्यम्। इदमेव कारणं विद्यते स्वातन्त्र्योत्तरकाले भारतसर्वकारेण संघटिता विभिन्ना आयोगाः संस्कृतस्य उपर्युक्तवैशिष्ट्यं रहस्यञ्च समुद्घाट्य भारते संस्कृतशिक्षणस्य अनिवार्यत्वं प्रत्यपादयन्।

दौर्भाग्यमिदं यद्यपि तत् प्रतिवेदनं कार्यान्वितं नाभवत्। त्रिभाषासूत्रे संस्कृतं स्वकीयं समुचितं स्थानं देशहिताय नावाप्नोत्। फलतः राष्ट्रस्य दुरवस्था इदानीं सर्वैः अवलोक्यते। राष्ट्रविरोधिनः राष्ट्रं खण्डं खण्डमनेकधा विभक्तुं प्रयतन्ते।

त्रिभाषासूत्रमिदानीम् क्षेत्रीय-भाषा, हिन्दी-भाषा, आङ्गलभाषा इति भाषा त्रयस्यैव पाठ्यक्रमे विधानं करोति। अतः हिन्दी-भिन्न-भाषा-भाषि क्षेत्रे क्षेत्रीयभाषा, हिन्दीभाषा आङ्गलभाषा इत्येतासामेव तिसृणां मुख्यतः शिक्षणं भवति। हिन्दीभाषि-क्षेत्रे च आग्रहोऽस्ति हिन्दी-भिन्नाया कस्याश्चिदेकस्या भारतीय-क्षेत्रीयभाषायाः समावेशस्य। तेन हिन्दी भाषा, हिन्दीतर क्षेत्रीयभाषा, आङ्गलभाषा इति भाषात्रयी शिक्ष्यते। यत्र च एतादृशाग्रहो नाङ्गीक्रियते तत्र आङ्गल-हिन्दीभाषाभ्यां सह संस्कृतस्य समावेशो वर्तते। किन्त्वेतत्सूत्रे संस्कृतभाषा-शिक्षणस्य अनिवार्यता नास्ति। इदानीं देशे भाषा-शिक्षण-विषये वस्तुस्थितिस्त्वीदृशी--

आन्ध्रप्रदेशे--तेलगुभाषा, आङ्गलभाषा, हिन्दीभाषा अनिवार्यरूपेण संस्कृतभाषा ऐच्छिकरूपेण।

आसामप्रदेशे--असमियाभाषा तथा आङ्गलभाषा अनिवार्यरूपेण संस्कृतं हिन्दी वा ऐच्छिकरूपेण।

कर्णाटकप्रदेशे--कन्नड भाषा अनिवार्यरूपेण, संस्कृत सहितानां कन्नड भिन्नानाम् आधुनिकभारतीयभाषाणां मध्ये केचिद् द्वे भाषे ऐच्छिकरूपेण।

केरलप्रदेशे--मलयालम भाषा, आङ्गल भाषा हिन्दी भाषा च अनिवार्यरूपेण संस्कृतं चतुर्थभाषा ऐच्छिकरूपेण यदि पञ्चदशभ्यः अधिकाश्छात्रास्तथेच्छन्ति।

महाराष्ट्रप्रदेशे -- मराठी तथा आङ्गली अनिवार्यरूपेण, संस्कृतं, हिन्दी, संस्कृत मिश्रितहिन्दी वा काचिदेका भाषा ऐच्छिकरूपेण।

उत्कलप्रदेशे--उडियाभाषा, आङ्गलभाषा च अनिवार्यरूपेण, संस्कृतम्, अथवा हिन्दी पुनराङ्गली वा ऐच्छिकरूपेण।

पञ्जाबप्रदेशे--आङ्गल भाषा हिन्दी च अनिवार्यरूपेण, संस्कृतं पञ्जाबी तृतीय भाषा ऐच्छिक रूपेण।

पश्चिमबङ्गे--बङ्गीयभाषा आङ्गलभाषा च अनिवार्यरूपेण, संस्कृतं हिन्दी वा ऐच्छिकरूपेण (किन्तु पञ्चमवर्गात् नवमं यावत् संस्कृतस्य अनिवार्यत्वम्।)

तमिलनाडु-प्रदेशे—तमिलभाषा, हिन्दी, आङ्गलभाषा च अनिवार्यरूपेण (संस्कृतस्यात्र किमपि स्थानं नास्ति)

बिहारप्रदेशे--प्राथमिककक्षायां संस्कृतम् अनिवार्यरूपेण, ततः परम् ऐच्छिकरूपेण।

उत्तरप्रदेशे—माध्यमिककक्षायाम् संस्कृतस्य अनिवार्यत्वं नास्ति ऐच्छिकत्वमेव।

हरियाणा-प्रदेशे--आङ्गल भाषा हिन्दी च अनिवार्यरूपेण संस्कृतम् पञ्जाबी वा ऐच्छिकरूपेण शिक्ष्यन्ते।

दिल्ली-गुर्जर-मध्यप्रदेशेषु माध्यमिककक्षायां संस्कृतस्य ऐच्छिकत्वमेव। जम्मू-कश्मीर-प्रदेशे तु संस्कृतशिक्षणस्य दुःस्थितिरतीव दुःखावहा। भारतस्य अन्यप्रदेशेषु सीमावर्तिषु संस्कृतमुपेक्षितमेव। एतांवता इदं निश्चीयते यत् माध्यमिककक्षायां संस्कृतस्य अनिवार्यता देशे क्वापि नास्ति। अतः त्रिभाषासूत्रे संस्कृतस्य समुचितं स्थानं परमावश्यकं, येन सर्वेऽपि भारतीयाः संस्कृतस्य वैशिष्ट्यम् अधुनापि तस्य योग-क्षेम-सामर्थ्यञ्च विजानीयुः।

देशस्य सांस्कृतिक-धार्मिक कृत्येषु यज्ञाद्यनुष्ठानेषु च एकरूपतां विधातुं संस्कृतस्य यद् योगदानं पुरा आसीत् तदिदानीमपि वर्तते। पूर्वोत्तर-पश्चिम-दक्षिण-दिग्विभागेषु स्थापितैः विभिन्नैः धाम-पीठाश्रमैः यदेकता देशे समानीता तत्रापि संस्कृतभाषाया एव मुख्यं योगदानमित्यभिजानन्ति विपश्चितः। अतः राष्ट्रियभावनायाः सुदृढीकरणाय देशस्य एकताया अखण्डतायाश्च संरक्षणाय संस्कृतस्य विहितम् अविस्मरणीयं योगदानमद्यापि सर्वैः विज्ञातव्यमित्येतदर्थं च समुचित उपायो विधेय इतिशम्।

संस्कृतस्योपेक्षया राष्ट्रस्य विघातः

विश्वस्य प्राचीनतमेयं समृद्धभाषा संस्कृतभाषा, यस्यामादिकालात् महामनीषिणां गम्भीरचिन्तन - मनन-निदिध्यासनानां फलस्वरूपाः, धर्म-दर्शन-साहित्य- व्याकरणच्छन्दः कोषाः, मानवजीवनोपयोगि-समस्त-विद्याः कलाश्च विद्यमानाः सन्ति। स्वनिष्ठ-वैशिष्ट्येन स्वकीय-माधुर्येण स्वनिहित-विविध-विषय-गाम्भीर्येण च न केवलं भारतीयानाम् अपि तु वैदेशिकानामपि मनीषिणां मनांसि संस्कृतं समाकर्षत् समाह्लादयच्च।

महर्षिभिरन्वाख्यातेयं संस्कृतं नाम दिव्या मनोहरा वाक् कथमिदानीं तथा नाद्रियते?

"अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम्।"

"न जाने वर्तते कीदृङ् माधुर्यमिह संस्कृते।
सर्वदैव समुन्मत्ता येन वैदेशिका वयम्।।"

इत्येवं प्रकारेण भारतीयैर्वैदेशिकैश्च स्वीकृतापि भाषेयं कथमिदानीं समाजे स्व-सुप्रतिष्ठितं महत् स्थानं न लभते ?

अतिप्राचीनकालात् प्रवहमानापि संस्कृत-धारा अद्यापि मातेव दुहितरं क्षेत्रीय-भाषोपधारां पुष्णाति, लालयति, पालयति, संवर्धयति च। अद्यापि संस्कृतभाषायां शतशः गद्य-पद्य-मिश्र-चम्पूमयानि काव्यानि, महाकाव्यानि, शोधात्मकानि आलोचनात्मकानि च पुस्तकानि निर्मीयन्ते, दैनिक-साप्ताहिक-पाक्षिक-मासिक-त्रैमासिक-षाण्मासिक-वार्षिक-पत्र-पत्रिकादीनि प्रकाश्यन्ते, येन संस्कृतभाषाया भारतीय-जन-जीवनेन सह न केवलं रागात्मक-सम्बन्धो विद्यते अपि तु व्यावहारिक सम्बन्धोऽपि वरीवर्तीति निश्चीयते। अद्यापि सम्पूर्णे भारते धार्मिक-सांस्कृतिक-कार्य कलापः संस्कृत-माध्यमेन भवतीति वर्तमानजीवन-धारया सह संस्कृतस्य अविच्छिन्नसम्बन्धं प्रकटयति। संस्कृतभाषाद्वारैव विश्वस्मिन् तुलनात्मक-भाषाशास्त्रस्य प्रकाशः विकासश्च अभूतामिति भाषाविदो विदन्ति।

संस्कृतस्य वैशिष्ट्यमवलोक्यैव संस्कृतायोगेन एतज्ज्ञानस्य अनिवार्यता प्रतिपादिता। राजनीति-निपुणाः महात्मा गान्धी, देशरत्न राजेन्द्र प्रसादः, पं० जवाहर लाल नेहरू महोदयः, राजगोपालाचारमहाशयः, अणे-काटजू-श्रीप्रकाशायंगर - प्रभृतयो

मनीषिणश्च संस्कृतज्ञानस्य समेषां कृते अनिवार्यतां समुदघोषयन्। एतेन संस्कृतस्य विशिष्टता, महत्ता, व्यावहारिकता, जीवनोपयोगिता अपरिहार्यता च सुस्पष्टा।

यदि नाम संस्कृतभाषा एवं गुण-विशिष्टा भारतीयानां च कृते अपरिहार्या तर्हीयं कथमपि नोपेक्षणीया। त्रिभाषासूत्रे अस्याः समावेशः करणीय एव, नवीनशिक्षानीतौ च अस्यै समुचितं स्थानं दातव्यमेव।

त्रिभाषा-सूत्रमिदानीं क्षेत्रीय भाषा, हिन्दी भाषा आङ्गल-भाषा इति भाषा-त्रयस्यैव पाठ्यक्रमे विधानं करोति। अतः हिन्दी-भिन्न-भाषा-भाषि-क्षेत्रे क्षेत्रीय-भाषा, हिन्दी भाषा आङ्गल भाषा इत्येतासामेव तिसृणां मुख्यतः शिक्षणं भवति। हिन्दी क्षेत्रे च दुराग्रहोऽस्ति हिन्दी भिन्नायाः कस्याश्चिदेकस्या भारतीय क्षेत्रीय भाषायाः समावेशस्य। तेन हिन्दी भाषा, हिन्दीतर भारतीय-क्षेत्रीय भाषा, आङ्गल भाषा इति भाषात्रयी शिक्ष्यते। यत्र च एतादृशाग्रहो नास्ति तत्र आङ्गल-हिन्दी-भाषाभ्यां सह संस्कृतस्यापि समावेशो वर्तते। किन्त्वेतत्-सूत्रे संस्कृत-भाषा-शिक्षणस्य अनिवार्यता नास्ति।

इदानीं देशे कस्मिंश्चिदपि प्रदेशे माध्यमिक-कक्षायां संस्कृतस्य अनिवार्यता न विद्यते। यत्रापि ऐच्छिकत्वं तत्रापि दशमवर्गीय-परीक्षायामुत्तीर्णताया अनिवार्यत्वं नास्ति, फलतः संस्कृताध्ययनमुपेक्षितं विद्यते।

भारतीयसंविधाने राष्ट्रस्य एकताम् अखण्डताम्, भावनात्मकैकताञ्च सुदृढां कर्तुमेव क्षेत्रीय-भाषाभिः सह संस्कृतस्य समावेशो विहितोऽस्ति। क्षेत्रीय-भाषाणामधिक प्रचार-प्रसारेण राष्ट्रीयैकता दुर्बला भवति। फलतः राष्ट्रं दुर्बलं भवति। संस्कृतं कस्यापि क्षेत्र-विशेषस्य भाषा नास्ति, अतः सम्पूर्ण-राष्ट्रस्य भाषा वर्तते। राष्ट्रस्य एकतायामखण्डतायां यथा संस्कृत-भाषा सहायिका तथा न काचिदन्या। अत एव संविधानविधातृभिः अष्टमानुसूच्यां संस्कृतं परिगृहीतम्, अतः संस्कृतस्य विकासाय प्रशासकीयप्रोत्साहनमावश्यकम् येन संस्कृतं स्वाभाविक-वैशिष्ट्य-बलेन राष्ट्रमेकसूत्रे आबध्नीयात्। यतो हि संस्कृतं कस्यापि क्षेत्र-विशेषस्य भाषा नास्ति, अतः एतत् संरक्षण-संवर्धनम् सम्पूर्णराष्ट्रस्य केन्द्र-प्रदेश-सर्वकाराणां च परमं कर्तव्यम्।

दुर्भाग्यस्यायं विषयः यत् संस्कृतमिदानीम् राज्यस्तरीयं केन्द्रस्तरीयञ्च प्रोत्साहनं न केवलं न लभते, अपि तु राष्ट्र-हितस्य उपेक्षां विधाय एतस्मिन् महान् कुठाराघातः क्रियते। क्षेत्रीयभावनाया आवेशः राष्ट्रस्य कृते घातको भवति, भविष्यति चेति विवेकिनो विदन्ति।

संस्कृतभाषायाम् 'अनुशासनं' विद्यते। फलतः संस्कारेण संस्कृतज्ञाः शिष्टा भवन्ति। अनुशासनहीनताया दुष्परिणामः देशे सर्वत्र अनुभूयते।

राष्ट्रीय-शिक्षानीतौ संस्कृतस्य सर्वथोपेक्षा त्रिभाषा-सूत्रात् संस्कृतस्य निष्कासनञ्च दुःखाकरोति। एतच्च केन्द्रीय विद्यालय-नवोदय विद्यालयच्छात्राणां कृते असुविधाजनकम् भवति इत्यपि ध्यातव्यमेव। अतः त्रिभाषासूत्रस्य संशोधनं निम्नलिखितप्रकारेण अपेक्षितम्--

प्राथमिक-शिक्षायाम् - क्षेत्रीय-भाषा, संस्कृत-भाषा, आङ्गल-भाषा

माध्यमिक-शिक्षायाम् - (क) क्षेत्रीय-भाषा, संस्कृत-भाषा, हिन्दी भाषा, आङ्गल भाषा।

(ख) हिन्दी-भाषा-भाषिक्षेत्रे - हिन्दी-भाषा, संस्कृत-भाषा, आङ्गल-भाषा, हिन्दी भिन्ना काचिदन्या क्षेत्रीय-भाषा;

(ग) चतुर्भाषासूत्रं यदि सर्वथा अस्वीकार्यम् परीक्षा-पत्राणामाधिक्यात् तर्हि क्षेत्रीय-भाषायाः शतसंख्याक-पत्रे पञ्चाशतोऽङ्कानां संस्कृतस्य अनिवार्यरूपेण समावेशः, एतत् पत्रे च परीक्षायामानिवार्यरूपेण उत्तीर्णता - नियमो विधेयः।

(घ) हिन्दी-स्थाने ये छात्राः उर्दू-भाषां ग्रहीष्यन्ति तेषां कृते यथेच्छम् परसियन-भाषा अरबी-भाषा वा।

उच्चतरशिक्षायाम् - हिन्दी भाषामाध्यमेन आङ्गल भाषा - माध्यमेन वा शिक्षणम्, क्षेत्रीय-भाषायाः, हिन्दी-भाषायाः, दर्शनशास्त्रस्य, पुराणेतिहासशास्त्रस्य, पुरातत्त्वशास्त्रस्य एवं विधान्यशास्त्रस्य च पाठ्यक्रमे संस्कृत-विषयैक-पत्रस्य अनिवार्यत्वम्। प्राथमिककक्षात आरभ्य उच्चतरशिक्षां यावत् संस्कृति-नीति-सदाचार-विषयक-सामान्यपाठ्य-पुस्तकाध्ययनस्य अनिवार्यत्वम्। तत्रोत्तीर्णानां प्रमाणपत्रेषु तदुल्लेखो विधेयः।

शिक्षाया निम्नलिखितोद्देश्यस्य--

१. "मानवजीवन-महत्त्वादर्शयोर्ज्ञानम्,

२. चरित्र-शिक्षणम्,

३. ज्ञानार्जन-सामर्थ्यम्,

४. समुचित-जीविकोपार्जनकौशल-ज्ञानम्,

५. सत्यासत्य-परीक्षण - नैपुण्यम्,

६. समाज - परम्परा - प्राचीनोपलब्धि - विषयक-ज्ञानम्,

७. आध्यात्मिकाधिभौतिकयोः सन्तुलित-ज्ञानम्।'' इत्येतस्य सिद्धौ संस्कृताध्ययनमद्वितीयं साधनमिति राष्ट्रस्य नेतारः, विद्वांसः, विवेकिनो मनीषिणश्च निर्भ्रान्तं मन्यन्ते। एतदुपलब्धये शिक्षानीतौ संस्कृतस्य समावेशः करणीय एव।

संस्कृतस्य प्रचाराय प्रसाराय देशेऽधुना कश्चिद् विशिष्ट उपायः आश्रयणीयः। एतदर्थं संस्कृतचलचित्राणां निर्माणम् आवश्यकम्। केन्द्रीय-संस्कृतसमित्यापि एष प्रस्तावः पारितः सर्वकारश्च निवेदितः। तत्कार्यान्वयनाय सर्वकारः पुनः पुनरनुरोद्धव्यः। चलचित्रनिर्मातारोऽपि एतदर्थं प्रार्थनीयाः। संस्कृत-सेवया सह अर्थकरोऽयं व्यवसायः स्यात्। ''भारतस्य प्रतिष्ठे द्वे संस्कृतं चैव संस्कृतिः'' इति भारतीयैर्न कदापि विस्मर्तव्यमित्यस्य प्रचारः संस्कृतस्य प्रसारश्च आकाशवाणी-केन्द्रात् दूरदर्शन-केन्द्राच्च करणीय इतिशम्।

आवश्यकतास्ति भावनात्मकैकतायाः

देशस्य एकताया अखण्डतायाश्च सुस्थिरतार्थम् आदिकालादेव मनीषिणः भावनात्मिकामेकतां सुदृढां कर्तुं प्रयतमाना दरीदृश्यन्ते। अस्माकं महर्षिभिः राष्ट्रीय भावनाया महत्तां जानानैः चातुर्वर्ण्ये सामञ्जस्यम् सद्भावनञ्च प्रतिष्ठापयाञ्चक्रे, गङ्गा-यमुना-सरस्वती-कावेरी-गोदावरी-महानदी-प्रभृतीनां देशस्य विभिन्न-भागेषु प्रवहन्तीनां नदीनां माहात्म्यं राष्ट्रस्य अखण्डत्वं च प्रतिपादयाञ्चक्रे। देशस्य पूर्व-पश्चिमोत्तर-दक्षिण-भागेषु प्रसिद्धानि चत्वारि 'धामानि' संस्थाप्य अनन्तश्रीविभूषितैराद्यशङ्कराचार्यपादैः धार्मिक-तैर्थिक-कृत्यद्वारा विष्णु-शिव समन्वयात्मक-भावनाद्वारा च राष्ट्रस्य अखण्डतां संस्थापयांबभूवे।

अस्माकं तत्त्वज्ञैर्मनीषिभिः ब्रह्म-विष्णु-महेश-शक्ति-जिन-बुद्धादिषु उपास्यदेवेषु पारमार्थिकीमेकतां दर्शयित्वा उपासकेषु भावनात्मकैकत्वं प्रचारयाञ्चक्रे। देश-समाज-सुधारकैः सद्भिर्महात्मभिश्च देशस्य विभिन्नभागेषु परिभ्रमद्भिः राष्ट्रिय-भावना प्रचारयांबभूवे। अतएव राष्ट्रस्य भावनात्मिकामेकताम् अखण्डतां परिरक्षितुम् अधुना एतदावश्यकतां विलोकयद्भिः अस्माभिः विशेषतः प्रयतितव्यम्।

एतद्भावनायाः पृष्ठभूमौ यद्विशिष्टं ज्ञानं रहस्यञ्च वर्तते तदपि ध्यातव्यम्। मानवः न केवलं पाञ्च-भौतिकविग्रहः अपि तु स आत्म-विशिष्ट-विकसित-विवेकशील-संवेदनात्मक-समदर्शन - प्राणिविशेषो विद्यते। अत एव आत्मनि सर्वभूतानि द्रष्टव्यानि, सर्वभूतेषु चात्मा द्रष्टव्यः[1]। आत्मौपम्येन सर्वत्र सुख-दुःखावलोकनमेव परमयोगित्वम्[2]। इयंदृष्टिः भावनात्मकैकतायाः चरमसीमा। आध्यात्मिक-स्वाराज्य लाभाय अस्या भावनाया नितान्तमावश्यकत्वम्[3]। अत एव शतपथब्राह्मणे ''आत्मयाजी श्रेयान् देवयाजिनः'' इत्येवमुद्घोष्यते।

मानवस्य कृते स्वजीवन-परिपालनमेव पर्याप्तं नास्ति। इतोऽप्यधिकं काम्यं वर्तते परस्य परिरक्षणम्। एतद्बलेनैव सामाजिक-सुव्यवस्था सुस्थिरा भवति।

---

१. सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः।। गीता।

२. आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः।। तत्रैव।

३. सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति।। मनुस्मृतिः

आध्यात्मिक-स्वाराज्ये संस्थापिते सत्येव "मात्स्यन्यायेन" जीवन-यापनं दूरीकर्तुं शक्यते, प्रशासने सारल्यञ्च समानीयते।

"आत्मनः प्रतिकूलानि परेषां न समाचरेत्" इत्ययं शाश्वतिक-सिद्धान्तः इममध्यात्मवादमाधारीकृत्यैव मानवानुद्बोधयति। अस्या भावनाया मूलाधारोऽस्ति आधिभौतिकवादेन सह अध्यात्मवादस्य समन्वयः सन्तुलनं सामञ्जस्यं च। अस्मिन्नेव समन्वयात्मके आधारस्तम्भे भावनात्मकैकता सुदृढा भवति। श्रीमद्भगवद्गीताया अयमेव सारांशः, अयमेव ज्ञान-विज्ञान-समन्वयः, अयमेव अभ्युदय - निःश्रेयस-सिद्ध्युपायः। यत्रैव भगवता योगेश्वर-श्रीकृष्णेन सह धनुर्धर-पार्थस्य सामञ्जस्यं सन्तुलनं समन्वयश्च भवति तत्रैव विजयान्वितं समग्रमैश्वर्यम्[1]।

अतः स्वस्थ-समाजस्य, राष्ट्रस्य, जगतश्च मङ्गलाय, पारस्परिक-सौहार्दाय, आहव-भय-विनाशाय, प्रसादाय, स्वाराज्याय च भावनात्मिका एकता सुदृढीकरणीयेतिशम्।

---

१. यत्र योगेश्वरः कृष्णः यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयोभूतिर्ध्रुवा नीतिर्मतिर्मम।। गीता।

संस्कृतस्य अद्याप्युपयोगित्वम्

भारते संस्कृतस्य अध्ययनाध्यापनयोर्यादृशी प्रणाली यादृशी परिस्थितिर्यादृशी वा दत्तचित्तता स्वातन्त्र्यात् पूर्वमासीत् असौभाग्यात् तादृशी स्थितिरिदानीं नास्ति। अधुना प्रश्नोऽयं बहुधा पृच्छ्यते - 'किमर्थं वैज्ञानिकेऽस्मिन् युगे संस्कृतमध्येतव्यम् ? इति। यदि नाम संस्कृते किमपि तादृशं वस्तु नास्ति यदर्थम् एतस्याध्ययनमावश्यकं स्यात् तर्हि एतदध्ययने किमर्थं कालो यापनीयः ? एवंविध-विविध-जिज्ञासा-कृतां पुरतः किञ्चिन्निवेद्यम्--

१. संस्कृते निहितानां विद्यानां परिज्ञानार्थं तदध्ययनं परमावश्यकम् :

साधारणतया विद्या द्विविधा। परा अपरा च। तत्र ब्रह्मसाक्षात्कार-सम्पादिका विद्या परा। लौकिक-पारलौकिकाभ्युदयानुकूल-विधि-विधानो-पदेशकारिका विद्या अपरा।

शुक्राचार्यस्य मते तु -

''यत् तत् स्यात् वाचिकं सम्यक् कर्म विद्याभिसंज्ञितम्[१]''

इत्यादिना सम्यग् वाचिकं कर्म विद्या। सा च बहुप्रभेदापि मुख्यतो द्वात्रिंशद्विधा। तत्र ऋग्यजुः सामाथर्वरूपाश्चत्वारो वेदाः, आयुर्वेद-धनुर्वेद-गान्धर्ववेद-तन्त्र रूपाश्चत्वार उपवेदाः, शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतिषरूपाणि षड्वेदाङ्गानि, मीमांसा-न्याय-वैशेषिक-सांख्य-योग-वेदान्तरूपाणि षड्दर्शनानि तथा इतिहास-पुराण-स्मृति-नास्तिक- मतार्थशास्त्र-कामशास्त्र-शिल्पशास्त्र - देशभाषावरोक्ति - यवन मत - देशादिधर्म-रूपाणि द्वादशशास्त्राणि।

पुराणेषु ब्रह्म-पद्म-विष्णु-शिव-श्रीमद्भागवत-नारद-मार्कण्डेयाग्नि-भविष्य-ब्रह्मवैवर्त-लिङ्ग-वराह-स्कन्द-वामन-वायु - कूर्म - मत्स्य-ब्रह्माण्ड-नामकानि अष्टादश पुराणानि तथा सनत्कुमार-नरसिंह-बृहन्नारदीय-शिवधर्म-दुर्वासस-कापिल-मानवौशनस- वारुण-कालिका-साम्ब - नन्दिकेश्वर - सौर - पाराशरादित्य - ब्रह्माण्ड - माहेश्वर - भागवत-वासिष्ठ-कौर्म-

१. शुक्रनीतिः अध्यायः ४।

भार्गवादि-मुद्गल - कल्कि - देवीमहाभागवत - बृहद्धर्म - परानन्द- पशुपतीत्यादीनि अनेकानि उपपुराणानि विलसन्ति।

सामाजिकनियम-विधि-न्यायादि-व्यवस्थापिकाः मन्वत्रि-विष्णु-हारीत- याज्ञवल्क्यो-शनोऽङ्गिरोयमापस्तम्ब-संवर्त-कात्यायन-बृहस्पति-पराशर-व्यास-शङ्ख -लिखित-दक्ष-गौतम-शातातप-वसिष्ठानां विंशतिः मुख्याः स्मृतयः विधि-विषयक-सूक्ष्म-विचारान् विदधति।

अर्थशास्त्रम्, कामशास्त्रम्, शिल्पशास्त्रम्, काव्यम्, काव्यशास्त्रं च ततत्तद्विषयकं सविस्तरं सुगम्भीरं च विवेचनं कुर्वन्ति।

अवसरोक्तिविद्यापि वैदेशिक-कूटनीति-विभागे नियुक्तानां कृते अतीव सहायिका भवति। एतद्विद्यायां निपुणाः कूटनीतिज्ञाः स्वकार्ये अतीव सफला भवन्ति। यावनमताख्यं तच्छास्त्रं वर्तते यत्र जगतः कारणमीश्वरः सर्वदा अदृश्य एव। यत्र श्रुतिस्मृत्योर्मार्गमननुसरन्नपि धर्मः सुव्यवस्थितः[1]। एवं हि चार्वाक-यावनादिदर्शनमपि विचारपथे विराजमानमासीत्।

देशादिधर्म-प्रतिपादक-शास्त्रम्[2] - देशजाति-कुलाचार-व्यवहाराणां परम्परागतानां तथैवानुष्ठानमावश्यकमिति प्रतिपादयति।

उपर्युक्ताभ्यो द्वात्रिंशतो विद्याभ्यः अतिरिक्तान्यपि संस्कृते बहूनि समाजोपयुक्तानि व्यावहारिकाणि शास्त्राणि सन्ति। योगियाज्ञवल्क्यनामके प्राचीने ग्रन्थे वर्णिताः पाञ्चरात्र-कापिलापान्तरतम-ब्रह्मिष्ठ-पाशुपत-हैरण्यगर्भ-शैवनामकाः सप्त सिद्धान्ताः सन्ति, महाभारते शान्तिपर्वणि महेश्वरप्रोक्तानि त्रीणि शतानि शास्त्राणि सप्ततिः महातन्त्राणि च सन्ति।

लोकतन्त्रम्, लोकायतशास्त्रम्, धनुर्वेदसूत्रम्, औशनसधनुर्वेदः, भारद्वाजधनुर्वेदः, जमदग्नि - धनुर्वेदः, व्यूहशास्त्रम्, रथसूत्रम्, अश्वसूत्रम्, नकुलस्य अश्वशास्त्रम्, हस्तिसूत्रम्, लोमपादकृत-हस्ति-सूत्रम्, हस्त्यायुर्वेदः, शालिहोत्र-नामकम् अश्वचिकित्साशास्त्रम्, यन्त्रसूत्रम्, विश्वकर्म-प्रोक्त-यन्त्र-मात्रिका, वाणिज्यशास्त्रम्,

---

१. ईश्वरः कारणं यत्रादृश्योऽस्ति जगतः सदा।
श्रुतिस्मृती विना धर्माधर्मौ स्तस्तच्च भावनम्।।
श्रुत्यादिभिन्नधर्मोऽस्ति यत्र तद् यावनं स्मृतम्।। शुक्रनीतिः।

२. कल्पितः श्रुतिमूलो वा मूलो लोकैर्धृतः सदा।
देशादिधर्मः स ज्ञेयो देशे देशे कुले कुले।।
यस्मिन् देशे य आचारो व्यवहारः कुलस्थितिः।
तथैव परिपाल्योऽसौ यदावशमुपागतः।।

गन्धशास्त्रम्, कृषिशास्त्रम्, सस्यवेदः, पशुपाल्यशास्त्रम्, गो-वैद्यकम्, गोलक्षणम्, वृक्षायुर्वेदः, तक्षशास्त्रम्, मल्लशास्त्रम्, वास्तुशास्त्रम्[1], वाकोवाक्यम्, चित्रसूत्रम्, लिपिशास्त्रम्, मानशास्त्रम्, धातुशास्त्रम्, संख्याशास्त्रम्, हीरकसूत्रम्, अदृष्टशास्त्रम्, शिल्पशास्त्रम्, मायायोगवेदः, माणवविद्या, सूदशास्त्रम्, द्रव्यशास्त्रम्, मत्स्यशास्त्रम्, वायसविद्या, सर्पविद्या, चौरशास्त्रम्, इत्यादीनि शतशः शास्त्राणि संस्कृते निबद्धानि सन्ति, येषामुल्लेखः महाभारत-पुराणादौ समुपलभ्यते। एतदतिरिक्तम् ब्रह्मानन्द - सहोदर - रसास्वादानुभावकम् विपुलं विशालं खण्डकाव्यम्, महाकाव्यम्, रूपकम्, उपरूपकम्, कथाख्यायिकादि - साहित्यम्, अनेककोशादि-ग्रन्थाः, चतुःषष्टिकला-प्रतिपादकग्रन्थाश्च संस्कृते विराजन्तेतराम्। यस्मिन् संस्कृते समाजोपयोगीनि एतानि विविधानि शास्त्राणि विपुलं च साहित्यम् अनेकाश्च कला विद्यन्ते तस्य संस्कृतस्य समयानुकूलता-विषये प्रश्नः हास्यावहः। संस्कृताध्ययनमन्तरा कथमेतेषामुपयोगिनां विषयाणां ज्ञानं सुलभं स्यात् ? अत एतेषां परिज्ञानार्थं संस्कृताध्ययनं सर्वथावश्यकम्।

२. भारतीय-सांस्कृतिक-निधीनां परिरक्षणार्थं संस्कृताध्ययनमावश्यकम् :

भारतीय-संस्कृति-परिज्ञानं संस्कृतज्ञानाधीनम्। यतो हि संस्कृते एव संस्कृतिस्वरूपं समुल्लिखितं विद्यते। सांस्कृतिकनिधयश्च संस्कृते एव सुरक्षिताः सन्ति। अतस्तज्ज्ञानार्थं संस्कृताध्ययनं नितान्तमावश्यकम्। स्वकीया संस्कृतिर्यदि सुज्ञाता न स्यात् परिरक्षिता च न भवेत् तर्हि मानव-जीवनस्य सुसाफल्यं न स्यात्। अतः भारतीय-संस्कृति-परिज्ञानार्थं सांस्कृतिक-निधीनाञ्च परिरक्षणार्थम् अधुनापि संस्कृताध्ययनमावश्यकम्।

३. संस्कृतस्य भाषागतमपूर्वं वैशिष्ट्यम् :

विश्वस्मिन् अतिप्राचीना सुसमृद्धतमा इयं सुरभारती। अस्यां किमपि एतादृशं वैशिष्ट्यं वरीवर्ति यन्मध्यकालीनभाषासु इदानीन्तनीषु च योगात्मिकासु भाषासु नोपलभ्यते। समस्तासमस्तपद-रूपेण विषयानुकूल-सरलासरल-पदजातरूपेण च वर्णनक्षमत्वम्, सन्धि-समास द्वारा चमत्कार-जनकत्वम्, वैदर्भी - पाञ्चाली - गौडीरूपासु तिसृष्वपि रीतिषु रसानुकूल - रचनायोग्यत्वम्, माधुर्यौजःप्रसादाख्यानां त्रयाणामपि

---

१. भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा।
नारदोनग्नचिच्चैव विशालाक्षः पुरन्दरः।।
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती।।
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशकाः।। मत्स्यपुराणे २५२।२-४।

गुणानामभिव्यञ्जकत्वम्, विविधप्रत्यय-मालाधारित्वम्, ध्वन्यनुरूपवर्णमालाशालित्वम्, भावानुकूल-विलक्षण-शब्द-साम्राज्यञ्च यादृशं संस्कृतभाषायां वरीवर्ति न तादृशं विश्वस्मिन् कस्यामपि अन्यस्यां भाषायाम्। कम्प्यूटरविज्ञानस्य कृते संस्कृतं परमोपयोगि।

इदमेव च कारणं विद्यते येन संस्कृतोद्भवाः पालिप्राकृतादिभाषाः संस्कृतापेक्षया नवीना अपि जनसमाजस्य न तथा सन्निकटाः सन्ति यथा संस्कृतभाषा। पालि-प्राकृत-भाषा- परिज्ञानार्थं साधारणतया तस्याः संस्कृतरूपान्तरमपेक्ष्यते। अतः एवंविधवैशिष्ट्ययुता भाषा आपामरजनव्यापिनी यथा स्यात् तथा समुद्योगः करणीयः।

४. संस्कृत-भाषाया आधुनिक-भारतीय-भाषाणां मातृत्वम् :

उत्तरभारतीयभाषाणां सर्वासां मूलं संस्कृतमेवेति विदन्त्येव विपश्चितः। दक्षिण-भारतीय-भाषाणाम् साहित्यस्य समृद्धये संस्कृतभाषायाः शब्दावली विचार-सरणिः वर्णन-पद्धतिश्च परिगृहीतास्तत्र तत्र विलसन्ति, तत्साहित्य-विवृद्धिं च कुर्वन्ति। तत्र मलयालमभाषायाम् संस्कृतस्य अशीतिः शब्दाः प्रतिशतं परिगृहीताः सन्ति, कर्णाटकभाषायां षष्टिः शब्दाः, तेलगूभाषायां पञ्चाशत् शब्दाः, द्रविडभाषायां त्रिंशच्छब्दाः गृहीताः सन्तीति भाषा-सर्वेक्षण-काराः समामनन्ति। अतः संस्कृतभाषैव उत्तर-भारतीयभाषाणां जन्मदात्रीत्वेन दक्षिण-भारतीय-भाषाणां धात्रीत्वेन च जननीति नास्त्यत्र शङ्कावसरः प्रज्ञावताम्। मातरि सुसमृद्धायामेव सत्याम् दुहितरः सन्तुष्टा विराजन्ते। अतोऽपि हेतोः संस्कृतस्य समृद्धिः सर्वथा काम्या वर्तते।

५. बृहत्तरभारते पुरा संस्कृतमेव सम्पर्क-भाषाः :

पुरातने काले बृहत्तरभारते मलयद्वीप - वारुणद्वीप - सुवर्णद्वीप - यवद्वीप - चम्पा - कम्बोजादिषु संस्कृतमेव सम्पर्क-भाषा, भारतीय-संस्कृतेः सन्देश-वाहिका, निगमागम - दर्शन - प्रचारिका च यथा आसीत् तथैव अधुनापि संस्कृत-भाषया भाव्यम्।

विश्वस्मिन् साहित्य - संस्कृति - विषये वैभिन्ये विद्यमानेऽपि तत्र काम्यैकत्वस्य संस्थापनार्थम् तथा भारोपीय-साहित्यस्य विश्व-साहित्यस्य च रचनार्थम् संस्कृतमेव केवलं समुपकारकं स्यात्। संस्कृतज्ञानमासाद्यैव पाश्चात्य-विद्वांसः तुलनात्मक-भाषा-विज्ञानस्य, तुलनात्मक-धर्मस्य, तुलनात्मक-पुराण - कथा-साहित्यस्य च रचनां कृतवन्तः। अतः संस्कृतस्य विश्वस्मिन् प्रचार आवश्यकः।

६. संस्कृतस्य राष्ट्रिय-भावना-जनकत्वम् :

भारतस्य समुन्नतये राष्ट्रिय-भावनाया आवश्यकत्वमस्ति। प्रादेशिक-भावना देशं राष्ट्रं च वियुनक्ति। राष्ट्रिय-भावना च राष्ट्रं संयुनक्ति। विच्छिन्नो देशः परस्परं द्वेष्टि, दौर्बल्यञ्चाधिगच्छति। सङ्घीभूतो देशः परस्परं मित्रीयति, शक्तिमत्त्वञ्चावाप्नोति। प्राकृतादि भाषाणां प्रादेशिकत्वम्, यच्च महाराष्ट्री, शौरसेनी, मागधीत्यादि नामभिः आधुनिक-भारतीय- भाषा-नामभिश्च संसूच्यते। संस्कृत-भाषा हि सम्पूर्ण राष्ट्रस्य न कस्यचित् प्रदेश-विशेषस्य। अतः एतद्द्वारा राष्ट्रिय-भावनायाः समुद्घोषो भवति। अतो राष्ट्रस्य कल्याणार्थं संस्कृतस्य अध्ययनमावश्यकम्। संस्कृताध्ययनेन राष्ट्रियैकतायाः सुदृढीकरणं जायते। सुदृढमेव राष्ट्रं समुन्नतं भवति।

७. संस्कृताध्ययनेन अध्येतॄणां स्वेषु सम्मान-भावः :

अन्त्यजो वा हरिजनो वा आदिवासी वा मोहम्मदमतानुयायी वा यो वा को वा संस्कृतमधीते सुसंस्कृतः सन् स्वात्मानं समाजे सम्मानभाजं मनुते। संस्कृते एतादृशं वैलक्षण्यं विद्यते येन इदं स्वाध्येतारं सम्मानशालिनं विधत्ते इति जानते सर्वे जात्या निम्ना अपि संस्कृतज्ञाः। संस्कृतं हि स्वसम्पर्किणं संस्कृतं ध्रुवं करोत्येव। अतः आधिभौतिकदृष्ट्या दीना अपि संस्कृताध्ययनेन आध्यात्मिक-बलेन अदीना भवन्तु इति हेतोः संस्कृतमध्येतव्यमेव।

८. संस्कृतस्यैव लोकद्वय-सिद्धि-साधनत्वम् :

संस्कृतं न केवलमैहिकसिद्धिसम्पादकम्, न केवलमिदं लौकिकप्रेयःसाधनम् अपि तु पारलौकिक-सिद्धेरपि साधकम्, पारमार्थिकश्रेयसामपि प्रदायकम्। प्रेयःश्रेयसोः प्राप्तौ सत्यामेव मानव-जीवनस्य साफल्यम्। ससम्मानासन-ग्रहणपूर्वक-ताम्बूलद्वय-प्राप्तौ ऐहलौकिकजीवनस्य साफल्यम् आत्मप्रमोदार्णवावगाहने पारमार्थिकजीवनस्य साफल्यमिति सर्वतन्त्र-सिद्धान्तः। उभयोः प्रापिका लोकद्वय-साधनी चतुरता एव वास्तविकी चतुरता। संस्कृताध्ययनेनैव एतत्साफल्यद्वयमिति संस्कृताध्ययनम् परमावश्यकम्।

संस्कृतस्य अध्ययनार्थं सम्यक् प्रचार-प्रसारार्थञ्च केचिन्निम्नलिखिता उपाया विधेयाः-

१. संस्कृतस्य सामान्यज्ञानार्थं स्नातकपरीक्षां यावत् एकपत्रस्य अनिवार्यत्वम्। (अस्मिन् पत्रे राष्ट्रिय-भावना-शिष्टाचार - धर्म - संस्कृति-नीतिश्लोक- सुभाषित - रामायण - महाभारतादीनां संक्षेपतः समावेशः करणीयः)

२. देशे सर्वेषु विश्वविद्यालयेषु सर्वेषु महाविद्यालयेषु च उच्चकक्षां यावत् संस्कृताध्ययनाध्यापन-व्यवस्था।

३. परम्परागत-संस्कृताध्ययन-परिपाटी-परिरक्षणम्।

४. संस्कृते लघु (पौकेट) पुस्तकानां प्रकाशनं प्रचारश्च।

५. गोष्ठी - समायोजनम्।

६. महाकवीनां पण्डितानाञ्च जयन्ती - पुण्यतिथि - समायोजनम्।

७. देशे, यथासंभवं प्रतिराज्यं, दैनिकसमाचार-पत्र-पत्रिका-प्रकाशनम्।

८. प्रतिविश्वविद्यालयात् संस्कृत-शोध-पत्रिका-प्रकाशनम्।

९. दुर्लभ-ग्रन्थानां प्रकाशनम्

१०. आकाशवाणी - दूरदर्शन-केन्द्रेभ्यः संस्कृत-प्रसारणम्।

११. आकाशवाणी दूरदर्शन-केन्द्रेभ्यः संस्कृत-पाठादि कार्यक्रमः।

अस्माकं प्राचीना अधुनातनी च शिक्षा

विद्योपादानार्थकशिक्षधातोः निष्पन्नः शिक्षाशब्दः विद्याग्रहणरूपमर्थं बोधयति। विद्याध्ययनेन पुरुषार्थ-सिद्धिर्भवति। अतः शिक्षाया उद्देश्यं भवति पुरुषार्थलाभः। लक्ष्यसिद्ध्यर्थं सोद्देश्यं कृतो हि परिश्रमः फलवान् भवति। प्राचीन-कालीन-शिक्षार्थिनां स्पष्टमुद्देश्यं निश्चिता च दिशासीत्। 'अमृतं हि विद्या' 'विद्ययाऽमृतमश्नुते' इति मन्यमानास्ते विद्यामधीयाना आसन्।

अतिप्राचीनकाले विद्याप्राप्त्यर्थं गुरोरावश्यकता नासीत्। तपःपूता ऋषयः स्वयमेव मन्त्र-द्रष्टारो बभूवुः[१] पश्चात् ते उपदेशेन मन्त्रान् शिक्षयामासुः[२]। ततः परं वेद-वेदाङ्गानां समाम्नानमभूत्[३]। ततश्च गुरु-शिष्य-परम्परा प्रादुरभवत्। परा अपरा चेति रूपेण विद्यानां विभाजनमभूत्। धर्मार्थकामसंसिद्धौ साधनमभूत् 'अपरा'। परम-पुरुषार्थ-मोक्ष-साधनम् परा[४]। जिज्ञासुशिष्याः स्वेष्ट-सिद्ध्यर्थं गुरुं निकषा गच्छन्त आसन्। [५]गुरुः तेषामज्ञानमपाकृत्य इष्ट-ज्ञानं कारयन्तिस्म। शिष्याः शिक्षायाश्चरमोद्देश्यमात्मज्ञानोपलब्धिरूपं सद्गुरोः प्राप्नुवन्ति स्म[६]। शिष्याणां कृते गुरुः ब्रह्मा, विष्णुः, महेश्वरः, साक्षात् परब्रह्म-रूप एवासीत्। शरणागत-शिष्ये अध्यात्मज्ञानसर्जनाद् गुरुः ब्रह्मा, त्राणात् ज्ञान-विज्ञान-संरक्षणाच्च विष्णुः, सकलकलुषसंहरणान्महेश्वरः तथा परमात्म-ज्ञान-प्रदानात् परब्रह्मरूपः[७]। गुरोः परतरं किमपि तत्त्वं नासीत्[८] गुरुः अज्ञानतिमिरान्धस्य शिष्यस्य ज्ञानाञ्जनशलाकया प्रज्ञाचक्षुषी उन्मीलयन्नासीत्[९]। अतः शिष्यस्य कृते गुरोः स्थानं सर्वोच्चमासीत्।

---

१. साक्षात्कृतधर्माण ऋषयो बभूवुः। ऋषयो मन्त्रद्रष्टारः। निरुक्ते।

२. तेऽवरेभ्यः असाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुः। तत्रैव

३. उपदेशाय ग्लायन्तोऽवरे इमं ग्रन्थं समाम्नासिषुः वेदं च वेदाङ्गानि च । तत्रैव

४. द्रष्टव्या मुण्डकोपनिषद् १, ५।

५. गिरति अज्ञानम् - नाशयति अविद्यामिति गुरुः।

६. तद्विज्ञानार्थं स गुरुमेवाधिगच्छेत्। समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। समाश्रयेत् सद्गुरुमात्मलब्धये (अध्यात्म रामायणम्)।

७. गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।
गुरुः साक्षात् परं ब्रह्म तस्मै श्री गुरुवे नमः।।

८. नास्ति तत्त्वं गुरोः परम्।

९. अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।

शिक्षायाः प्रयोजनमासीत् पुरुषार्थ-चतुष्टयोपलब्धिः तथा अध्यापनस्य प्रयोजनं धर्मार्थ-शुश्रूषा-प्राप्तित्रयम्[१]।

प्राचीनकाले आचार्यः केवलं धर्मार्थं शिष्यान् शिक्षयतिस्म, आचारं ग्राहयतिस्म, चरित्रनिर्माणं कारयतिस्म, शास्त्र-रहस्यं समुद्घाटयतिस्म, तथा तद्बुद्धिं विकासयतिस्म[२]।

आचार्यः शिष्यमुपनीय वेदादिशास्त्राणि अध्यापयतिस्म[३]। तस्य इयमेव कामनासीत् यत् तच्छिष्यः विद्वान् मनस्वी यशस्वी सन् शिष्य-परम्परां सुदृढां विदध्यात्।

यो हि जीविकार्थं वेदांशं वेदाङ्गानि वा अध्यापयतिस्म स उपाध्याय[४] आसीत्। अत एव 'उपाध्यायान् दशाचार्यः[५]' ...... इति मान्यता आसीत्। शिक्षार्थी यस्मात् शिक्षां प्राप्नोतिस्म तस्य पूर्णसम्मानं करोतिस्म।

शिक्षार्थिनः स्ववैशिष्ट्यानुसारं शिष्यः, छात्रः, विद्यार्थी अन्तेवासी चेति चत्वारि अभिधानानि आसन्।

शासितुं योग्यः शिष्याभिधान आसीत्। अनुशासन-शीलत्वं तस्य प्रधान-लक्षणम्। अध्ययनकाले पूर्णानुशासितोऽयं सामाजिक-जीवने सम्पूर्णं साफल्यं प्राप्नोतिस्म।

छात्रो हि[६] केवलं स्वाध्याय-निरतः सन् गुरोर्दोषान् आवृणोतिस्म तद्यशः प्रकाशयतिस्म। गुरुदोषावरणं नाम - अध्ययन काले स्वशङ्का-समाधानमनवाप्यापि धैर्यपूर्वकं समाधान-प्रतीक्षणम् न च गुरोः अज्ञानदोषस्य प्रचारणम्।

विद्यार्थी[७] विनम्रतापूर्वकं विद्याधनिनं गुरुं विद्याम् याचतेस्म। विद्यालाभ एव तस्य मुख्यं प्रयोजनमासीत्। विद्यां प्रति उत्कटानुरागः, गुरुं प्रति शुश्रुषा चेति विद्यार्थिशब्दात् संसूच्यते।

गुरोः समीपे निवसन् अधीयानः अन्तेवासी[८] आसीत्। सततं शङ्कासमाधानस्य अवसरात् निरन्तरं गुरु-शुश्रूषा-सुयोगाच्च अन्तेवासी अमीषु अधिक-सौभाग्यशाली।

---

१. अध्यापनं च त्रिविधं धर्मार्थं चार्थकारणात्।
शुश्रुषा करणं चेति ऋषिभिः परिकीर्तितम्।। हारीतः।

२. आचार्यः आचारं ग्राहयति। आचिनेति अर्थान्। आचिनोति बुद्धिमिति वा। निरुक्ते।
आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्मात् तस्मादाचार्य इष्यते।।

३. उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।। मनुः।

४. एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते। तत्रैव

५. तत्रैव।

६. गुरोर्दोषाणामावरणं छत्रम्। तच्छीलमस्य असौ छात्रः।

७. विद्यामर्थयते तच्छीलः विद्यार्थी।

८. अन्ते गुरु-समीपे वसति तच्छीलः अन्तेवासी।

प्राचीन-भारतीय-गुरुकुलेषु शिष्याः समस्त-विद्यानामध्ययनमेकत्रैव कुर्वन्तिस्म। तेषामावास-भोजनादि-व्यवस्था तत्रैव एकत्रासीत्। समाजस्य सर्वे जनाः सहैव पठन्त आसन्। श्रीकृष्णः सुदामा च सहैव एकाश्रमे एवाधीयानावास्ताम्। तयोः कृते पृथक्-पृथक् गुरुकुलं नासीत्।

प्राचीनशिक्षा-पद्धतौ सच्चरित्राः सुसंस्कृताश्चैव शिक्षार्थिनः गुरुकुले प्रवेशाधिकारिण आसन्। तस्मिन् पवित्र-वातावरणे विद्यार्थी विनयी आसीत्। अत एवेदं कथ्यते 'विद्या ददाति विनयम्'। शिक्षाग्रहणेन सह शिष्येषु सद्गुणानामाधानं भवतिस्म। छात्रः सच्चरित्रः, संयमी, आचारवान्, कर्तव्यनिष्ठः, सत्यपरायणः, विनीतः, गुरुषु श्रद्धालुः ब्रह्मचर्यपरायणः सन् देश-समाजहितार्थम् उपयोगि-नागरिको भूत्वा गुरु-कुलाद् बहिरागच्छतिस्म।

शिक्षार्थी साधारणतया पञ्चमे वर्षे गुरुकुले प्रवेशमर्हतिस्म। तत्र द्वादशवर्षाणि यावत् अध्ययनं करोतिस्म। ततः परं तस्य समावर्तनं भवतिस्म। ततः स स्नातकः। प्रतिदिनम् आचार्यद्वारा परीक्षैव तस्य परीक्षा। शास्त्रार्थे तस्य योग्यतायाः प्रमाणं भवतिस्म। सत्रान्ते दीक्षान्त-समारोहो भवतिस्म। क्रियावान् कुलपतिः[1] स्नातकान् "सत्यं वद, धर्मं चर इत्यादि जीवनोपयोगिसदुपदेश-वचनानि अनुशास्तिस्म। यथा सम्भवं दक्षिणां गुरवे निवेद्य छात्रो गृहमागच्छतिस्म। एवं प्रकारेण विद्यामादाय ततस्वाध्यायं, तद्व्यवहारं तत् प्रवचनं च करोतिस्म। इयं हि प्रणाली महर्षिपतञ्जलिसमयपर्यन्तम् (ख्रि० पू० १५० वर्षं, यावत्) प्रचलिता आसीत्।

गतशताब्द्या अन्तिमे चरणे लॉर्ड मेकॉलेमहोदयद्वारा संचालिता शिक्षा आधुनिक-शिक्षाशब्देन कथ्यते। आधुनिकशिक्षायाः प्रारम्भिकरूपे इदानीन्तनरूपे च महत्परिवर्तनमभूत्। समयानुकूलम् मानवानां समस्याया आवश्यकताया आकाङ्क्षायाश्चानुसारम् शिक्षायाः क्षेत्र-विस्तारः परिदृश्यते। विश्वस्य विकसितदेशेषु यथा वैज्ञानिकाविष्कार - प्रचार-प्रसारैः आधिभौतिकसुख-समृद्धेः श्रीवृद्धिरभूद् भवति च भारतेऽपि तत् प्रभावः परिदृश्यते एव। फलतः अत्रापि वैज्ञानिक-प्रौद्योगिक-शिक्षायाः प्रचार-प्रसारो भवति। तन्महत्त्वञ्च आकलितं भवति।

साधारणतया आधुनिकशिक्षा त्रिधा विभज्यते -

(क) चिकित्सा, अभियान्त्रिकी, प्रौद्योगिकी, कम्प्यूटरादि विषयिका,

(ख) सामान्यविज्ञान - कला - वाणिज्यादि-विषया,

(ग) वेद-वादाङ्गादि-संस्कृत-विषया च।

---

१. छात्राणां दशसाहस्त्रं योऽन्नपानादिना भरन्।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः।।

एतासु प्रथम-कोटिका आधिभौतिकाभ्युदय-सम्पादने अद्वितीयसाधनरूपा। अत एवाद्य देशस्य मेधाविनश्छात्रा एतां शिक्षामधिगन्तुं प्रयत्नशीलाः। किन्तु एतत् संख्या सीमिता।

द्वितीय कोटिक-शिक्षा अद्य दिशाविहीना वर्तते। अत्र साधारणच्छात्रा आगच्छन्ति। विद्यार्थिनां संख्यापि अत्यधिका, अतः एतत्समस्यापि विकराला।

तृतीय-कोटिक-संस्कृत शिक्षा, या पुरा सर्वोच्चस्थाने आसीत्, अधुना सर्वकारेण समाजेन च उपेक्षिता अधोगतिमापन्ना।

शिक्षा सामान्य - विषया विशेष-विषया वा भवतु एतस्या एकेन निश्चितोद्देश्येन भाव्यम्। उद्देश्य-विहीन-शिक्षायाः परिणामः श्रेयस्करो न भवति।

शिक्षाया उद्देश्यम् - पूर्णमानवताप्राप्तिः पूर्ण - मानवतायास्तात्पर्यम् - मानवे आधिभौतिक-वादेन सह अध्यात्म-वादस्य पूर्णसमन्वयः, सामञ्जस्यं सन्तुलनञ्च। आध्यात्मिकताया अभावेन असन्तुलनेन च मानवो दानवो भवति। तत एव जायते आतङ्कवादः। एतेन सामाजिक-व्यवस्था अस्तव्यस्ता भवति।

शिक्षया अपेक्ष्यन्ते

१. मानव - जीवनस्य महत्त्वादर्शज्ञानम्,

२. चरित्र - शिक्षणम्,

३. ज्ञानार्जन - सामर्थ्यम्,

४. समुचित-जीविकोपार्जन - कौशलम्,

५. सत्यासत्य-परिज्ञानम्,

६. समाज -परम्परा-मान्यतादि-ज्ञानं च।

शिक्षायाः प्रत्येकं क्षेत्रे शिक्षार्थिनां कृते उपर्युक्तोद्देश्यस्य पूर्तेः आवश्यकतास्ति वर्तमान- शिक्षया एतदुद्देश्यस्य आंशिक-पूर्तिर्जायते। देशस्य स्वातन्त्र्योत्तरम् पञ्च चत्वारिंशतो वर्षेभ्यः परमपि शिक्षायामपेक्षितसुधारो नाभवत्।

साम्प्रतं शिक्षा प्राथमिक - माध्यमिकोच्चशिक्षासु विभज्य तदनुसारं व्यवस्था विधीयते सर्वकारेण। प्राथमिक-शिक्षा अद्यापि अनिवार्य-रूपतां न प्राप्नोत्।

प्राप्त-प्राथमिक-शिक्षाणां संख्या विभिन्न-राज्येषु विभिन्ना विद्यते।

शिक्षाया मेरुदण्डायमाना माध्यमिकशिक्षा अद्यापि सुनिश्चितरूपमलभमानैवास्ते। स्वातन्त्र्योत्तरमाध्यमिकशिक्षायामनेके निष्फल-प्रयोगा अभूवन्। स्वातन्त्र्यात् पूर्वम् ११ + २ + २ + २ = १७ इत्येवं क्रमेण सप्तदशानां वर्षाणां निश्चित पाठ्यक्रम आसीत्। पश्चात् १२ + १ + २ + २ = १७ तथा ११ + १ + ३ + २ = १७ इत्येवं पाठ्यक्रमोऽभूत्। इदानीम् १० + २ + ३ + २ = १७ इत्येवं सप्तदशवार्षिक-पाठ्यक्रमः संचाल्यते। एतत् परिवर्तनेन कोऽपि अपूर्वश्चमत्कारः दृष्टिगोचरी न भवति। केवलं परिवर्तनायैव परिवर्तनम्।

माध्यमिक-स्तरे शिक्षामाध्यमस्य रूपमद्यापि अनिश्चितमेव। द्वित्रिचतुः संख्याक-भाषा-सूत्राणां भाष्यमिदानीं विविध-रूपम्। राष्ट्रस्य एकताया अखण्डताया अद्वितीय-साधनरूपा संस्कृतभाषा सर्वथोपेक्षिता वर्तते। स्वातन्त्र्यात् पूर्वं विदेशि-शासन काले, माध्यमिक-स्तरे संस्कृतमनिवार्यमासीत्। अद्य कस्मिंश्चिदपि राज्ये माध्यमिक-स्तरे तत् अनिवार्यं नास्ति। कीदृग् विचित्रा स्थितिः।

संस्कृतस्य वैशिष्ट्यस्य गुणगानं प्रत्येकं जनः करोति, किन्तु व्यवहारदशायां विपरीतं निर्णयं करोति।

नवीनशिक्षानीतेर्दुन्दुभिस्ताड्यते। एतदर्थं प्रकाशितायां राजकीय-पुस्तिकायाम् आमुखे जीवनस्य आदर्शमहत्त्वयोश्चर्चा वरीवर्ति। मानवमूल्यस्य अध्यात्मवादस्य च महत्त्वं प्रकटितं वर्तते। किन्तु तत्-प्राप्तेः उपायस्य निर्देशो नास्ति। नवीन-शिक्षानीतौ संस्कृतस्य सर्वथा उपेक्षैव विद्यते।

सामान्यशिक्षा दिशा-विहीना परिदृश्यते। आधुनिक-स्नातकाः स्नातकोत्तर-परीक्षोत्तीर्णा वा अनायासेन जीविकोपार्जने असमर्थाः। अद्य अयमेव वर्गः सर्वाधिकासन्तुष्टः यस्य प्रतिक्रिया विभिन्नरूपेषु अभिव्यक्ता भवति। अतः आवश्यकतानुसारं व्यवसायोन्मुख- शिक्षायाः प्रयोजनम्।

शिक्षाक्षेत्रेषु निम्नलिखितानि नितरामपेक्ष्यन्ते –

१. प्राथमिकशिक्षात उच्चशिक्षां यावत् प्रत्येकं क्षेत्रे समाजहितोपयोगिनः आध्यात्मिक-ज्ञानस्य शिक्षाया अनिवार्यत्वम्। आध्यात्मिकतायाम् आधिभौतिकतायाम् च पारस्परिक-समन्वय-सामञ्जस्य-सन्तुलन ज्ञानम्।

२. माध्यमिककक्षां यावत् संस्कृतस्य अनिवार्यत्वम्। अतः त्रिभाषा-सूत्रे संस्कृतस्य समावेशः।

३. शिक्षार्थिनां रुच्यनुकूलं तज्जीविकोपार्जन-कौशल-सम्पादनम्।

४. राष्ट्रियायस्य दशमांशस्य शिक्षायां विनियोगः।

५. प्राथमिक-शिक्षाया अनिवार्यत्वम्।

६. गुरु-शिष्ययोः अध्ययनाध्यापनोन्मुखीकरणम्।

७. सम्पन्न-विपन्नच्छात्रयोः प्राथमिक-शिक्षायां वर्तमानस्तरतारतम्यस्य यथासंभवं स्वल्पीकरणञ्च।

एवं कृते सत्येव शिक्षाक्षेत्रे सुधारः साफल्यञ्च भवेतामितिशम्।

सत्यश्रमाभ्यां सकलार्थ सिद्धिः

सत्य-श्रमाभ्यां सकलार्थ-सिद्धिः इत्यत्र सकलार्थ-सिद्धि-शब्दस्य तात्पर्यं विद्यते सकलानाम् अभीष्टानां पदार्थानाम् प्राप्तिः। अर्थात् सत्य-श्रमाभ्यामेव सकलानां मनोरथानां सिद्धिर्जायते नान्यथा। सत्ये श्रमे च अभीष्टार्थ-सिद्धिं प्रति असाधारणं कारणत्वं वर्तते। यदि सत्यश्रमौ भवेताम् अभीष्टार्थ-सिद्धि-रवश्यं-भाविनी तौ चेन्न स्याताम् मनोरथसिद्धिर्न भवेत्। अतः अन्वय-व्यतिरेकाभ्यामिदं निश्चीयते यत् सत्यश्रमद्वारैव सकलार्थप्राप्तिर्भवितुमर्हति नान्यथा।

किं नाम तत् सत्यं येन सकलार्थ-सिद्धिर्भवतीति जिज्ञासायाम् इत्युच्यते यथार्थे वाङ्मनसयोरवस्थानं सत्यम्। अर्थात् यो हि मानवः यथाश्रुतं यथादृष्टं यथानुमितं यथाचिन्तितं वा ब्रवीति स सत्यावादीत्यभिधीयते। यो हि अन्यत् पश्यति अन्यच्च आख्याति मनसा अन्यच्चिन्तयति वचसा च अन्यद् वदति सः अनृतं वक्तीति व्यवहारो भवति। सत्यवादिनां महात्मनां मनसि, वचसि कर्मणि च एकरूपता भवति असत्यवादिनां दुरात्मनां मनसि, वचसि कर्मणि च अनेकरूपता भवति। अत एवोच्यते –

''मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम्।।''

यम-नियमासनप्राणायाम-प्रत्याहार-धारणाध्यान-समाधिरूपेषु अष्टाङ्ग-योगेषु प्रथमस्य –

''अहिंसासत्यास्त्येयब्रह्मचर्यापरिग्रहरूपस्य यमस्य नित्यसेव्यत्वं मनुस्मृतौ प्रतिपादितम् -- ''यमान् सेवेत सततम्'' इत्यादिना। एतेन सत्यरूपस्य सतत-सेव्यता प्रतिपादिता भवति। सत्ये सेविते सति जयः सुनिश्चितः। 'सत्यमेव जयते नानृतम्', 'सत्येन पन्था विततो देवयान' इति श्रुतिर्वाजसनेयिनाम्। अत एव सत्यान्नास्ति परो धर्म इत्युच्यते।

''धृतिः क्षमा दमोऽस्त्येयं शौचमिन्द्रिय-निग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्''।।

इत्यादिना सत्यस्य धर्मलक्षणत्वं प्रतिपादितम्।

अश्वमेधसहस्त्रादपि सत्यस्य अधिकं फलवत्त्वं विद्यते।

अत एव महाभारते--

"अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते"। इति मुक्तकण्ठं प्रतिपादितम् भगवता व्यासेन।

अन्यत्रापि शतपथ-ब्राह्मण एवं श्रुतं वर्तते–"यो वै स धर्मः सत्यं वैतत्। स तस्मात् सत्यं वदन्तमाहुर्धर्मं वदतीति, धर्मं वा वदन्तं सत्यं वदतीति" इति सत्यस्य धर्मस्य च अभेदं प्रतिपादयति श्रुतिः। सत्यरूपाद् धमदिव अर्थ-कामयोः सिद्धिर्भवतीति उद्घोषयति भगवान् वेदव्यासः - "धर्मादर्थश्च कामश्च स धर्मः किन्न सेव्यते।" इति।

अत एव रामायण, महाभारत, पुराणादिषु सत्यस्य महमा गीयते। सत्यवादिनां हरिश्चन्द्ररामादीनां च स्तुतिर्विधीयते। वर्तमानयुगे महात्मा गान्धिमहोदयः "सत्यमेव ईश्वरः"। इत्येवं प्रकारेण अनुभूय सत्यस्य माहात्म्यं प्रादर्शयत्।

इत्थंभूतेन सत्येन समायुक्तः श्रमः सकलमनोरथ-सिद्धौ असाधारण-कारणं भवतीति मनीषिणो मन्यन्ते। परिश्रमेणैति जनो महत्वम् इति च स्वीकुर्वन्ति। अमुमेव विषयं प्रकारान्तरेण कथयन्ति--"उद्योगिनं पुरुष-सिंहमुपैति लक्ष्मीः" इति। उद्योगी परिश्रमी, प्रयत्नशील-व्यवसायीत्यादयः शब्दाः समानार्थाः। यः नित्यम् उद्योगं करोति, यः सततम् उद्योगं शीलयति स उद्योगी न तु यः कदाचित् उद्योगं करोति स उद्योगी। एतादृश- सतत-परिश्रमशीलः पुरुष-सिंहः अवश्यमेव दुरापामपि लक्ष्मीं सिद्धिं च अवाप्नोति।

यो हि इच्छेत् सुखं जीवेयम् इति, स्वस्थ-शरीरो भवेयम् इति स्वस्थश्चेतसि स्यामिति स निरन्तरं कर्मसु अभियुञ्जीत। अत एव--" कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इत्याम्नायवचनम्। गीतायामपि भगवता श्रीकृष्णेन प्रतिपाद्यते "शरीर-यात्रापि च ते न प्रसिद्ध्येदकर्मणः।" इति। अतः शरीरयात्रार्थम् समृद्धिप्राप्त्यर्थं व्यापारः करणीय एव भवति। न खलु व्यापारमन्तरेण करतलगतापि शुक्तिः प्रकटयति मौक्तिकानि लोके। शरीरवता किंचिद् उत्पाद्यं भवति। किंचित् प्राप्यं भवति, किंचिञ्च विकार्यं भवति। त्रिविधं कर्म कुर्वाणेनैव मानवेन योगक्षेमः शक्यते कल्पयितुम्। अप्राप्तस्य प्रापणं योगः, प्राप्तस्य परिरक्षणं क्षेम इति कथ्यते। श्रमेणैव योग-क्षेम-प्राप्तिर्भवतीति सुनिश्चितम्। यो हि अनुद्योगः सः अनिष्टं भावयति, विकृतचेता भवति। कृच्छ्रेण जीवति विमाननां च महतीं लभते। का कथा अन्यस्य मृगाधिराजः सिंहोऽपि समुद्योगेनैव वृत्तिं कल्पयति सोऽपि यदि निरुद्यमः स्यात् तर्हि प्राणान् धारयितुं न शक्नुयात्। अत एवोक्तम्--

"उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।।" इति।

एतावता उद्योगाधीना कार्य-सिद्धिरिति वस्तुस्थितिः। देवानुग्रहमपि स एव लभते यो हि समुद्योगं विदधाति। अत एव श्रुतिः "न भूते श्रान्तस्य सख्याय देवाः" इति। ऐतरेयब्राह्मणस्य हरिश्चन्द्रोपाख्याने रोहितं प्रति इन्द्रस्य सुस्पष्टं वचनमस्ति--"नानाश्रान्ताय श्रीरस्तीति सुश्रुम" इति। अर्थात् श्रान्ताय परिश्रम-शीलाय समुद्योगिने नानाविधा श्रीर्भवति। अनाश्रान्ताय निरुद्यमाय न श्रीरस्तीति निश्चितम्।

अतश्चरैवेति चरैवेति सिद्धिप्राप्त्यै इति समुद्घोषः।

आत्मविद्याविशारदा जनकादयो विदेहा अपि कर्मणैव संसिद्धिमवाप, इति प्रमाणयति भगवद्गीता --"कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति। अतो मनोरथ-सिद्धये समुद्योगः करणीय एवेति निश्चीयते।

श्रेयांसि बहुविघ्नानि भवन्तीति जानते जनाः। प्रारब्धेषु कर्मसु विघ्नाः समुद्भवन्ति। यो हि विघ्नैः प्रतिहतो भूत्वा कर्मणः अपरिसमाप्तौ एव विरमति स न सिद्धिं समाप्नोति। यः विघ्नैः प्रतिहन्यमानोऽपि साहसपूर्वकम् सिद्धि-प्राप्ति-पर्यन्तम् परिश्रमं करोति स एव पुरुषसिंहः सिद्धिमवाप्नोति। अत एवोच्यते--

न साहसमनारुह्य नरो भद्राणि पश्यति।
साहसं पुनरारुह्य यदि जीवति पश्यति।।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते।। इति

अत एव नीतिविदामयं डिण्डिमनादः-

उद्योगिनं पुरुष-सिंहमुपैति लक्ष्मीः
देवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः। इति।

अतः साहसवतः पुरुषस्य उद्योगायत्तः योगक्षेमः इति सुनिश्चितम्। "योगक्षेमो नः कल्पताम्" इति मानवैः काम्यते प्रार्थ्यते च। योग-क्षेमार्थम् अर्थात् सकलार्थ सिद्ध्यर्थम् साहस-पूर्वकं परिश्रमः परमावश्यकः सर्वजन-सुखाय सर्व-जन-हिताय जगन्मंगलाय च श्रमस्य सम्बन्धः सत्येन सह नितरामावश्यकः। सत्य-विहीनेन श्रमेण तात्कालिक-स्वार्थ-सिद्धौ सत्यामपि सिद्धेश्चिरस्थायिताया अभावात् सर्वजनहितस्य च अप्रापणात् पूर्व-प्रतिपादित-सत्येन सहित एव श्रमः सकलार्थ-सिद्धिसाधनं भवतीति हेतोरिदं कथ्यते –

सत्य-श्रमाभ्यां सकलार्थ-सिद्धिः। इतिशम्।

महामहोपाध्याय डॉ० गोपीनाथकविराजस्य संक्षिप्तजीवनवृत्तम्

मनीषिणां मतमिदं यत् ख्रिष्टीयसप्तमशतकादौ यथा प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूव तथैव विगत-शतकान्ते अधिकं प्रागल्भ्यमधिगन्तुं वाग्देवी गोपीनाथरूपेण अविर्बभूव। परस्पर- विरोधिन्योः श्री - सरस्वत्योः साहजिकविरोधः तस्य जीवनस्य पूर्वार्द्धे विशेषतो विद्याध्ययन-समये व्यलोकि लोकैः। पश्चात् सद्वंशमुक्तामणेस्तस्य जीवने उभयोः संगमोऽभवत्।

ख्रिष्टीयैकादशशतके अवदातशाण्डिल्यगोत्रीयः भट्टनारायणनामा कुलीनो विप्रः मध्यप्रदेशात् बङ्गदेशे समाजगाम। एतस्मिन्नेव पावने वंशे कालान्तरेण जायमानः गोपालनामा मनीषी पूर्वबङ्गस्य मैमनसिंहमण्डलान्तर्गतगायनाकन्दीनामके ग्रामे स्थायिरूपेण अध्युवास। क्रमेण एतस्यैव गोपालस्य वंशजः रामो नाम भूसुरः 'बागची'त्युपाधिना विभूषितोऽभवत्। नवाबशासनकाले एतद्वंशजाः कतिपये विशिष्टचिकित्सका अभूवन्। फलतस्ते कविराज-पदवी-विख्याता अभूवन्।

रामबागची महाशयस्य वंशजाः कालक्रमेण गायनाकन्दीग्रामं विहाय मैमनसिंह मण्डलान्तर्गततंगइलतप्पान्तर्गतदन्याग्राम-निवासिनो बभूवुः। अत्र च ते सामन्त वैभव-सम्पन्नाः समजायन्त। तस्य अतिवृद्धप्रपौत्रः कमलाकान्तकविराजः अत्रैव ससुखं जीवनं यापयामास।

"चक्रवत् परिवर्तन्ते दुःखानि च सुखानि चे"ति विधिविधानेन कमलाकान्ततनयस्य विधुरस्य चन्द्रनाथकविराजस्य असामयिकनिधनेन सुसमृद्धोऽप्ययं परिवारः अतीव दुर्गतोऽभूत्। तदानीं गोपीनाथकविराजस्य पिता वैकुण्ठनाथः षट्सप्तवर्षीयः निराश्रितः सन् स्वमातुलेन कलाचन्दसान्यालेन स्वग्रामे आनीतः लालितः पालितश्च। अल्पे एव वयसि 1876 ख्रिष्टाब्दे मातुलः वैकुण्ठनाथस्य विवाहं कारयामास। अस्य धर्मपत्नी सुखदासुन्दरीदेवी धामराई निवासिनः हरिश्चन्द्ररायस्य तनयासीत्।

वैकुण्ठनाथः अतीव तीव्रबुद्धिः विद्याव्यसनी चासीत्। आई. ए. बी. ए. प्रतिष्ठापरीक्षयोः कालिकाताविश्वविद्यालये प्रथमश्रेण्यां प्रथमो बभूव। वैकुण्ठनाथस्य सुहृदः आसन् नरेन्द्रनाथदत्त-प्रसिद्धविवेकानन्द-राष्ट्रपतिराजेन्द्रप्रसाद-गुरु सतीशचन्द्र-

मुखोपाध्याय-सर ब्रजेन्द्रनाथसीलप्रभृतयः। कालिकाताविश्वविद्यालये एम. ए. प्रथम वर्षे प्रविष्ट एव दैवदुर्विपाकेन वैकुण्ठनाथः रोगाक्रान्तः सन् 1887 खिष्टाब्दे अप्रैलमासस्य त्रिंशे दिवसे वैकुण्ठवासी अभूत्। अतः परं चतुर्मासानन्तरं धामराई ग्रामे सितम्बरमासस्य सप्तमे दिवसे माता सुखदा सुन्दरी गोपीनाथकविराजमहाशयमसूत। जननी एकमात्रम् आशाकिरणं वक्षःसंलग्नं नवजातमिमं शिशुं दर्शं दर्शं दुर्दिनं व्यत्यैषीत्।

कॉठालियाग्राम-वास्तव्यस्य पितुर्मातुलस्य प० कलाचन्द-सान्यालस्य संरक्षकत्वे कविराज महाशयस्य प्रारम्भिक-विद्यालय-शिक्षा प्रारब्धाभूत्। नवमे वर्षे तत्रैव 1894 खिष्टाब्दे फरवरीमासस्य अष्टादशे दिवसे कविराजमहोदयस्य उपनयन-संस्कारोऽभूत्। तत्रैव अङ्ग्रेजी-बंगला-संस्कृतभाषामधीयानः, कविराजमहाशयः स्वप्रतिभां प्राचीकटत्। तस्मिन्नेव वर्षे धामराई ग्रामे संस्थापिताङ्गलविद्यालये माता तनयं तत्रानीय तृतीयकक्षायां प्रावीविशत्। अत एव प० हाराणचन्द्र चक्रवर्तिनः, प० प्रसन्नकुमार चक्रवर्तिनश्च सदृशाद् विदुषः संस्कृतमधीयानस्य कविराजमहाशयस्य हृदये संस्कृते तत्साहित्ये च महती निष्ठा प्रादुरभवत्। अष्टमकक्षां यावदस्य अत्रैव शिक्षाभूत्।

त्रयोदशे वर्षे अल्पे एव वयसि कविराजमहोदयः प० कलाचन्द सान्यालस्य प्रेरणया कुसुमकामिनीदेव्याः पाणिमगृह्णात्। एवं सुखेन उच्छ्वसित्येव कविराजे एकाधिक एकोनविंशति - शत वर्षे जुलाईमासस्य अष्टमे दिवसे अभिभावके प० कलाचन्द सान्याले अकस्माद् यमदण्डप्रहारे सति आश्रयहीने कविराजे च दुर्दैव-दण्ड-प्रहारोऽभवत्। ततः अग्रिमशिक्षायाः समस्या विकटतराभूत्।

तस्मिन् समये काठालिया ग्रामवास्तव्यौ अविनाशचन्द्रसरकार-यदुनाथसान्यालौ ढाकायामधीयानौ आस्ताम्, तयोः सत्प्रेरणया साहाय्येन च गोपीनाथकविराजः ढाकामागमत् के० एल० जुबली विद्यालये प्रवेशञ्च अवाप्नोत्। तत्र आवास-भोजनादि व्यवस्था निःशुल्क-शिक्षा-प्रबन्धश्चाभूताम्। किन्तु पुस्तकाद्यर्थं द्रव्यस्य आवश्यकता आसीदेव।

प० कलाचन्द्रस्य सुहृत् प० कार्तिकशंकरतर्कालंकारः गोपीनाथ कविराजस्य आर्थिककष्टमवलोक्य तेन सह दीनच्छात्रसहायकं कलाचन्दस्य मित्रम् शाहभैरवनाथनामानं धनाढ्यं निकषा अगच्छत् कविराजस्य सहायतार्थमब्रवीच्च। परिचयं प्राप्य प्रसन्नः भैरवनाथः कविराजाय प्रतिमासं दश रुप्यकाणि दातुं सहर्षं स्वीचकार अवादीच्च प० कार्तिकशंकरम्–"अन्तिम समये कलाचन्दः एतस्यैव बालकस्य 'योगक्षेमार्थम् षट् सहस्त्ररुप्यकाणि मत्पार्श्वे विना लेखादिकम् न्यस्तवान्' इति। भैरवनाथस्य

सत्यशीलतामवलोक्य कार्तिकशंकरः स्तब्धोऽभूत् कृतज्ञताञ्च व्याहरत्। एवम् आर्थिकसंकटान् मुक्तः कविराजमहाशयः निरन्तरमध्ययनरतोऽभवत्।

अत्रैव (ढाकायाम्) अधीयानस्य कविराजमहाशयस्य धार्मिककार्य-कलापे अभिरुचिरभूत्। स प्रति रविवासरं ब्रह्मसमाजमन्दिरं गच्छन् भजनकीर्तनं शृण्वन् आसीत्। तत्रैव प्रसिद्धबङ्गीयपत्र 'बान्धवस्य' सम्पादकेन रायबहादुर कालीप्रसन्नघोषेण सह अस्य परिचयोऽभूत्। घोषमहाशयः छात्र-जीवने कविराज महोदय - लिखित निबन्धस्य 'बान्धवे' प्रकाशनं विधाय एनं प्रोत्साहितमकरोत्। स्वकीय-पुस्तकालये अध्ययनस्य सौविध्यञ्चास्मै प्रादात्।

ढाकायामेव कविराजस्य पाणिनीयव्याकरणे अभिरुचिरजायत। तत्रैव प० रजनीकान्त - प० विधुभूषणगोस्वामिभ्यां नियमपूर्वकं पाणिनीयव्याकरणमधीतवान्। तत्रैव एन्ट्रेन्सकक्षायां पठन्नेवायम् आङ्गल-भाषा-साहित्य-विशेषज्ञात् प्रधानाचार्य हेरम्बचन्द्रमैत्रात् अधीयानः आङ्गलसाहित्ये गाम्भीर्यमवाप्तवान्। शेक्सपीयर - मिल्टन-वाइरन - वर्ड्सवर्थ - प्रभृतीनां महाकवीनां सर्वाः कृतीः अधीतवान्। एवं गुरूणां प्रियः कविराजमहाशयः ढाकाकॉलेजात् पञ्चाधिक एकोनविंशतिशततमे वर्षे प्रथमश्रेण्याम् 'एन्ट्रन्स' इति परीक्षां समुत्तीर्णः।

एतत्परीक्षानन्तरं दुर्योगाद् दीर्घज्वराक्रान्तः कविराजः अग्रिमकक्षायां प्रवेष्टुमसमर्थोऽभवत्। तदानीं भारते राष्ट्रियान्दोलन-स्वदेश-प्रेम-जागरणं सर्वत्रासीत्। तस्मिन्नेव समये राष्ट्रियजागरणविषयकं जयपुर - सम्बन्धिनम् धर्मानन्दस्य एकं लेखमधीत्य कविराज महोदयः अध्ययनार्थं जयपुरं गन्तुं कृतनिश्चयोऽभूत्। तस्मिन् लेखे नगरनियोजक - विद्याधर चक्रवर्तिनः प्रधानमन्त्री संसारचन्द्रसेनस्य च चर्चा आसीत्। जयपुरे निवसतोः प्रभावशालिनोरेतयोः सहयोगस्याशया सप्तदशवर्षीयः कविराजः षडधिक-एकोनविंशतिशततमे ख्रिष्टाब्दे जुलाईमासे जयपुरमगात्। महाराज कॉलेजे 'एफ ए' कक्षायां प्रवेशमलभत। तत्रैव म० म० प० हरप्रसादशास्त्रिणः भ्रात्रा मेघनादभट्टाचार्येण तन्महाविद्यालयस्य उपप्राचार्येण परिचयोऽभूत्। तस्य सहयोगः जयपुरे कविराज महोदयस्याध्ययने अतीवलाभ-प्रदोऽभूत्।

एकदा कक्षायाम् आङ्गलप्राध्यापकः नवकृष्णरायः वर्ड्सवर्थमहोदयस्य "दि वर्ल्ड इज टू मच विद अस" इति शीर्षक-कवितां व्याख्यातुं छात्रानादिशत्। कविराजमहाशयस्य तद्व्याख्यामवलोक्य प्रसन्नः नवकृष्णः सहसा अकथयत्, –

"आइ थिंक आइ उड नॉट हैव रिटेन बेटर" इति।

कविराजस्य आर्थिकविपन्नतामवगत्य स पञ्चदशानां रूप्यकाणां छात्रवृत्तेः प्रबन्धमकार्षीत्। तत् साहाय्येन कविराजः स्वस्थः सन् अध्ययन-निरतोऽभवत्। अत्रायं भारतीय-धर्म-दर्शन-पुरातत्त्वानाम्, यूरोपीय-विभिन्न-साहित्यानाम्, आङ्गलमाध्यमेन फ्रेञ्च- स्पेनिश-जर्मन-रूसीयादिसाहित्यानां गम्भीराध्ययनमकरोत्। बी. ए. कक्षां यावदत्र अध्ययनं विधाय, प्रथमश्रेण्यां समुत्तीर्य एम्० ए० कक्षायामध्ययनार्थमयं काशीमागमत्। अत्र दशाधिकएकोनविंशतिशततमे ख्रिष्टाब्दे जुलाईमासे संस्कृतकॉलेजे तत्कालीन-प्रधानाचार्यस्य डॉ० वेनिसमहोदयस्य सहानुभूत्या ससुखं प्रवेशमलभत। अत्रैवायं भारतीयदर्शनशास्त्रस्य गम्भीराध्ययनं प० वामाचरणभट्टाचार्यात् व्यधात्। छात्र-जीवने एव कविराजमहाभागस्य विद्वत्सु महती ख्यातिरभूत्। तदानीन्तनानां दिग्दिगन्तविख्यातानां काशीनिवासिनां मनीषिणां शिष्यत्वमवाप्य महाभागोऽयं परां प्रीतिमवाप्तवान्। तस्मिन्नेव समये आचार्यनरेन्द्रदेवस्य सहाध्यायित्वं समवाप्य परम-प्रमोदञ्चावाप्नोत्।

एम० ए० परीक्षां प्रयाग-विश्व-विद्यालयात् प्रथम-श्रेण्यां प्रथमरूपेण समुत्तीर्य कविराजमहोदयः अनुसन्धानकार्ये संलग्नोऽभूत्। चतुर्दशाधिकैकोनविंशतिशततमे ख्रिष्टाब्दे अप्रैल मासस्य चतुर्थे दिवसे अयम् सरस्वतीभवनपुस्तकालये अध्यक्षरूपेण नियुक्तोऽभूत्।

अष्टादशाधिकोनविंशतिशततमे वर्षे कालिकाताविश्वविद्यालयस्य उपकुलपतिः आशुतोषमुखोपाध्यायः अधिकवेतने कविराजमहाशयं नेतुं समागतः। तत् तिरस्कृत्य काशीवासमेवायं श्रेयस्करममन्यत।

एतस्मिन्नेव वर्षे कविराजमहोदयः दीक्षामगृह्णात्। गुरुदेवः काश्यामेव निवसन्नासीत्। गुरुचरणसमीप-निवासे जीवन-साफल्यं मन्यमानः अयम् काशीतः बहिर्गन्तुं नैव ऐच्छत्। अत एव लखनउविश्वविद्यालयस्योपकुलपतेः ज्ञानेन्द्र चक्रवर्तिनोऽपि आग्रहमस्वीकृत्य काश्यामेवायं न्यवसत्।

दीक्षा-ग्रहणानन्तरं कविराज-महाशयस्य अभिरुचिः भक्ति-दर्शने विशेषतः गौडीयवैष्णवधर्मे अधिकमवर्धत। धर्म-दर्शन-विषयेषु अस्य अनेके शोध-निबन्धाः प्रकाशिता अभूवन्।

चतुर्विंशत्यधिकैकोनविंशतिशततमे वर्षे, गवर्नमेण्टसंस्कृतकॉलेजस्य प्रधानाचार्ये डॉ० गङ्गानाथझामहोदये प्रयागं गतवति कविराजमहाशयः तत्र प्रधानाचार्यपदे नियुक्तोऽभवत्। दीर्घकालं यावत् कुलसचिवस्य परीक्षायोजकस्यापि कार्यमयं न्यभालयत्।

गोपीनाथकविराजमहाशयस्य जन्म प्रशासनादि नीरसकार्यार्थं नाभवत्। स्वाध्याये आध्यात्मिकजागरणे च प्रशासनादि-कार्यं प्रतिकूलं मन्यमानोऽयं कार्यकालावधेः प्रागेव सप्तत्रिंशदधिकोनविंशतिशततमे वर्षे मार्चमासस्य त्रयोदशे दिवसे राजकीयसेवातो मुक्तो भूत्वा आत्मयाजी भवन् स्वाराज्यमधिगन्तुं प्रायतत। अस्मिन्नेव वर्षे वाराणस्यां स्वनिर्मितभवने अयं निवासमकरोत्।

कविराजमहोदयस्य सुधानाम्नी एका तनया जितेन्द्रनाथनामा एकस्तनयश्चेति सन्ततिद्वयी अभूत्। "न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियमि"ति गीतोक्तं कविराजमहोदयस्य ब्रह्मवित्त्वम् लोकैस्तदावलोकितम् यदा तस्य एक एव सुयोग्यः सेवारतस्तनयस्तस्य समक्षमेव तनुमत्यजत्। वीतरागस्य वीतशोकस्य कविराजस्य चित्तं तदापि नोद्विग्नमभूत्। राधा-माधवयोर्मधुर-संगीतं श्रावं श्रावं तद् रूपं पश्यती तस्य चक्षुषी निरन्तरं प्रवहमानाश्रु पिबती मन्ये तनयस्य महायात्रामवलोकयती सर्वथा शुष्के अभूताम्। अध्यात्मचिन्तनपरः कविराजः सर्वथा प्रकृतिस्थोऽभवत्।

'प्रारब्धकर्मणां भोगादेव क्षयः' इति नियमेन ततः परम् कविराजः सन्नपि अयं रूग्णोऽभवत्। स्नेहार्द्रमानसा माता आनन्दमयी द्रष्टुमेनमागमत्। तस्या आग्रहेण रोग-परीक्षणमभूत्। क्षेत्रियकर्कटरोगस्य संभावनासीत्। माता एनं मुम्बईस्थे 'टाटा मेमोरियल कैन्सर इंस्टीट्यूट' इत्याख्ये चिकित्सालये आनयत्। तत्र विश्वविख्यातः कैंसररोगविशेषज्ञः डॉ० बर्जेसमहोदयः अस्य शल्यचिकित्सामकरोत्। भोगेन कर्मक्षयं विधाय कविराजः स्वस्थोऽभवत्। तदानीन्तनस्य महाराष्ट्रराज्यपालस्य श्रीप्रकाशस्य अत्याग्रहेण स पूनायां कतिचिद् दिवसान् व्यतीत्य काशीमागमत्।

कविराजमहोदयस्य अप्रतिम-प्रतिभाम्, अपूर्व-सारस्वत-साधनाम्, विशाल-पाण्डित्यम्, निरुपमव्यक्तित्वञ्चावलोक्य चतुस्त्रिंशदधिकैकोनविंशतिशततमे वर्षे भारत-सर्वकारः एनम् महामहोपाध्यायोपाधिना अभूषयत्, प्रयागविश्वविद्यालयः 1947 वर्षे, काशी हिन्दू विश्वविद्यालयश्च 1954 वर्षे, कालिकाता विश्वविद्यालयश्च, 1964 वर्षे 'डी० लिट्' इत्युपाधिना अलंकृतमकरोत्। राष्ट्रपति डॉ० राजेन्द्र प्रसादः 1956 वर्षे राष्ट्रपति-पुरस्कार-रूपेण सम्मान-प्रमाण पत्रेण भूषितमकार्षीत्। लखनऊस्था अखिल भारतीय संस्कृत परिषद् सम्मान्यपारिषदरूपेण एनमभूषयत्। भारत सर्वकारः 1964 वर्षे पद्मविभूषणेन सम्मानितमकरोत्। भारतसर्वकारस्य साहित्य अकादमी 1964 वर्षे साहित्यिक पुरस्कारेण सममानयत्। हिन्दीसाहित्यसम्मेलन प्रयागः 1965 वर्षे साहित्यवाचस्पतिना अलंकृतमकरोत्।

विद्वद्वरेण्यस्य कविराजमहाशयस्य ग्रन्थ-निबन्धरचना विषये विशेष-विवरणमसंभवम् - हिन्दी भाषायाम् सप्त, बङ्गभाषायाम् एकादश, आङ्गलभाषायाम् चत्वारः बृहदाकार-ग्रन्थाः प्रकाशिताः सन्ति। संस्कृते निबन्धलेखाः दश, हिन्दीभाषायाम् द्वाविंशत्यधिकशतम्, बङ्गभाषायाम् नवत्यधिकशतम्, आङ्गलभाषायाम् चत्वारिंशतोऽधिकाः प्रकाशमपश्यन्। विभिन्न-भाषासु भूमिकानां प्रस्तावनानाञ्च संख्या द्व्यशीतेरधिका। सारस्वत-यागस्य अध्वर्योः कविराजमहोदयस्य उपयुक्तं शारदानुष्ठानमेव एतस्य सारस्वत- साधनाया निदर्शनम्।

कविराजमहाशयस्य इदं बहिर्जगतो रूपम्। अन्तर्जगतो विशिष्टं रूपन्तु विरला एव विजानते। अयम् जन्मनैव आध्यात्मिकमहापुरुष आसीत्। बाल्ये एव महामानवोऽयमपूर्वम् आध्यात्मिकवातावरणमवाप्नोत्। क्रमशस्तत्र अभिरुचिरवर्धत। छात्रजीवने एवायम् अनेकैः सिद्धैर्महात्मभिश्च मिलितः। तेषां सदुपदेशाचरणम् स्वजीवने अन्वसरत्।

काश्यामेव कविराजमहाभागः शिवस्वरूपस्य श्रीशिवरामकिङ्करयोगत्रयानन्दस्वामिनः शरणमवाप्नोत्। तत्कृपया ज्ञान-भक्ति-योगेषु अस्य अभिरुचिरवर्धत। एतस्मिन्नेव प्रसङ्गे कविराजमहाशयः श्रीविशुद्धानन्द परमहंसस्वामिनः सान्निध्यमवाप्नोत् तस्य अपूर्व योग-चमत्कारं सूर्य-विज्ञानञ्चावलोक्य दीक्षार्थं तम् प्रार्थयत। अष्टदशाधिकैकोनविंशतिशततमवर्षे जनवरीमासस्य एकविंशे दिवसे गङ्गातटे 'हनुमान घाट' नामके पावने स्थले कविराजमहोदयः परमहंसमहाशयात् दीक्षामगृह्णात्।

सप्तत्रिंशदधिक ऊनविंशतिशततमवर्षे जुलाईमासस्य एकादशे दिवसे स्वामी विशुद्धानन्दः शिवसायुज्यमवाप्तवान्। श्रीगुरुचरणविरहः कविराज-महोदयस्य खेदाय अभवत्।

कविराजमहोदयस्य आध्यात्मिक-जीवन-विकासका अन्ये ये महात्मान आसन् तेषु श्रीरामचन्द्रचक्रवर्ती पागलवावा, माता आनन्दमयी, सिद्धिमाता, सतीशचन्द्र मुखोपाध्यायश्च प्रमुखाः। माता आनन्दमयी अस्मिन्नतीव स्निह्यतिस्म।

अतः परं कविराजमहाशयस्य दिनचर्या सुस्थिराभवत्। योगिराजमहानुभावोऽयम् आध्यात्मिकचर्चायाम्, यौगिकप्रक्रियायाम् भक्त्यात्मकसाधनायाञ्च अन्तपर्यन्तं संलग्न आसीत्।

षट्सप्तत्यधिक एकोनविंशति शततमे ख्रिष्टाब्दे जूनमासस्य द्वादशे दिवसे आषाढ-पूर्णिमायां काश्यां कविराजमहाशयः नश्वरं शरीरं परित्यज्य परमं धाम प्राप्नोत्।

मधुरमेकं संस्मरणम्

ख्रैष्टषष्टितमहायनस्य आसीदन्तिमो मासः। आसीच्च भगवान् भास्करो मध्याह्ने अतीव सुखावहः। तस्मिन्नतिरमणीये समये गतो महामहोपाध्याय डॉक्टर गोपीनाथकविराजमहाभागस्य दर्शनेन आत्मानं कृतार्थयितुं तस्य पवित्रे निवासे। तस्मिन् समयेऽहम् 'काव्यात्म-मीमांसा' विषयक-स्वकीयगवेषणकार्ये वाराणसीं समागत आसम्। तद्विषयकजिज्ञासा अपि कतिचिदासन्। तासां समाधानार्थं समुत्सुकमानस आसम्। किं वक्ष्यति कविराजमहाभाग इति परिशङ्कितहृदयः अग्रेसरोऽभूवम्। न कोऽपि तदानीं तत्रासीत् प्रतिरोधकः, न वा कोऽपि वार्ताहरः। कथमुपरि विना सूचनां यानि, किं वा करवाणि इति दोलायमानमनाः कथं कथमपि तत्प्रकोष्ठस्य उपद्वारं गतः, यत्र दिदृक्षितो महापुरुषः उत्तानं शयानः पश्चिमशिरा व्यराजत। दृष्ट्वा तं तत्पादयोः शिरसा स्पर्शं व्यधाम्। प्राप्त-तन्नेत्रसङ्केतः तस्य उपोत्तमाङ्गमुपाविशम्। परितस्तम् पुस्तकानि विकीर्णानि आसन्। पार्श्वे एकस्मिन् पिहितमुखे पात्रे भृष्टतण्डुलाः (मुड़हीति भाषायां) आसन्। तत् समुत्सुकं व्यलोकयन्तं मां प्रत्यवादीत् कविराजमहाभागः--"नियमेनैतदश्नामि" इति। तेषु दिवसेषु स शरीरेणास्वस्थोऽपि मनसा पूर्णस्वस्थ आसीत्।

"अत्रभवतां दर्शनेन आत्मानं कृतार्थयितुं समागतोऽस्मि" इति मामकीनं वचनं श्रुत्वा स मम परिचयं ज्ञातुमना अभवत्। मम परिचयप्रसङ्गे मे पूर्वजयोः स्वनामधन्ययोर्भवनाथ-शङ्करयोर्नाम्नी आकर्ण्य अत्यानन्दितमनाः कविराजमहाभागः साशीर्वादं मयि स्निह्यति स्म। तत्रागमनकारणं चापृच्छत्।

"काव्यात्मविषये अनुसन्धानकार्यं करोमि 'पी-एच० डी०' उपाधिहेतोः। एतत्प्रसङ्ग एव वाराणसीमागतोऽस्मि। एतद्विषये एका जिज्ञासापि वरीवर्ति।"

'काव्यशास्त्रे काव्यात्मप्रतिष्ठापका ये विभिन्नाः सम्प्रदायाः सन्ति, तेषु अलंकार-सम्प्रदायः अलंकारमेव काव्यात्मानं मनुते। किन्तु भामह-दण्डि-भट्टोद्भट-रुद्रटप्रभृतिभिः अलंकार-सम्प्रदायाचार्यैः न कुत्रापि अलंकारस्य कृते आत्मशब्दस्य व्यवहारः कृतः। तर्हि कथन्तेषां मते अलंकारस्य आत्मत्वं सिद्ध्यति ? केवलम् अभिनवगुप्तपादेन "अथ सा (अतिशयोक्तिः) काव्यजीवितत्त्वेन उक्ता" इत्येवं प्रतिपादयाञ्चक्रे। किमेतावता अलंकारस्य आत्मत्वं सिद्धं भवति ?

''अथ सा काव्यजीवितत्वेन उक्तेति'' पंक्तिः क्वाधिगता भवतेति कविराजमहोदयेन पृष्टोऽहम् प्रत्यवोचम्--''भामहेन प्रतिपादितायाः सर्वालङ्कारारूपाया अतिशयोक्तेर्महत्त्वं स्वीकुर्वाणेन आनन्दवर्धनेन ध्वन्यालोके यत्र तत् प्रतिपादितम्, तस्यैव 'लोचने' लोचनकारेण अभिनवगुप्तपादाचार्येण तथा प्रतिपादयाञ्चक्रे।''

श्रुत्वेदं मम वचनं प्रत्यवोचत् कविराजमहानुभावः--''जातं भवज्जिज्ञासा-समाधानमिति''। ''भामहोक्ता अलंकारसामान्यरूपा वागीशमहिता अतिशयोक्तिरेव अलंकारसम्प्रदाये आत्मस्थानीया। एतस्या एव कृते काव्यजीवितशब्दस्य व्यवहारो भवति। अत एव अलंकारस्य काव्यात्मत्वं तैः स्वीक्रियते'' इति।

''तान्त्रिकबीजमन्त्रा आपाततो ये अनर्थकाः प्रतीयन्ते, तेषां जपे किं फलं प्राप्यते? अनर्थक-मन्त्रजपो निष्फलो भवतीत्यभिज्ञाः संप्रचक्षते'' इति। मामकीनं द्वितीयं प्रश्नमाकर्ण्य कविराजमहोदयः प्रत्यवोचत--

''बीजमन्त्रा अपि सार्थकाः सन्ति। तेषामर्थाः एकाक्षरकोषद्वारा ज्ञातव्याः। किन्तु अर्थज्ञानमन्तरापि तेषां जपे सिद्धिर्भवत्येव, यतो हि मन्त्रे स्वरूपत एव शक्तिर्विद्यते। आवश्यकतास्ति शुद्धमन्त्रोच्चारणस्ये''ति।

प्रभुसंमितवाक्यमिव तद्वाक्यं हृदये निधाय तदानीमेव अपरं जिज्ञासुं समागतं समवलोक्य कविराजमहोदयं भूयो भूयः प्रणम्य तस्मात् संस्मरणीयपवित्रस्थानादुदतिष्ठम्।

पण्डित शीतल-प्रसादशुक्लः—यथाहमेनं जाने

भारतीय-प्राचीन-संस्कृतेः प्रतिमूर्तिः सौम्याकृतिः धौतवस्त्रादिपरिधानमादधानः प० शीतलप्रसादशुक्लः तदानीन्तनानां समेषां लंगटसिंहमहाविद्यालय - प्राध्यापकानां सुपरिचित आसीत्। तस्य शीतल:प्रसादः मधुर-स्वभावः सर्वैः साधुरूपेण अनुभूत आसीत्। अस्मिन्नेव महाविद्यालये त्रिंशतो वर्षेभ्योऽप्यधिकं कालं छात्रान् प्राध्यापयन् १९५३ तमे वर्षे विश्वविद्यालय - सेवातो विश्रान्तिमलभत। अहं सत्रैकं यावत् तेन महात्मना मनीषिणा सह महाविद्यालये कार्यं कुर्वाणः तस्य स्नेहस्य सौजन्यस्य सौहार्दस्य च भाजनमभूवम्।

तेषु दिवसेषु संस्कृतविभागाध्यक्षः पण्डितउमानाथझामहोदयः आसीत्। तयोर्मध्ये यादृशं सौहार्दं यादृशं च प्रेम अहं व्यलोकयम् न लभ्यते अधुना तादृशं प्राध्यापकेषु। एकस्मिन्नवसरे पण्डितवरेण उमानाथझामहाभागेन कथितम् "गतेषु त्रिंशति वर्षेषु आवयोर्मध्ये कदापि वैमनस्यं नाभूत् तथा प्रायेण कदापि महाविद्यालये आवयो रागमनं विलम्बेन नाभूत्। कदाचित् अवकाशे स्थितस्य एकस्य कक्षायाम् अपरः नियमेन प्राध्यापयन्नासीत्।" इति। शुक्लमहोदयस्य ईदृश नियमपालनं सर्वथाऽनुकरणीयमासीत्। स न केवलं संस्कृतसाहित्ये निष्णात आसीत्, अपि तु आङ्गल-साहित्यस्यापि मर्मज्ञ- आसीत्।

दैवदुर्विपाकेण शुक्लमहोदयस्य कनिष्ठतनयस्य नगेन्द्रमोहनशुक्लस्यानुजस्य मैट्रिक-परीक्षायां प्रथमश्रेण्यामुत्तीर्णस्य तस्मिन्नेव दिने अतिशोकावहमसामयिकं निधनमभूद यस्मिन् दिवसे तस्य परीक्षाफलं प्रकाशितमभूत्। एतेन अनभ्रवज्रपातेन शुक्लस्य न केवलं कोमलं हृदयं सहस्रधा छिन्नमभूत्, अपि तु मस्तिष्कमपि तथैव विदलितम्। संसारस्य निस्सारतामनित्यतां च दर्शं दर्शं तस्य मानसं विचित्रां स्थितिमवाप्नोत्। गुरोरुपदेशमिव पण्डितप्रवरझामहोदयस्य सदुपदेशं मन्यमानः शुक्लमहोदयः वाल्मीकिरामायणस्य स्वाध्यायं प्रारभत। स्वाध्याय-प्रसङ्गे

"सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्।।"

अमुं सत्यश्लोकमधीत्य स दिव्यज्ञानमवाप्नोत्। एतस्य शाश्वतिक सत्यता-मधिकृत्य बहुधा स मया सह आलापमकरोत्। वाल्मीकि-रामायणेन तस्य जीवनं

प्रभावितमासीत्। भगवतो रामभद्रस्य धर्म-विग्रहस्य धृति-क्षमा-सत्य-दम-शमादीनामाचरणं तस्य जीवन-व्यवहारे स्पष्टं प्रतीयमानमासीत्।

गो-सेवा तस्य जीवनस्य प्रधानं व्रतमभूत्। आयस्य अधिकांशं स गोसेवायामेवाव्ययीत्। अनेकधा गोभिः मधुराणि खादयन्तं शुक्लमहोदयमहमपि व्यलोकयम्। एतेन तस्य हार्दिक-गोसेवाव्रतमनुमेयम्।

अवकाशप्राप्तिसमयात् परं प्रायः दशमे वत्सरे--

रामं रामायणं धेनुं राधयन् नियमेन सः।
विहाय नश्वरं देहं नित्यं गोलोकमाप्तवान्।।

न केवलं विहारविश्वविद्यालयपरिवारः, अपि तु समस्तमुजफ्फरपुर - जन-समाजः तस्य निधनेन शोकाकुलः सन् तस्य चिर-शान्त्यर्थं भगवन्तं प्रार्थयत।

नाट्य का प्रेक्षक

कविकुल गुरु महाकवि कालिदास का यह कहना नितान्त संगत है कि यों तो सभी अपने-अपने घर की विद्या को सब से अच्छा मानते हैं, पर नाट्यकार जो अपनी नाट्य-विद्या का इतना अभिमान करते हैं वह झूठा नहीं है; क्योंकि मुनि लोगों का कहना है कि यह नाट्य तो देवताओं की आँखों को सुहानेवाला यज्ञ है। स्वयं अर्धनारीश्वर भगवान् शंकर ने अपने अंगों को दो भागों में विभक्तकर ताण्डव और लास्य रूप से इसके दो भाग कर दिये हैं। इसमें सत्त्व, रज और तम तीनों गुण भी दिखलाई पड़ते हैं और अनेक रसों में लोकचरित्र भी दीख पड़ते हैं। इसलिए भिन्न-भिन्न रुचिवाले लोगों के लिए प्रायः नाट्य ही एक ऐसा महोत्सव है जिसमें सबको एक सा आनन्द मिलता है।[१]

भरतमुनि ने पंचम नाट्य-वेद का निर्माण इसी लिए किया कि यह श्रुति-स्मृति आदि के अधिकारी या अनधिकारी सबों को समान रूप से आनन्द प्रदान करेगा[२]। इस तरह आपामर सभी व्यक्ति नाट्य के अधिकारी होते हैं और असाधारण विद्वान् से लेकर साधारण व्यक्ति तक इसको देखते हैं एवं अपनी वासना तथा संस्कार के अनुसार आह्लाद को प्राप्त करते हैं।

परन्तु नाट्य का, जिसमें धीरोदात्तादि नायकों की विभिन्न अवस्थाओं का आङ्गिक, वाचिक, सात्त्विक और आहार्य (वेश-भूषादिकृत) इन चतुर्विध अभिनयों से हू-बहू अनुकरण होता है, सब कोई प्रेक्षक नहीं होते जैसा कि स्वयं भरतमुनि ने आगे चलकर नाट्य शास्त्र में बतलाया है। और इसका कारण भी स्पष्ट है। नाट्यशास्त्र बिलकुल ठीक ही बतलाता है कि "नहि रसाद् ऋते कश्चिदर्थः प्रवर्तते"[३] अर्थात् रस के बिना विभावादि कोई अर्थ, निष्प्रयोजन हो जाने के कारण, नाट्य में आगे बढ़ ही नहीं सकता। रस ही तो नाट्य का चरम प्रयोजन होता है। इसलिए आचार्य अभिनवगुप्त ने "नाट्यमेव रसः"[४] कहकर नाट्य और रस में सर्वथा अभेद बतलाया है जो कि वस्तुतः सर्वथा मान्य है। इसी से यह स्पष्ट हो जाता है कि जिस व्यक्ति में रसास्वाद करने की क्षमता है वही वस्तुतः नाट्य का प्रेक्षक होता है। इसलिए प्रेक्षक का स्वरूप बतलाते हुए भरतमुनि ने कहा है कि जो व्यक्ति आनन्दात्मक अभिनय से आनन्द को, शोकात्मक अभिनय से शोक को और दैन्यात्मक से दीनत्व को प्राप्त करता है वही नाट्य का प्रेक्षक

---

१. द्रष्टव्यः मालविकाग्निमित्र की प्रस्तावना।

२. न च एते गुणाः सर्व एकस्मिन् प्रेक्षके स्मृताः।।वही २७, ५६।।

३. नाट्यशास्त्र, अ० ६, पृ० ७१, काशी सं०।

४. अभिनव भारती, पृ० २६०, गायकवाड सं०।

